shewing its great popularity among our ancestors which is also clear from its commentaries and references by Daṇḍi, Vāmana and other great writers. Prof. Aufrecht gives a succinct account of it and of a commentary by Narasiṁha Shāstri in his catalogue pp. 215-8. The following passage from 7.3. will explain the quotation of Svāmi under 3. 3. 191 : "रतियोगे हि कीलया गणिकां चित्रसेनां पञ्चालराजो जघान कर्तर्या कुन्तलः शातकर्णिः शातवाहनो महादेवीं नरदेवः कुपाणिः विद्धया दुष्प्रयुक्तया नटीं काणां चकार". Through the kindness of Dr. Thibaut of Benares, I now possess a transcript of the commentary Jayamangalā and it thus explains कीला : "मुष्टिरेव तर्जनीमध्यमयोर्बहिःपृष्ठभागेन निष्क्रान्तयोरुपर्यङ्गुष्ठयोजनात् कीला." The introduction to this work is historically interesting and I reproduce it from my Ms. which differs very little from Aufrecht's version : "श्रीकृष्णाय नमः धर्मार्थकामेभ्यो नमः शास्त्रं प्रकृतत्वात् तत्समवायबोधकेभ्यश्चाचार्येभ्यस्तत्संबन्धात्। प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच। तस्यैकदेशं स्वायंभुवो मनुर्धर्म्माधिकारिकं पृथक्चकार, बृहस्पतिरर्थाधिकारिकं महादेवानुचरो नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच, तदेव तु पञ्चभिरध्यायशतैरौद्दालकिः श्वेतकेतुः संचिक्षेप, तदेव पुनरध्यर्धेनाध्यायशतेन साधारणसांप्रयोगिककन्यासंप्रयुक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदिकैः सप्तभिरधिकरणैर्बाभ्रव्यः पाञ्चालः संचिक्षेप, तस्यैकदेशं षष्ठं वैशिकमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद् दत्तकः पृथक्चकार, तत्प्रसङ्गाच्चारायणः साधारणमधिकरणं पृथक् प्रोवाच, सुवर्णनाभः साम्प्रयोगिकं, घोटकपुत्रः कन्यासंप्रयुक्तकं, गोनर्दीयो भार्याधिकारिकं, गोणिकापुत्रः पारदारिकं, कुचुमार औपनिषदिकं एवं बहुभिराचार्यैस्तच्छास्त्रं खण्डशः प्रणीतमुच्छिन्नकल्पमभवत्, तत्र दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वान्महदिति च बाभ्रवीयस्य दुरध्येयत्वात् संक्षिप्य सर्वमर्थमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतवानिति वात्स्यायनः।"

(c) KAUTILYA OR CĀṆAKYA

According to our lexicographers, Kautīlya and Cāṇākya are synonyms "कौटिल्यश्चणकात्मजः", Hema Candra 3. 517, Keshava 4. 137. But it is curious that although Cāṇakya as son of Caṇaka occurs under Pāṇini 4. 1. 105, Kauṭīlya as son of Kuṭila is mentioned only by Vardhamāna under Gargādi 248. Svāmi's reference to Cāṇakya is only by name, but his quotations from Kauṭīlya are all in prose except under 2. 3. 12, which is apparently a foot of an anuṣṭup verse. His quotation from Artha-

---

वरतनु संप्रवदन्ति कुक्कुटाः" quoted by him under 1. 3. 48 is assigned to Bhāravi, who seems to have been acquainted with Vātsyāyana. Gonardīya, as quoted by Mallinātha, is in poetry vide Raghu xix. 29, 31 and Kumāra vii. 95 (here Gornarda, if not a misreading, stands for Gornardīya).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

shāstra is also in prose and apparently refers to the same authority*. I do not know whether this work is still extant, but there can be no question about its antiquity and the expression "अभिष्यन्दवमन" used by Kālidāsa in Raghu xv. 29 appears to be borrowed from him (compare Mallinātha's quotation).

(d) DANTILA

Dantila is twice quoted in the Nāṭyavarga. A fragment of Dantila-kohalīa‡ is in the Tanjore library but as it is a fragment I do not find Svāmi's quotations in the copy kindly made for me by the Receiver. It is not a very old work, as both Mātṛgupta and Abhinava Gupta are mentioned in it. The 11th verse is "ततः स्वकल्पितं भव्यं भरताय च तण्डुना। व्यादीदिशत् ताण्डवाख्यमस्याग्रे गिरिकन्यया ॥" This derivation is favoured by Svāmi under 1. 6 10. The following is the introduction to Dantila kohalīya : "किन्दुरोजोभि (?) रासीनमुन्दुरोरपराङ्गके। वन्दे लक्षीकरं वन्दे तुन्दिलं धामछुन्दरंम् ॥१॥ समस्तवेदशास्त्रार्थसारज्ञाय गुणात्मने। सर्वानन्दानुसंधात्रे सङ्गीतब्रह्मणे नमः ॥२॥ दन्तिलः कोहलश्चैव द्वौ सङ्गीतविशारदौ। ताभ्यामिदं कृतं शास्त्रं नृत्तलक्षणपूर्वकम् ॥३॥ नृत्तानां लक्षण किं च तालानां लक्षणं तथा। वाद्यानां लक्षणं चैव क्रमादिह विरच्यते ॥४॥ सङ्गीतशास्त्रकर्तारः सर्वज्ञः पार्वतीपतिः। ब्रह्मा च भरतश्चैव काश्यपः शक्तियाष्टिकौ ॥५॥ शार्दूलको मतङ्गश्च नन्दी नारद एव च। रम्भा च तुम्बुरुश्चैव रावणो वायुनन्दनः ॥६॥ मातृगुप्तश्च तण्डुश्च मघवान् क्षेत्रपालकः। कम्बलाश्वतरौ वायुर्विश्वावछविशाखिलौ ॥७॥ उग्रसेनोऽर्जुनश्चैव सन्त्यन्ये बहवो जनाः। तेषां मतानुसारेण संग्रहेण विरच्यते" ॥८॥

(e) DHANURVEDA

Dhanurveda is referred to in 2. 8. 79 and quoted in 2. 8. 80. India Office 1667 is a fragment called Vīracintāmaṇī: "समाप्तोऽयं धनुर्वेदस्य परिच्छेदो वीरचिन्तामणिर्नाम" and the following passage from it will explain the first reference : "स्युः प्रतालीढमालीढ समपादमनुक्रमं। वैशाखं मण्डलं स्थानकानि पञ्च धनुर्भृतां" This Vīracintāmaṇi, however, is a recent compilation as Shārngadhara calls it his own work (Benares edition p. 332). Accord-

* Mallinātha's quotations from Kauṭīlya are mostly in prose. They are anuṣṭup under Raghu xvii. 55. 81. Cāritravardhana's quotations form Cāṇakya are also in prose, Raghu iii. 28. 33. (Nandargikar's edition). Mullinātha's under Raghu i. 22. is an anuṣṭup foot. I, therefore, conclude like Vātsyāyana's Cāṇakya's work was mostly in prose with a few. anuṣṭup verses.

‡ The Mss. often write Dattila as Nāgarī त्त and न्त are similar. Aufrecht writes Dantika.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ing to Mahābhārata ii. 5. 121, the original Dhanurveda appears to have been in Sūtras like Pālakāpya : "कच्चिदभ्यस्यते सम्यग् गृहे ते भरतर्षभ । धनुर्वेदस्य सूत्रं वै यन्त्रसूत्रं च नागरम् ।."

(*f*) SHALIHOTRA

The quotation under 2. 8. 45 is from an Ashvatantra, but whether from a version of Shālihotra I can not say. The Sārasaṁgraha described by Burnell is probably the largest, as it is said to contain 6000 verses. India Office 2402 is by Jaya Datta son of Vijaya Datta. India Office 107 contains a fragment ascribed to Nakula, although the body of the work invariably makes the author Shālihotra. This name does not occur in Pāṇiṇi, but the author must have flourished within a few centuries of the Christian era, as he is named and described in a story of the Pancatantra.

(*g*) SŪDASHĀSTRA

By Sūdashāstra, Svāmi apparently means some compilation ascribed to Nala, of which the Nala pākashāstra is said to be a modern version. The verse quoted by him occurs also in the Bhāva Prakāsha, but I can not say what is its original source.

(*h*) CANDRAGOMI

The references to Candra's grammar and Candra's Dhātuvṛtti are apparently to Candragomi. According to Punjarāja (not Bhartṛhari as commonly asserted), he is much later than Patanjali "पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः। स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः". This is more clear from the following passage of Kavirāja (Kalāpa, Bhabānipur edition p. 28) : "अतएव चन्द्रगोमिनापि वचनमिदं प्रत्याख्यातं न च वार्त्तिके युगपदुभयसंज्ञासमावेशाद् विरोध इति वाच्यम् । भाषान्युत्पादकचन्द्रगोमिविरोधेन वार्त्तिकस्य छन्दोविषयत्वकल्पनात् । तेन वार्त्तिकस्योभयसंज्ञासमावेशेन यद् यत्पदं न भवतीत्युच्यते तत्तदेव पदं भाषायां चन्द्रगोमिमतानुसारेण पाणिनिमतेऽपि भवत्येव । तस्मादस्माभिरपि चन्द्रगोमिमतानुसरणमेव रमणीयमिति भाव्यम्". The Candra school of Grammar is however distinctly referred to by Maitreya in his Dhātupradīpa as shewn in my Dhātukoṣa and the founder must have flourished within the first three centuries of the Christian era. Vopadeva seems to assign him an earlier age "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः, but it does not appear he was acquainted with his system as he takes no notice of it in his elaborate Grammatical discussion in the Kāvyakāmadhenu.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(i) KUMĀRILA BHATTA.

Bhaṭṭa in v. 2. apparently refers to Kumārila Svāmi, the great philosopher of of the Jaimini school. A succint account of him will be found in Colebrooke's essays vol. I. pp. 322-3.

(j) JINENDRABUDDHI

Under v. 3. 8. Svāmi explains that Panjikā is Nyāsa. This is the name by which Jinendrabuddhi's Kāshikāvivaraṇa is referred to by the Grammarians of the Pāṇinian school such as Maitreya, Mādhava, Bhaṭṭoji, and others. But the work is utterly unknown in this part of India and Tārānātha Tarkavācaspati writes in the preface to his Siddhānta Kaumudī that it is another name of Padamanjarī, which is a work of Haradatta Mishra. I have shewn in my Dhātukoṣa that Jinendrabuddhi is quoted by name by Trilocana Dāsa and was also known to the Ṭīkākāra Durga of the Kātantra school and there can be no possible doubt that he is more than 1200 years old. He seems to have been a real Jinendra, as Mādhava refers to him by various synonyms of Buddha. The Nyāsa is therefore not only a very old but a very authoritative and useful commentary, and I shall be glad if some competent scholar undertakes its early publication.

The following extracts from the Deccan College Library Ms. no. 34 kindly lent me by Professor Bhandarkar may interest my readers : "नमो गोस्वामिने। जयन्ति ते सदा सन्तः सर्वोपायैरुपार्जितं। गुणानां सुमहद्वृन्दं दोषाणां च विनाशनं॥ अन्यतः सारमादाय कृतैषा काशिका यथा। वृत्तिस्तस्या यथाशक्ति क्रियते पञ्जिका तथा॥······तत्र वृत्तिः पाणिनिप्रणीतानां सूत्राणां विवरणं चुल्लिभट्टिनल्लूरादिविरचितं भाष्यं कातञ्जलिप्रणीतानां वाक्यानां पतञ्जलिप्रणीतं······धातवो भुवादयः नामानि प्रातिपदिकानि तेषां पारं पर्यन्तं निष्ठामयन्ते गच्छन्ति याभ्यां शास्त्राभ्यां ते धातुनामपारायणे पारायणशब्दः प्रत्येकमभिसम्बध्यते धातुपारायणं नामपारायणं चेति······अथवा तन्त्रं सिद्धान्तं तन्त्रं प्रधाने सिद्धान्त इत्यमरः······इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिविरचितायां काशिकाविवरणपञ्जिकायां पञ्चमाध्यायस्य तुर्यपादः समाप्तः।" It will be seen this Ms. writes पञ्चिका, but the number and weight of our authorities are decidely in favour of the common spelling पञ्जिका.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

सटीकं

अमरसिंहविरचितं

नामलिङ्गानुशासनम्

श्रीगणेशाय नमः ❀। दिश्याच्छिवानि शिवयोस्तिलकायमानगोरोचनारुचिललाटविलोचनं नः। अन्योन्यगाढपरिरम्भनिपीडनेन पिण्डीभवन् बहिरिव स्फुटितोऽनुरागः ॥ १ ॥ अद्याप्यभिन्नमुद्रो योऽर्थार्थिभिरमरकोष एष बुधाः। उद्घाट्यते यथेच्छं गृह्णीध्वं नामरत्नानि ॥ २ ॥ प्रकृतिप्रत्ययवाक्यैर्व्यस्तसमस्तैर्निरुक्तनिगदाभ्याम्। इति सप्ताष्टैः पथिभिर्नाम्नां पारायणं कुर्मः ॥ ३ ॥ भग्ना अभिधानकृतो विवरीताश्च यत्र विभ्रान्ताः। नामानि तानि भंक्तुं गहनमहो अध्यवसिताः स्मः ॥ ४ ॥ सहजो यः समुल्लासः क्षीराब्धेः सोऽपि मंस्यते। चान्द्र इत्यत्र किं कुर्मो गतानुगतिकं जगत् ॥ ५ ॥ वस्त्वेव तन्न हि भवेत् क्रियतेऽन्यथा यत् कश्छादयेद् दिनमणिं करसम्पुटेन। सारेतरान्तरविचारचणान् प्रतीर्ष्यंस्ते नाहमेव वत दुर्जनचक्रवर्ती ॥ ६ ॥ (किन्तु) यदतिकृपणवृत्त्या बिभ्यतो वा परस्मादरचनममहार्थं नीरसं दूरसं वा। वरिवसितुमुदारान् ढौकयामोऽतिभक्त्या तदपि भषकवृत्त्या दूष्यते किं विदध्मः ॥ ७ ॥ जाता विश्वसृजः क्रमेण मुनिभिः संस्कारमापादिताः शब्दाः संवसनादसाधुभिरपभ्रष्टाः स्थ भो भ्रातरः। वाग्देव्याऽद्य कृता मदेकशरणा माता यतोऽस्मान्मया न्याय्ये वर्त्मनि वर्तनाय भवतां षड्वृत्तयः कल्पिताः ॥ ८ ॥

❀ "सिद्धिः श्रीगणेशभारतीभ्यां नमः। शारदायै नमो नित्यं नमः सहजयोगिने। देवतागुरवे तस्मै सर्वदैव नमो नमः ॥" इत्यधिकं खपुस्तके।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमः शिवाय (ग. गणेशाय नमः)। अध्यास्ते यः सर्वां ध्रुव ईदृश इत्यगोचरो वचसः। अहमिति संविद्विषयः पुरुषः (स, ग) परं पुरातनो (ऽति, घ) जयति ॥१॥ हेतुर्महतः सूक्ष्मा सत्यपि जगदुपरि गौरवं यस्याः। श्रुतिपथनवप्रतिभाशक्तिः सा किल करोतु मे कुशलम् ॥२॥ श्रीवत्सलाञ्छनपदद्वयपद्मभृङ्गाद्गङ्गापयोऽन्वहविगाहनहीनपङ्कात्। मायाप्रतिग्रहनिवर्तनसत्प्रतिज्ञाद्गोविन्दनामजनकाज्जनकानुकारात् ॥३॥ भर्तृव्रतागणशिरोमणितां गतायाः सीमन्तिनीगणशतैरपि नन्दितायाः। दानव्रतौघविधिसाधितकीर्तिसीम्नो मातुश्च शीलधृतनीलछखायिदेव्याः ॥४॥ योभूद्यस्य च योषिदद्भुतगुणा भूयो रमानिर्वृता धत्ते यः कविचक्रवर्तिपदमप्याचार्यवर्यश्च यः। राढायामपि गाढनिर्मलकुलछत्रं कुलीनाग्रणीर्यः प्रापत् प्रणतः परं हरिपदद्वन्द्वारविन्दे च यः ॥५॥ ज्योतिष्मन्मणिपुञ्जरञ्जनरुचिं हारं ज्वलत्कुण्डले रत्नौघच्छुरिता दशाङ्गुलिजुषः शोचिष्मतीरूर्मिकाः। यः प्राप्य द्विरदोपविष्टकनकस्नानैरविन्दत् परं छत्रे तैस्तुरगैश्च रायमुकुटाभिख्यामभिख्यावतीम् ॥६॥ यत्पुत्रा नृपमन्त्रिमूलमणयो विश्वासरामादयः ख्याता दिग्जयिनामपीह जयिनो लोके कवीन्द्राश्च ये। ब्रह्माण्डामरपादपादिसहितं येऽदुस्तुलापूरुषं तत्तद्ग्रन्थविशेषनिर्मितकृतः कृत्स्नेषु शास्त्रेषु ते ॥७॥ पुण्यां पण्डितसार्वभौमपदवीं गौडावनीवासवाद् यः प्राप्तः प्रथितो बृहस्पतिरिति क्ष्मालोकवाचस्पतिः। कोषस्यामरनिर्मितस्य विविधव्याख्यानदीक्षागुरुः सानन्दं पदचन्द्रिकां स कुरुते टीकामिमां कीर्तये ॥८॥ इयं षोडशटीकार्थसारमादाय निर्मिता। अतोऽभिलिखितोऽर्थोऽस्मान्न हेयः सहसा बुधैः ॥९॥ अदसीयार्थहरणाद् यो मन्नामापनेष्यति। तमेतत्कृतिनो दुःखशिखी धक्ष्यति सान्वयम् ॥१०॥ अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकं साध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परिसमापयतीति प्रामाणिकमतो निष्प्रत्यूहं प्रारिप्सितपरिसमाप्तिहेतुत्वेष्टदैवतसंकीर्तनाद् विशिष्टादृष्टमुत्पिपादयिषुर्ग्रन्थकारः प्रथमतः पद्यं निबबन्ध यस्य इत्यादि, ग।

व्रजशिशुच्छन्दवयस्यं सततमुपास्यं विरिञ्चादेः। वेदाविदितरहस्यं गिरिशनमस्यं नमस्यामः ॥१॥ अन्योन्याभिमुखात्सलोक्षणयुगं विध्यत् त्रिशूलं रुषा छिन्दन्नन्दकधारया परशुना कौमोदकीं पाटयत्। पायात् पुङ्गवपक्षिपुङ्गवगतं वाणीभवानीस्तुतं कालिन्दीसुरसिन्धुसङ्गतवपुर्मां माधवोमाधवम् ॥२॥ मौनीभूतमुखार्धमादरदरस्तुत्याकुलार्धाननं रज्यत्सार्धविलोचनं भयपरिम्लानास्यसार्धेक्षणम्। लुब्धद्वामकरेण सव्यचरणान्यस्तान्यदोःपल्लवं व्यामुह्यच्छिरसा पदान्तपतने शैवं वपुः पातु वः ॥३॥ निःशेषतन्त्रसारं वारं वारं विचार्य चिन्वानः। अमरकोषटीकाकां विद्यावाचस्पतिर्विदधे ॥४॥ भाषावृत्तिमनुन्यासं रक्षितं भागवृत्तिकाम्। भाष्यं धातुप्रदीपञ्च तट्टीकां वर्णदेशनाम् ॥५॥ उपाध्यायस्य सर्वस्वं सुभूति देव(सोम, ड) नन्दिनम्। कलिङ्गहड्डचन्द्रादीन्संवीक्ष्याधुनिकांस्तथा ॥६॥ जुमरीयं सुपद्मञ्च वोपदेवीयमेव च। कातन्त्रं तस्य टीकाञ्च पञ्जिकां परिशिष्टकम् ॥७॥ सारस्वतं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्विस्तारं वर्धमानस्य तद्धितम् । दुर्गोज्ज्वलाद्युणादिञ्च पुरुषोत्तमदेशनाम् ॥८॥ उत्पलिनी-शब्दार्णवसंसारावर्तनाममालाख्यान् । भागुरिवररुचिशाश्वतवोपालितरन्तिदेवहरकोषान् ॥९॥ अमरहलायुधगोवर्धनरभसपालकृतकोषान् । रुद्रामरदत्ताजयगङ्गाधरधरणिकोषांश्च ॥१०॥ हारा-वल्यभिधानं त्रिकाण्डशेषञ्च रत्नमालाञ्च । अपि विश्वरूपरत्नकोषविक्रमादित्यनामलिङ्गानि ॥११॥ मेदिनीकारकृतकोषं विश्वप्रकाशकोषञ्च । वाभटमाधववाचस्पतिधर्मव्याडितारपालाख्यान् ॥१२॥ कात्यायनचन्द्रगोमिवामनरचितानि लिङ्गशास्त्राणि । भारतपुराणशास्त्राण्यालोच्य श्रीराम-नाथेन ॥१३॥ रचितं तन्त्रमुत्तमं संशयसंहारकं यत्नतः । गृह्णन्तु सूक्ष्ममतयो दूरादुत्सृज्य मात्सर्यम् ॥१४॥ च.

ब्रह्मोपेन्द्रमहेशशक्रवरुणादित्यैड्यपादद्वयां देवद्वेषिपिशाचदानवचमूरुन्मूलयन्तीं पराम् । वन्देऽहं परमेश्वरीं प्रभजतां संसारपीडाहरामुग्रां सूर्यशतप्रभां त्रिनयनां भृत्यार्तिहामम्बिकाम् ॥१॥ यः सर्वानन्दवन्द्यः क्षितितलविदितः सत्कुलो मेलवीजी सूनुस्तस्याथ जज्ञे कृतविविधकुलो माधवो माधवाभः । काशीनाथोऽपि यस्मात् समजनि कुलवांश्चन्द्रवन्द्यस्ततो वै तस्मात् सुख्यातनामा समजनि शिवरामोऽर्थविच्चक्रवर्ती ॥२॥ शिवरामतनूद्भूतविद्यालङ्कारधीमता । क्रियते मन्दबोधाय टीकेयं सारसुन्दरी ॥३॥ टीका यद्यपि भूयस्यो विद्यन्तेऽत्र मनीषिणाम् । तथापि सर्वसारार्थज्ञानाय क्रियतेऽधुना ॥४॥ रायमुकुटटीकादेः कलापादिक्रिया यतः । सुपद्मप्रक्रिया तस्मान्मथुरेशेन तन्यते ॥५॥ धीरान् प्रणम्य बहुशो विनिवेदयामि बद्धाञ्जलिः सकलशास्त्रविचारदक्षान् । किन्त्वत्र नूतनवचः सहसा न दूष्यं यस्मात् प्रबोधविहितो न दुनोति दोषः ॥६, त.

विचार्य शब्दशास्त्राणि नयनानन्दशर्मणा । यत्नादमरकोषस्य कौमुदी परितन्यते ॥, य.

नत्वा गिरिशचरणाम्बुजमाकलय्य तन्त्राणि तन्त्रविदुषां रघुनाथनामा । श्रीकृष्ण-वल्लभमहाशयसन्नियोगात् धीरस्तनोति विमलामरकोषटीकाम् ॥१॥ याचे विधाय विनयं कृतिनोऽहमेतद्दूष्यं मया यदिह शास्त्रविरुद्धमुक्तम् । आलोच्य सम्यगवधानपरैः कृतज्ञै-र्मात्सर्यमत्र कृपया परिहेयमेव ॥२॥, छ.

नत्वेशं कुरुतेऽम्बष्ठगौराङ्गमल्लिकात्मजः । टीकाममरकोषस्य भरतो मुग्धबोधिनीम् ॥१॥ याः पाणिनीयादिभिरत्र टीकाः कृता महद्भिर्बहुभिर्महत्यः । ताभिः प्रहृष्यन्ति न मौग्धबोधास्तेषां नियोगेन ममोद्यमोऽयम् ॥२॥ यथाकथञ्चिद्व्युत्पत्तिः संज्ञाशब्दस्य पण्डितैः । प्रकृतेरवगत्यर्थं कृता तत् सा विधास्यते ॥३॥, थ.

पूर्वग्रामिकुले कलानिधिनिभश्छत्री (Oxford 413 चन्द्री) सुमेरुस्थितो भ्राता तस्य जटाधरो द्विजवरो वाग्मी(बाले, Oxford 413) शूरस्तत्सुतः । तत्पुत्रः प्रथितोऽ-भवत्कविवरो नारायणो नामतस्तेनेयं क्रियते हिताय सुधियां शब्दार्थसन्दीपिका ॥१॥ सन्ति यद्यपि भूयांसः शब्दलक्षणचक्षुषः । तथापि जोमरात्यः स(भ्यस्तः ?) विशेषादेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिष्यते ॥२॥ प्रायो हि मत्सरधियः कवयः पृथिव्यां सन्ति क्वचित्क्वचिदपि प्रियसाधुवादाः। एकं भिया प्रणामिकर्म करोमि नित्यं मध्ये द्वयोरपरमादरवत्तयैव ॥३॥, द.

गुरुं नमामि संस्कृत्य स्वार्थं सूक्तानि सूरिभिः। संक्षिप्य नामलिङ्गानुशासनं विवृणोम्यहम् ॥, ण.

अनादिमध्यान्तमनीशमीशं प्रणम्य तं कञ्चिदमुं गिरीशम्। निरूढिगूढार्थकमूललीनां निरूप्य कुर्मोऽमरकोषमालाम् ॥१॥ उपाया बहवः सन्ति निबन्धाः पाणिनेर्दिशा। तथापि मादृशां यत्नः स्वल्पकानाञ्च तुष्टये ॥२॥ ट.

यत्पादपद्मं प्रणिपत्य धाता भूतानि चक्रे तदहं प्रणम्य। सल्लिङ्गनाम्नोरनुशासनस्य टीकामिमां बालधिये तनोमि ॥, फ.

सान्द्रस्फुरत्सजलनीरदचारुमूर्तेर्भक्त्या मुहुर्मुररिपोः पदपद्मयुग्मम्। नवाभिधान-विवृतिं विदुषामपीष्टां कुर्वे मुदा धरणिदेवकुलोद्भवोऽहम् ॥१॥ श्रीनीलकण्ठकृतिनः परिहीनदोषा तोषाऽनिशं नुतहृदो हृदयैकगम्या। एषा निबन्धशतसारप्रवर्धिता मे हर्षं तनोतु विदुषां कृतिरुत्तमा च ॥२॥ कृतयः सन्ति धीराणामभिधानेऽत्र भूयसाम्। तथापि तत्त्वविज्ञानाद् वि(नि)बन्ध इह तन्यते ॥३॥ नानाशास्त्रविचारचारुरसनान् धीरान् क्षमाशालिनो नत्वा गीष्पतिसन्निभानवनतो बद्धाञ्जलिः संभ्रमात्। अत्रोक्तं विनिवेदयामि वचनं गूढं मदीयं हृदा कामं तत् प्रणिधाय दूष्यमिति तद्वो चित्तदुःख-प्रदम् ॥ ४, ढ.

यशोदागुरुवक्षोजकनकाचलचारिणम्। अपूर्वंजलदं वन्दे नन्दनाङ्के निवेशितम् ॥१॥ वाग्दैवतापरमूर्तेर्लक्ष्मणभूभर्तुरादाय मतम्। श्रीलोकनाथशर्मा तनुते पदमञ्जरीमचि-रात् ॥ २, प.

नत्वा रमेशचरणं श्रीरमेश्वरशर्मणा। रच्यतेऽमरकोषस्य टीका प्रदीपमञ्जरी ॥, ब.

अनादिमध्यनिधनमवाङ्मनसगोचरम्। कारणं कारणानाञ्च तमीश्वरमुपास्महे ॥ ३, भ.

हृदिस्थमपि दूरस्थं सर्वमावृत्य तिष्ठति। यन्महः परमं बीजं तदानन्दपदं नुमः ॥१॥ हरः (रो) शशिभृता समं विविधकेलिमातन्वती मुहुः स्मरमहोत्सवे शिवमुखाब्जचुम्बा-र्थिनी। दिगम्बरकृताम्बरा विधुमवेक्ष्य मोलिस्थितं ह्रिया नतमुखी सदा क्षितिधरेन्द्र-कन्याऽवतु ॥२॥ मङ्गलानन्दबीजानि मुक्तानामतिसन्ततम्। गुरूणां चरणाब्जानि पुनः पुनरुपास्महे ॥३॥ नानाशास्त्रमशेषशास्त्रविदुषां चालोक्य नाना मतं हेरम्बाङ्घ्रिसरोजयुग्म-ममलं नत्वातिभक्त्या सुधीः। श्रीनारायणपादपद्ममधुलिण् नारायणः श्रीनिधिर्यत्नेनामर-पञ्जिकां वितनुते संक्षेपतः सत्कविः ॥ ४, ध.

वल्लवीवल्लभं नत्वा गिरं भट्टोजिदीक्षिताम्। आमरे विदधे व्याख्यां मुनित्रयमता-नुगाम् ॥, ठ, ड.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बर्हिणबर्हापीडः सुषिरपरो बालवल्लवो गोष्ठे। मेदुरमुदिरश्यामलरुचिरव्यादेष गोविन्दः ॥१॥ मुदेऽसौ धीराणां स गुणलववान् स्यान्मम परिश्रमः किञ्चित्सार्थस्तदिह विबुधाः क्षन्तुमुचितम्। अतो ये सासूया अनृजुमतयो नूतनतया खलास्तेऽमी हेया गुणिषु पुनरप्यञ्जलिरयम् ॥२॥ अथ टीकासर्वस्वं दशटीकावित् करोत्यमरकोषे। श्रीमत्सर्वानन्दो वन्दि (न्द्य) घटीयो मातुरार्तिहा पुत्रः ॥३॥ यद्यपि सन्त्यतिगुणिनः श्रमस्तथाप्यत्र मे मौर्ख्यात्। ललितं रौति पिकश्चेत् वाग्यामं यातु किं काकः ॥३॥, म.

शिवं हरिं विधातारं तत्पत्नीस्तत्सुतांश्च वै। नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥१॥ पदवाक्यप्रमाणज्ञक्षीरस्वाम्यादिसूरिभिः। कृतान् ग्रन्थान् समालोच्य बालानां सुखबुद्धये ॥२॥ यत् कृतं सूरिसिंहेन नामलिङ्गानुशासनम्। तत्रस्थायाः पद्यवल्या विवृतिर्वक्ष्यते मया ॥, र.

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

यस्य भगवतः ज्ञानदययोः बोधकरुणयोः सिन्धोः समुद्रस्येव गम्भीरस्यापारस्यागाधस्यान्यैरप्राप्तज्ञानदयावधेः अनघाः निष्पापा गुणाः क्षान्त्यादयोः बो (बौ, कख) धिपक्ष्याः (क्षाः, ख) सप्तत्रिंशत् सोऽक्षयोऽक्षोभ्यो जातो मारजित्त्वात् अनन्तज्ञानसन्तानो वा। भो धीराः योगिनः ध्येयं प्रति धियमीरयतीति कृत्वा श्रिये भोगार्थं अविद्यमानं मृतं मरणं यत्रेत्यमृताय मोक्षार्थश्च सेव्यतामाराध्यताम्। लेशस्पृष्टोऽपि समुद्रोऽस्य विष्णोः क्षयो निवासः। अगाधोऽतलस्पर्शः। रत्नादिमत्त्वात् निर्मलगुणः। लक्ष्म्यर्थं पीयूषार्थं सुरैः सेवितः ॥ १ ॥

हे धीराः स भगवान् सेव्यतामाराध्यतां धैर्यगुणशालिन एव सेवितुं शक्नुवन्तीति तानेव सम्बोधयति प्रकृतत्वाद् युष्माभिर्हितेच्छुभिः स कः यस्य गुणा मैत्रीक्षमादयोऽणिमादयो वा अनघा निष्पापा रागाद्यसम्बलिता इति यावत्। यद्वाऽनघा हृद्या अनघोऽपापहृद्ययोरिति धरणिः। गुणयन्तेऽभ्यस्यन्ते गुणाः, गुण (त्क, घ) चामन्त्रणे, कर्मणि घञ्, किम्भूतस्य ज्ञानदयासिन्धोः समस्तविषयावबोधो ज्ञानं दृष्टं स्वार्थमनपेक्ष्य परदुःखापहरणेच्छा दया तयोरम्बुतुल्ययोः सिन्धुरिव सिन्धुरिति रूपकं प्रापकम्। ताभ्यां सिन्धुरिव सिन्धुरिति वा। प्रकृत्यादित्वात् तृतीयेति योगविभागात् समास इति सर्वधरादयः। सिन्धुशब्दोऽत्र विपुलाधारत्वादुपचरितः। सिन्धुसाम्यमाह अगाधस्यानवच्छिन्नमहिम्नः अन्यैरनधिगतज्ञानपारत्वादनवच्छिन्नगाम्भीर्यस्य वा स किम्भूतः अक्षयः परहितापादनेषु नास्ति क्षयो विरामो यस्येत्यक्षयः मरणादिराहित्याद् वा। फलं विना कथं प्रवृत्तिरत आह फलाधीनैव प्रेक्षावत्प्रवृत्तिरत आह श्रिये चेत्यादि। श्रीरत्र त्रिवर्गसम्पत्तिस्तां प्राप्तुं क्रियार्थोपपदस्येत्यादिना चतुर्थी। तथा व्याडिः लक्ष्मीसरस्वतीधीत्रिवर्गसम्पद्विभूति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शोभाछ। उपकरणवेशरचनाविधाछ च श्रीरीति प्रथितेति, अमृताय मोक्षाय च चकार-द्वयमुभयप्राधान्यद्योतनार्थं भोगेच्छुभिः श्रिये मुमुक्षुभिर्मोक्षायेत्यर्थः। एतेन हिताहितज्ञो हितैषी ईशिता च अतः सेवार्ह इति विशेषणानामभिप्रायः। समुद्रपक्षे। स सिन्धुः समुद्रः सेव्यतां, स कः यस्यागाधस्यातलस्पर्शस्याक्षयस्य सदापरिपूर्णस्य गुणा नैर्मल्यादयोऽनघा हृद्या रत्नाकरत्वादतिशयस्फुटीभूताः। ज्ञानं ज्ञप्तिः दा दानं तयोरीर्लक्ष्मीर्ज्ञानदे गङ्गा तया उपलक्षितस्य स कीदृशः अक्षयः सदापूर्णः अस्य विष्णोः क्षयो निवासो यत्र वा गुणा अनघा रत्नादिसत्वान्नैर्मल्यादयः श्रिये लक्ष्म्यै अमृताय पीयूषाय च सिन्धुरपि सुरासुरै-र्लक्ष्म्यै सुधायै च सेवितः। सेवतिरत्र पक्षे अनुशीलनार्थः यथा स्त्रियं सेवत इति। अत्रानुक्तोऽपि वाक्ये लक्षणार्थो ज्ञानदयाभिः स्फुटं प्रतीयते। न च नेयतादोषः, प्रत्युत प्रसादो नामार्थगुण एवायम्। तदुक्तं सरस्वतीकण्ठाभरणे-यत्तु प्राकट्यमर्थस्य प्रसादः सोभिधीयत इति। यथा अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीत्यादावनुक्तोऽपि सूर्य उदयतिना पद्ममुद्राभञ्जनादिना च लक्ष्यते। यद्यपि काव्यप्रदीपे मुख्यार्थ इति नाम्नो दोषस्यायमुदयति मुद्राभञ्जन इत्युदाहरणमुपन्यस्तं तथापि निरनुरोधमुख्यपदार्थाभावे मुख्यार्थ इति दोष इत्यवधेयम्। इह तु बुद्धादिपदोल्लेखे कृते दक्षिणापथपथिकसार्थाना-मनुपादेयता स्यात्कृष्णादिपदोद्देशे त्वनुपादेयत्वात् तत्कालबलितमदोद्धुराणां बौद्धानामित्यु-भयसाधारण्ये च नोपादेयतार्थं मुख्यानुद्देशोऽयमलङ्कारः। अभिधेयप्रयोजनानभिधाने प्रेक्षाव-दप्रवृत्तौ न दोषाय। अन्ये त्वाहुः क्वचिद् विशेषणमपि विशेष्यप्रतिपत्तिकरम्। यथा "निधानगर्भामिव सागराम्बरा"मितीहापि ज्ञानदयासिन्ध्वादिविशेषणं विशेष्यप्रतिपत्तिकर-मित्यदोषः श्लिष्टरूपकाख्योऽयमलङ्कारः।

हे धीर स अः सेव्यतां·········श्रिये चामृताय चेति भुक्तिमुक्तिहेतव इति भगीरथः।·········भोगेच्छुभिः श्रिये मुमुक्षुभिर्मोक्षायेति सारमञ्जरी।·········न च ज्ञानदा सरस्वती ईर्लक्ष्मीः ज्ञानदा च ईश्च ज्ञानदे ताभ्यां सिन्धुरिवेति व्याख्यानं युक्तं समाहारे-तरेतरयोः क्लीवैकत्वद्वित्वाभ्यां तत्पदानुपपत्तेः।·········समुद्रपक्षे सर्वज्ञानधियं लक्ष्मणां बुद्धिं रान्ति गृह्णन्ति इति धीरा देवाः······बुद्धपक्षे भो धीराः पण्डिताः स बुद्धः सेव्यतां यस्य गुणाः दानशीलमादयः अनघाः अनपायिनः तस्य किम्भूतस्य ज्ञानदयासिन्धोः ज्ञानं अवबोधः स्वार्थनिरपेक्षपरदुःखापहरणेच्छा दया। ताभ्यां सिन्धुरिव सिन्धुः ज्ञानदययोः सिन्धुरिति वा षष्ठीसमासः विपुलाशयत्वादिधर्मेण रूपकं, पुनः किम्भूतस्य अगाधस्य परवादिभिरनधिगतान्तस्य अगे वृक्षे आध आधानं यस्य शाकवृक्षमाश्रित्य तपश्चरणादित्य-मरचन्द्रिका। स किम्भूतः अक्षयः परहितोत्पादने न विद्यते क्षयो विरामो यस्य परमयोगि-त्वेन चिरजीवित्वादक्षय इत्यमरदीपिका।·········ग्रन्थपक्षे······· श्रिये सरस्वत्यै पुस्तक-रचनायेति यावत्।·········ग्रन्थोऽक्षयं परम्परया मोक्षं ददातीति टीकासर्वस्वम्।·····

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गापक्षे हे धीराः पण्डिताः हे अगुणाः पाण्डित्यादिगुणरहिताः भवद्भिर्यस्य यत्नं कृत्वा अगा दुर्गा सेव्यताम् ।......नञोऽत्र कृच्छ्रार्थः पार्वती अगजा अगा इति हड्डचन्द्रः । अगो दुर्गश्च कृच्छ्रगे इति शब्दार्णवः........अघो नीचेऽकिञ्चने स्याद् वराङ्गे च रसातले इत्युत्पलिनी ।.........अघं स्याद्व्यर्थकुत्सयोरिति धरणिः ।... .. अनघोऽपापहृद्ययोरिति विश्वः ।.........अक्षयः क्षयरहितः उः शम्भुः यस्याः सेवने शिवोऽपि अच्युतत्वं प्राप्तवान् इत्यर्थः । उकारान्तङ्गीप्रकृतेः ङलोपो बाहुल्यात् इति काशिकामतं..... अथवा हे अक्षयो उदासीनाः अमृताय अमृतार्थं देववत्वाय वा अगा सेव्यतां अर्थात्तया विना न विद्यते क्षिर्निवासो येषां तेऽनन्यगतिका इत्यर्थः । क्षिर्गृहे क्षये चेति बृहद्धारावली ...आः खेदे रोषणेऽपीति वैजयन्ती ।.........तथा न लिङ्गवचने भिन्ने न हीनाधिकतापि वा । उपमा-दूषणायालं यत्रोद्वेगो न धीमतामिति दण्डिवचने शब्दस्य विभक्त्युपलक्षणात् । यथा वटोरिव गृहं गृहं प्रतिदिनं यस्यां शिवो याचते इति काव्यदर्शने कविकङ्कणः । यस्यां काश्यामिति ।.........सिन्धोर्विष्णोरगा महामायेति वा.........कीदृशी अक्षया नाशरहिता नित्येति यावत् ईश्वरशक्तिर्नित्येति वा सा नित्याप्यभिधीयते इति मार्कण्डेय-पुराणात् ।.........उ सम्बोधने रोषवादे शिववाक्ये त्वनव्ययमिति उ सम्बोधने ऊनपि च रोषणे शब्दभेदके इत्यजयः । सिन्धुः समुद्रे विष्णौ च सूर्ये नद्यां महानदे इति वैजयन्ती ॥, त.

अथवा हे धीर स आः शङ्करः सेव्यतां आः स्यात् शङ्करवेधसोरिति रत्नकोषः । यस्य गुणा अणिमादयोऽनघा अनपायिनः कीदृशस्य ज्ञानदयासिन्धोः जानातीति ज्ञो बुधनामाग्रहः नाम्युपधादिति कः तस्य अनः पिता चन्द्रः अनः शकटतातयोरिति नान्ते रुद्रः । तद्विषये दया स्नेहः शिखरीकृतरूपः तेन हेतुना सिन्धुरिव क्षीरोदोऽपि चन्द्रार्थे दयया गगनस्पृशद्भिरिव हस्तैरालिङ्ग्य कदाचिदुरसि कदापि मूर्ध्नि समारोपयतीति अतस्तत्सा-दृश्यं कीदृशस्य अगाधस्य आदधात्याधः उपसर्गे त्वातो डः अगस्य हिमालयस्याधः आधापकः तस्य खण्डप्रलये सर्वपर्वतभङ्गेऽपि महेशेन रक्षितत्त्वात् । यद्वा अगे पर्वते आधानं यस्य गिरीशत्वात् यद्वा अगाधस्य अन्यैरनधिगतान्ततत्त्वस्य कीदृशः अक्षयः अस्य विष्णोः क्षयो वसतिः स्थानं हरिहरात्मकत्वात् यद्वा अक्षाणि इन्द्रियाणि यातीति कः सर्वगतत्वात् आतोऽनुपसर्गात् कः श्रिये सम्पत्त्यै बाणदशाननादीनां भुवनाधिपत्यदर्शनात् अमृतायामरणाय तत्सेवया अजरामरत्वदर्शनात् ॥, ज.

यदासौ कविरमरसिंहो ग्रन्थमेतं चकार तदानीमनादृतवेदपथानां मदोद्धुराणामति-प्राबल्यमासीत् । अतएव कृष्णादिपदोल्लेखे तेषामनुपादेयता स्यात् बुद्धादिपदोल्लेखे तु दक्षिणापथप्रवृत्तानामनुपादेयता स्यादित्युभयेषां तत्रोपादेयतार्थमस्य मङ्गलश्लोकस्य तादृशी गूढार्थता ॥, न.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

इति ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुसृत्य श्रोतृप्रोत्साहनार्थं स्वप्रवृत्तिप्रयोजनं साभिधेयमादिवाक्येनाह । समाहृत्य संघात्यान्यतन्त्राण्यभिधानशास्त्राणि लिङ्गानुशासनानि च संक्षिप्तैर्लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षैः सम्पूर्णं लक्ष्यलक्षणाभ्यां संगृह्य पूरितं वा दान्तशान्तपूर्णेति (७. २. २७.) णयन्तस्य निपातनात् । वर्गैः सजातीयसमूहैः सुखग्रहणार्थं वर्ज्यन्ते विजातीया अस्मिन्निति असारवर्जनाद् वा । नाम्नामभिधानानां लिङ्गानाञ्च स्त्रीपुन्नपुंसकानामनुशासनं व्युत्पादकं शास्त्रमुच्यते ॥ २ ॥

अभिधेयप्रयोजनानभिधाने प्रेक्षावदप्रवृत्तेः सम्प्रति स्वप्रवृत्तिप्रयोजनं शास्त्रप्रयोजनञ्च साभिधेयमाह समाहृत्येत्यादि । मया नामलिङ्गानुशासनं शास्त्रमुच्यते । नाम प्रह्वत्वे शब्दे चेत्यनुसारान्नम्यतेऽभिधीयतेऽर्थोऽनेनेति नाम यद्वा म्नायतेऽभ्यस्यते इदमिति नाम स्वर्गादिशब्दः म्ना अभ्यासे सर्वधातुभ्यो मनिन् पृषोदरादित्वात् प्रकृतिमलोपः । लिङ्ग्यते ङीप्टाबादिभिर्व्यज्यत इदमिति लिङ्गं स्त्रीपुंनपुंसकादिनामलिङ्गे अनुशिष्येते व्युत्पाद्येते अनेनेत्यत्रेति वा नामलिङ्गानुशासनमिदं शास्त्रं करणाधिकरणयोश्चेति ल्युट् । किं कृत्वाऽन्येषां व्याडिवररुचिकात्यायनादीनां नामानुशासनानि लिङ्गानुशासनानि च तन्त्राणि समाहृत्य एकीकृत्य एतेन स्वकपोलकल्पितत्वनिरासः, बहुवचनेन तन्त्राणां भूयस्त्वमभिप्रेतम्, अतएव सर्वोत्कर्षात् सम्पूर्णमिदं गुणैः सम्पूर्णमिति यावद्यथा सम्पूर्णेयं काव्यस्येति यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि व्याडिवररुच्यादिप्रणीतानि लिङ्गमात्रतन्त्राणि यद्वा वर्गैः सम्पूर्णं पूर्वव्याख्याने तु वर्गैरित्युपलक्षणे तृतीया वर्गैर्लक्षितमित्यर्थः । वर्गः प्रकरणं, प्रकरणतश्च सुखग्राह्यं भवति । ननु तर्हि कात्यायनादय एव सन्तु किमनेनेति वर्गविशेषणमाह संक्षिप्तैः प्रतिसंस्कृतैरिति स्तोकेन भूयसोऽभिधानं संक्षेपः, सूक्तिरचना प्रतिसंस्कारः यथा हरिप्रियादिवत् प्रतिसंस्कारः । अयमर्थः हरिरिति विष्णोर्नाम नोक्तं लक्ष्मीपर्याये तु हरिप्रियेत्युक्तं तेन हरिरप्यस्य नामेत्युक्तं भवति । पूर्वटीकाकृतस्तु संक्षेपोऽसारत्यागः प्रतिसंस्कारः सतो गुणान्तराधानमित्याहुः, क्षीरस्वामी तु संक्षिप्तैर्लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं परिपाटिस्थापनादिना कृतोत्कर्षै (कृतकार्यैं, ग) रित्याह । एतदभिधायकं शास्त्रं नामलिङ्गेऽभिधेये ताभ्यां सहास्य शास्त्रस्य वाच्यवाचकलक्षणसम्बन्धः प्रयोजनन्तु नामलिङ्गानुशासनपदोपेतं सदसद्विवेकनैपुण्यं प्रतिनाम लिङ्गाभिधानग्रन्थगौरवमपाकुर्वन् लिङ्गज्ञानोपायमाह प्रायश इत्यादि ॥

सूक्तिरचना प्रतिसंस्कार इति सर्वस्वम् । प्रतिशब्दः पुनरर्थे पुनःसंस्कृतैः अव्यक्तशुद्धपदनिबन्धनैरिति साञ्जः ।......तथा च उत्पलिन्याद्यसंक्षिप्तं नामकारिकादि लिङ्गहीनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लिङ्गकारिकादि नामहीनं अमरमालाद्यसम्पूर्णं वोपालितादि वर्गशून्यमिति विशेषणानां साफल्यं सर्वोत्कृष्टत्वञ्च, ज.

अन्येषां पारायणादीनां···· मुख्यो लाक्षणिको गौणः शब्दः स्यादौपचारिकः। यौगिको योगरूढिश्च शब्दः षोढा निगद्यते, न.

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्रीपुन्नपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्॥ ३

अथ श्लोकत्रयेण परिभाषां शास्त्रव्यवस्थापनार्थमाह। प्रायशो बाहुल्येन क्वापि चेत्यर्थः। रूपस्येबन्तादेर्विभक्त्यलुगादेरमृभावादेश्चाकारस्य भेदेन विशेषेण स्त्रीपुन्नपुंसकलिङ्गानीह ज्ञेयानि। यथा लक्ष्मीः पद्मालया पद्मा पिनाकोऽजगवं धनुः। तथा कुत्रचित् साहचर्यात् यथाऽश्वयुगश्विनी, ब्रह्मात्मभूः सुरज्येष्ठः, वियद्विष्णुपदम्। अत्राश्वयुग्ब्रह्मवियन्ति साहचर्यात् स्त्रीपुन्नपुंसकलिङ्गानि। क्वचिल्लिङ्गविशेषविधानात् यथा द्योदिवौ द्वे स्त्रियाम्, दुन्दुभिः पुमान्, क्लीवे त्रिविष्टपम्॥ ३

प्रायशो बाहुल्येन रूपभेदो यथाक्रमं स्त्रीपुंनपुंसकानां ङाप्विसर्गबिन्दुकृतस्तेन स्त्रीनपुंसकं ज्ञेयं यथा कौमोदकी गदा, खड्गो नन्दकः, कमलं जलम्। यथा लक्ष्मीः पद्मालया पद्मा, पिनाकोजगवं धनुः। स चायं क्वचिद्विशेषणपद-सर्वनामपदस्थोऽपि निर्णायकः। आद्यो यथा कपोलौ तत्परो हनुरिति अत्र तत्पर इति विशेषणात् हनोः पुंस्त्वं प्रतीयते। द्वितीयो यथा कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपं पुमान् इत्यत्र सा इत्यस्योक्तेः कुत्वाः स्त्रीत्वम्। प्रायशः इति किं सुधर्मा रूपभेदात् स्त्रीपुंलिङ्गो माभूत स्त्रीलिङ्गो एव यथा स्यात्। निश्चितलिङ्गेनाविप्रकर्षः साहचर्यं यत्र रूपभेदो नास्ति तत्रानेनापि तत्कुत्रचिज्ज्ञेयम्। यथा अश्वयुगश्विनी, भानुः करो, वियद्विष्णुपदं तत्राश्वयुग्भानुवियन्ति साहचर्यात् स्त्रीपुंनपुंसकानि अन्यथा धेनुप्रभृतीनां स्त्रीत्वदर्शनात् स्त्रीत्वमपि भानोः शङ्केत। प्रायश इति साहचर्येनापि सम्बध्यते मध्ये चकारात्तेनावटुर्घाटाकृकाटिका इत्यात्रावटोः स्त्रीत्वं न स्यात तद्विशेषविधेस्तस्य स्त्रीपुंनपुंसकस्य विशेषोपादानादपि क्वचित् ज्ञानं यत्र रूपभेदसाहचर्येण स्तः। यथा द्योदिवौ द्वे स्त्रियौ नेमिः स्त्री स्यात् प्रधिः पुमान्, रोचिः शोचिरुभे क्लीव इति। बह्वल्पार्थादिना शस्। द्वन्द्वैकशेषयो रूपभेदकृतलिङ्गनिर्णयाभावात् लिङ्गज्ञानोपायं सङ्करदोषपरीहारञ्चाह भेदेति॥ ३॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते॥ ४

अत्रामरकोषे भिन्नलिङ्गानां प्रातिपद्येनानुक्तानां भेदमाख्यातुं द्वन्द्वो न कृतः। परवल्लिङ्गं हि स्यात् नावयवलिङ्गं, यथा कुलिशं भिदुरं पविः न तु कुलिशभिदुरपवय इति। तथैकशेषो न कृतः शिष्यमाणलिङ्गस्यैव प्रतीतेः यथा नभः खं श्रावणो नभाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न तु खश्रावणौ नभसी इति। तथा सङ्करो व्यामिश्रतापि न कृता साहचर्यात् तल्लिङ्गत्वं हि स्यात् यथा स्तवः स्तोत्रं स्तुतिर्नुतिः, नतु स्तुतिः स्तोत्रं स्तवो नुतिरिति। क्रमादृते एतद् यत्र संग्रहश्लोकादौ क्रममात्रं विवक्षितं तत्रानुक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव यथा वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः। नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः॥ इत्यत्र द्वन्द्वसङ्करौ आत्रादावेकशेषश्च कृतः। उपाध्यायश्च क्रमादृते इत्यन्तर्गडु मन्वानः क्रमेणादृते परिपाट्योपादेये ग्रन्थ इति व्यददरत्। गौडोऽपीत्थमबुध्वा यथात्रायं सङ्करः क्रमादृतेऽनुक्रमं विना भिन्नलिङ्गानां न कृतः अभिधानानुक्रमेणैवाभिधातुं तु कृत एव, यथा कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः, प्रमथाः स्युः पारिषदा इति। मालाकारो हि स्त्रीलिङ्गादीन् प्रकरणैर्निरदिक्षत्। श्रीभोजस्त्वन्यथा व्याख्यत् यथैते द्वन्द्वैकशेषसङ्कराः क्रमादृते पर्यायनिर्देशं विना भिन्नलिङ्गा यद्युक्ता न स्युस्तदा न कृताः, पर्यायनिर्देशं विनाऽनुक्तानां कृता एव, यथा विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः, तथा पुत्रौ पुत्रश्चदुहिता च, तथा नानार्थे संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचनेति॥ ४॥

अत्रामरकोषे भिन्नलिङ्गानां लिङ्गभेदमाख्यातुं द्वन्द्व एकशेषश्च न कृतः। द्वन्द्वो यथा देवतादैवतामरा इति न कृतम्। एकशेषो यथा खं नभः श्रावणो नभा इत्यत्र खश्रावणौ तु नभसी इति न कृतं, एकलिङ्गानां तु तौ कृतावेव। यथा स्वर्गनाकत्रिदिवत्रिदशालयाः, अजा विष्णुहरच्छागा इति ननु भिन्नलिङ्गानामपि तौ कृतौ। यथाऽप्सरोयक्षरक्षोगन्धर्वकिन्नरा इति, मातापितरौ पितरावित्यत आहानुक्तानामिति स्थानान्तरेऽनिर्दिष्टानां तु कृतावेव, इह तु स्थानान्तरनिर्देशो यथास्त्रियां बहुष्वप्सरसः, नैऋतो यातुरक्षसी, जनयित्री प्रसूर्माता, तातस्तुजनकः पितेति। ननु रत्नकोषादिवत् स्त्रीपुंनपुंसककाण्डविधानेनैव कथनमुचितं, तथा सति रूपभेदसाहचर्यादिप्रतिपत्तिगौरवमपि न स्यात्, तत्र किमिति सङ्करः क्रियत इत्यत आह क्रमादृते इति क्रमं विना सङ्करो न कृतः, क्रमानुरोधात्तु कृत इति तात्पर्यं, सङ्करस्तु भिन्नलिङ्गानां मिश्रत्वरूपः क्रमः प्रक्रमः प्रस्ताव इति यथा स्वर्गप्रक्रमे द्योदिवौ भिन्नलिङ्गेऽप्यवश्यवाच्यत्वात् कथ्येते, विष्णुप्रस्तावे च लक्ष्मीनामेति। इह तु क्षीरस्वामिकृतव्याख्याविशेषो ग्रन्थगौरवभयान्नलिखितः। विशेषविधावपि लाघवार्थं परिभाषामाह॥ ४॥

ननु एकशेषस्य द्वन्द्वस्थानीयत्वात् कथं पृथगुपादानं अत्र सभूतिः गोवृषन्यायादित्याह अर्थानामित्यत्रार्थोऽर्थो येषामिति बहुव्रीहावप्येकशेषः कुलचन्द्रेनोक्त इति भेदेनोक्तिरिति केचित्॥, च.

चिन्तामणिकारेणाप्यनयोर्भेदमङ्गीकृत्य द्वन्द्वसमासविचारे द्वन्द्वापवादार्थमेकशेष इति लिखितम्॥, न.

Funding by IKS-MoE

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च (तु, ङः) द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥ ५

यत्र लिङ्गत्रयसमाहारस्तत्र त्रिष्विति पदं प्रयोज्यमिति परिभाष्यते, यथा त्रिषु स्फुलिङ्गोऽग्निकणः । तथा मिथुने स्त्रीपुंसलिङ्गे द्वयोरिति पदं ज्ञेयं, यथा वह्नेर्द्वयोर्ज्वालकीलौ । तथा निषिद्धं लिङ्गं यत्र तच्छेषार्थं निषिद्धलिङ्गादवशिष्टं लिङ्गं ज्ञेयं, विशेषनिषेधे शेषाभ्यनुज्ञानात् । यथा व्योमयानं विमानोऽस्त्रीति । स्त्रीलिङ्गे निषिद्धे विमानस्य पुन्नपुंसकविधिः । तथा तुशब्दोऽन्ते यस्य तत् त्वन्तम्, अथशब्द आदिर्यस्य तदथादि च पूर्वं न भजते अग्रिमेण संबध्यत इत्यर्थः । न्यायसिद्धञ्चैतत् । तुना पूर्वस्माद् विशेषद्योतनात्, अथशब्देन चार्थान्तरारम्भात् । यथा पुलोमजा शचीन्द्राणी नगरी त्वमरावती, तथा नित्यानवरताजस्रमप्यथातिशयो भर इति । भ्रान्तिस्थानविषयञ्चैतत् ॥ ५

त्रिलिङ्ग्यामित्यादि ॥ त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी, तत्र त्रिष्विति पदं ज्ञेयमिति परिभाष्यते, यथा बिम्बोऽस्त्री मण्डलं त्रिष्विति । स्त्रीपुंसौ मिथुनं द्वन्द्वं तत्र द्वयोरिति पदं ज्ञेयं यथा वह्नेर्द्वयोर्ज्वालकीलौ । द्वयोरिति द्विशब्दोपलक्षणं तेन द्विहीनं प्रसवे सर्वं द्वयहीने कुकुन्दर इत्याद्युपपद्यते । तथा निषिद्धं लिङ्गं यस्य तन्निषिद्धलिङ्गं पदं अर्थ्यते गम्यते ज्ञायते शब्देनेत्यर्थः । प्रकृतेर्लिङ्गं तत्शेषार्थं शेषलिङ्गकं ज्ञेयमिति । विशेषनिषेधे शेषाभ्यनुज्ञानात् यथा ह्रादिनी वज्रमस्त्रीति स्त्रीलिङ्गनिषेधे विद्यमानस्य पुंनपुंसकस्य विधिः । तथा तुशब्दोऽन्ते यस्य तत्त्वन्तं अथशब्द आदिर्यस्य तदथादि त्वन्तञ्च अथादि च तयोः समाहारः त्वन्ताथादि नामपदं लिङ्गपदञ्च पूर्वं न भजते परेण सह सम्बन्ध इत्यर्थः तत्र नामपदं यथा पुलोमजा शचीन्द्राणी नगरीत्वमवती, जवोऽथ शीघ्रं त्वरितमिति च । लिङ्गपदं यथा अन्तर्धा व्यवधा पुंसि त्वन्तर्द्धिरपवारणं, शस्तञ्चाथ त्रिषु द्रव्ये इति । अथशब्दोऽत्रोपलक्षणं तेनाथोशब्दोऽपि ग्राह्यः यथाऽनुक्रोशोऽप्यथो हसः । न्यायसिद्धञ्चैतत् तुना पूर्वस्माद्विशेषद्योतनात् अथशब्देन चार्थान्तरारम्भात् । ननु कथं तर्हि पुंस्येवान्धुः प्रहिः कूपः उदपानन्तु पुंसि वा इति । उच्यते । अत्र तुशब्देन नियमितपुंस्त्वमेव व्यवच्छिद्यते नतु नाम, यतः कूपः पुंलिङ्ग एव । उदपानन्तूभयलिङ्गमेवान्यत्र च दर्शनादित्यदोषः । इह त्रैलोक्येऽभिधेयविशिष्टतया सृष्टिप्राथम्येन चादौ स्वर्गवर्गोऽभिधीयते ॥ ५

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीवे त्रिवि(पि)ष्टपम् ॥ ६

स्वर्गे परे च लोके स्वरिति वक्ष्यमाणत्वेऽपीह प्रचुरप्रयोगार्थं स्वःशब्दोपादानं वक्ष्यति भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते । अव्ययमित्यलिङ्गत्वार्थम् । सुष्ठु अज्यते स्वर्गः घञ् । नास्त्यकं दुःखमत्र नाकः, नाविद्यमानविरिञ्चो वा, नभ्राणन-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पादिति (६. ३. ७५.) नञ् प्रकृत्या। तृतीया द्यौर्लोकः त्रिदिवः वृत्तिविषये दिवौकसवद्दिवशब्दोऽप्यस्ति, दीव्यन्त्यत्रेति घञर्थे कविधानात् पूरणार्थाधिक्यश्च वृत्तौ त्रिभागवत्। त्रयाणां ब्रह्मादीनां द्यौरित्येके। त्रिदशालयादयः सुरसदनाद्युपलक्षणम्, एवं यौगिकेषु सर्वत्रोन्नेयम्। द्योशब्दोऽप्योकारान्तोऽस्ति। भाष्ये गोतो णिदित्यत्र (७. १. ९०) ओतो णिदिति न्यासान्तराम्नानात्। दीव्यन्त्यस्यां द्यौः, दिवेः क्विप्। तृतीयं विष्टपं, भूर्भुवः स्वरिति श्रुतेः। त्रिपिष्टपमिति प्राच्याः। प्रायेण ह्येते पवौ शसौ च व्यत्यस्य पठन्ति। गौर्नानार्थे॥ ६॥

स्वरिति अवश्यमेव संज्ञाशब्दानां सदसदर्थेन यथाकथञ्चित् व्युत्पत्तिः कार्या, तैलपायिकादिवत् इति भाष्यं एवमन्यत्राप्युन्नेयम्। स्वृ शब्दोपतापयोः स्वरति शब्दायते, अन्येभ्योऽपि दृश्यते इति क्विगुणो रपरत्वञ्च स्वरादित्वादव्ययत्वम्। अव्ययादाप्सुप (२. ४. ८२) इति सुलोपः, स्वःशब्दस्य रेफान्तत्वादुत्वं न भवति, अतो रोरप्लुतादप्लुत इत्यत्र रुसम्बन्धिनो रेफस्य उत्वविधानात्। स्वर्गे परे च लोके स्वरित्यनेकार्थवर्गोपदिष्टस्यापि यदत्र पर्यायेण कथनं तत् प्रचुरप्रयोगार्थं, तथा चायमेव वक्ष्यति भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते इति। अतएवाव्ययवर्गकथितस्यापि स्वःशब्दस्यात्र कथनं आदावुपादानन्तु स्वःशब्दस्य मङ्गलार्थं महाव्याहृतिशब्दार्थप्रविष्टत्वात् तस्याव्ययमित्यव्यक्तलिङ्गत्वम्। तदुक्तं—सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति। कथं तर्हि रम्यं स्वरिति तद्विशेषणस्य क्लीवत्वम्। तथा च सनातनं स्वरपि येन मनोहरं हसत्पृषल्लोचनया रहितं तयेति। उच्यतेऽत्र लोकाश्रयत्वात् लिङ्गस्येति, तथा च वामनः द्विगुरपि पात्राद्यन्तः क्रियाव्ययविशेषणञ्चैक इति। कौमुदीकारस्त्वाह इह नामलिङ्गानुशासनेऽलिङ्गस्याप्यादौ कथनं मङ्गलार्थं लिङ्गादिकृतविकाराभावमेतद्विशेषणस्य च नपुंसकत्वं सूचयितुं वक्ष्यति क्लीवे क्रियाव्ययानां भेदकानीति। यद्यपि यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोप(नीतं, ङ) नेयञ्च तत् सुखं स्वःपदास्पदमिति श्रुतिः, ब्रह्मज्ञानान्तरत्वादत्रास्य गौणत्वं, तथापि लाक्षणिका अपि मुख्यतुल्यकक्षाः प्रचुरप्रयोगिनः प्राचीनार्यैर्निबध्यन्ते। यदाह शब्दार्णवकारः वक्तृणामस्वतन्त्रत्वात् काव्यादिषु च दर्शनात्। मुख्यवच्च प्रसिद्धत्वात् प्रथमालक्षणाश्रित इति। अथवाऽनेकार्थ एवायमपि शिष्टैरिष्टत्वात्। ऋज्यते स्थीयतेऽस्मिन्निति अर्गः स्थानं ऋज गतिस्थानार्जनेषु, हलश्चेति घञ्चजोः कुः घिण्यतो (७. ३. ५२) रिति गत्वं, शोभनोऽर्गः स्वर्ग इति प्रादिसमासः। कं सुखं न कं अकं दुःखं तन्नास्त्यत्रेति नाकः, (२. २. २४-६.) नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्चेति समासोत्तरपदलोपे नभ्राण्नपादिति प्रकृतिभावः। विद्यमानविरिञ्चिर्वा प्राधान्येन व्यपदेशो भवतीति त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्र त्रिदशा दीव्यन्त्यत्रेति वा त्रिदिवः दिवेर्घञर्थे कविधानमिति कः। यद्यपि घञर्थे कविधाने

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थास्नापाण्यधिहनियुध्यर्थमिति वृत्तौ परिगणनं कृतं तथापि सम्भवोदाहरणमेवैतत् पृषोदरादित्वात् दशशब्दलोप इति सर्वानन्दा(सर्वधरा, ङ)दयः, वयन्तु मूलविभुजादित्वात् कप्रत्ययमेव युक्तं मन्यामहे। तथा च तत्रैव सूत्रे भाषावृत्तौ त्रिदिव इत्युदाहृतम्। क्षीरस्वामी तु तृतीया द्यौर्लोकस्त्रिदिवः वृत्तिविषये दिवौकस इतिवद्दिवशब्दोऽदन्तः, पूरणार्थाधिक्यञ्च त्रिशब्दस्य वृत्तौ त्रिभागवदित्याह। त्रिदशानामालयः त्रिदशालय इति षष्ठीसमासः, त्रिदशालया इति सुरसदनाद्युपलक्षकाः। एवं यौगिकेषु सर्वत्रोन्नेयम्। त्रिदशा दीव्यन्ति क्रीडन्ति शोभन्ते वेति इगुपधत्वात् के त्रिदिव इति तु राजदेवः (ग, घ)। त्रिदशानामालयः गृहं त्रिदालशयः। सुराणां लोको भुवनं सुरलोकः दीव्यन्त्यत्रेति द्यौः, दिवेर्ड्योरिति ड्योप्रत्ययः, टिलोपे गोशब्दवद् रूपम्। सुभूतिस्तु द्यु अभिगमने कर्मण्यौणादिको डोप्रत्यय इत्याह। दोव्यन्त्यस्यामिति द्यौः। बाहुलकाद्दिवेर्डिवि, क्विपि तुह्योरित्यूट् स्यात्। पदान्ते दिव उदिति उत्वे द्युभ्यां द्युभिरित्यादि भवति। द्वे स्त्रियाविति द्विवचनेनैव द्व्यर्थलाभे द्वे इति पुनरुक्तिरवधारणफला, एते स्त्रीलिङ्गे एवेति। नरञ्च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयांबभूव इत्यादिवदुक्तस्यापि द्विशब्दस्य प्रयोग इति वा। अन्यत्र तु विशेषविध्यादिकोऽनियम (त, ङ) इति भावः। तेनाङ्कुशोऽस्त्री सृणिः स्त्रियामिति सृणिप्रभृतीनां पुंस्त्वादिकमप्युपपद्यते। अतएवारक्षमग्नमवमत्य सृणिं शिताग्रमिति माघः। एवं क्लीवे त्रिपिष्टपमिति रूपभेदान्नियमार्थं स्वर्गपर्यायः पुंसीति वक्ष्यति। तत्र विशेषैर्यद्यबाधित इति वर्तते तदर्थमिदमिति वा। एवमन्यदपि तत्र तत्रोह्यम्। त्रिदशानां पिष्टपं त्रिपि(वि)ष्टपमिति पृषोदरादित्वात् दशशब्दलोपः। त्रयाणां पि(वि)ष्टपमिति भूर्भुवःस्वरिति श्रुतेः तृतीयं पिष्टपं त्रिपिष्टपम्। पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते, त्रिभागवदिति तु मधुमाधवी। इह छन्दसा विष्टान् पातीति विष्टपमिति पकारपाठः प्राच्यानां प्रामादिक इत्याहुः। तद्यु(दु, ङ)क्तं नभो विष्टपं वृषो गौर्ना पृश्निश्चापि सुरालय इति रत्नमालादावपि दर्शनादिति कौमुदी। विटपपिष्टपविशिपोलपा (३. १४५) इत्युणादौ कपे विशतेरादेः पत्वं प्रत्ययस्य तुट्षत्वादि कार्यं पिष्टपं भुवनं त्रिपिष्टपं स्वर्ग इति दर्शनात् त्रिपिष्टपं त्रिविष्टपञ्चेति तु वयम्। तथा च पिष्टपो विष्टपोऽप्यस्त्री भुवनञ्च नपुंसकमित्यमरमालोक्तेः। मर्त्यपातालाद्यपेक्षया तृतीयं पिष्टपं भुवनं त्रिपिष्टपमिति राजदेवः। एवं शक्रभवनफलोदयात्ररोहोर्ध्वलोकादयोऽप्यूह्याः। स्वरादिनवनामानि स्वर्गस्य ॥ ६ ॥

यद्यपि यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं। अभिलाषापनीतं यत् तत् सुखं स्वःपदास्पदम्” इति श्रुत्या सुखविशेषे शक्तिरुक्ता तथापीहापि रूढा।······‘उदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः। अन्तःस्थां तं विजानीयात् तदन्यो वर्ग्य उच्यते॥······ उणादितद्धितयोस्तु न नियम इति वक्ष्यते······अधिकं वर्णविवेकधातुचिन्तामणिटीकायां विततं······(सुवस्तु) प्रक्रियाकारस्तु पुंस्काण्डे द्योशब्दमाह······पुंलिङ्गपिष्टपेन समासेऽस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नपुंसकत्वमिति दर्शयितुं च क्लीवमिति सुभूतिः······दिवा नान्तश्च तस्य दिवा दिवानौ इत्यादीति हड्डचन्द्रादयः ॥, च.

वाम्येति (कातन्त्र, २. २. २७) सूत्रे विद्वच्छर्ववर्मा तूपलक्षणव्याख्यानं न मन्यते, तन्मते द्योः द्यवौ द्यवः ॥, य.

दिवेः कनिति हड्डः दिव्नि तिष्ठंश्च शोभते इति प्रयोगश्चेति साञ्जः ॥, ज.

मधुमाधव्यां तु पृषोदरादित्वाद् दशशब्दलोपे त्रिदशानां पिष्टपं त्रिपिष्टपमित्युक्तम्। भगीरथस्तु पिष्टपानां भुवनानां तृतीयं त्रिपिष्टपमित्याह। सर्वेषां मते पवर्गप्रथमादिपिष्टपशब्दः। सुपद्मकारोऽप्युणादौ विषेः पिष्ट चेति सूत्रेण पप्रत्ययः पिष्टादेशश्चेत्याह······,त.

लिङ्गं च शुद्धं मिश्रं च संकीर्णमुपसर्जनमेव च। आविष्टं च तथाऽव्यक्तं लिङ्गं षड्विधमुच्यते ॥ तत्रैकसंस्कारहेतुः शुद्धं यथा खट्वा वृक्षः कुण्डं, संस्कारद्वयोपग्राहि मिश्रं यथा मरिचिः अर्चिः, स्त्रीलिङ्गं संकीर्णं यथा तटो तटा तटं, विशेषणरूपमुपसर्जनं यथा शुक्लो पटः शुक्लं वस्त्रं शुक्ला शाटो, विशेषणत्वेऽपि लिङ्गसंस्कारादजहल्लिङ्गमाविष्टं (यथा दाराः कलत्रं) लिङ्गनिमित्तसंस्कारानर्हम् अव्यक्तं अलिङ्गमित्यर्थः (यथा) पञ्च कति यूयं वयम् ॥, ध.

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७

न म्रियन्तेऽमराः। निष्क्रान्तो जराया निर्जराः। दीव्यन्ति देवाः देवसेवमेषादयः पचादिषु द्रष्टव्या इति इगुपधात् को नास्ति। त्रिर्दश परिमाणमेषां त्रिदशाः, बहुव्रीहौ संख्येये डजबहुग(गु, क)णादिति डच्, त्रयस्त्रिंशद्वै देवाः सोमपा इति श्रुतेः। तिस्रो दशा अवयवोऽवस्था एषामिति गौडः। विबुध्यन्ते विबुधाः। सुरन्ति सुराः, सुर ऐश्वर्ये कः, सुरा एषामस्तीति वा अर्शआदिभ्योऽच्, यतोऽब्धिजा सुरा तैः पीता, सुष्ठु राजन्ते वा। शोभनं पर्व चरितमेषां सुपर्वाणः, सुष्ठु मन्यन्ते सुमनसः असुन्। दिवि ओको निवास एषां दिवौकसः। द्युसमानार्थो दिवशब्दोऽस्ति, पृषोदरादित्वाद् वा सिद्धिः ॥ ७ ॥

अमरा इत्यादि ॥ मरणं मरः मृङ् प्राणत्यागे बहुलवचनाद्भावे ऋ(ॠ)दोरप्, स एषां नास्तीत्यमराः। एतच्च ननो जरमरमित्रमृता इत्यत्र वृत्तौ व्याख्यातं नाकवत् समासोत्तरपदलोपौ। न म्रियन्ते वा अमराः पचाद्यच्। सदायुवत्वाद् निरस्ता जरा यैस्ते निर्जराः, प्रादिभ्यो धातुजस्येति बहुव्रीहिर्वा चोत्तरपदलोपश्चेति। निष्क्रान्ता जराया इति वाऽजादावेकदेशविकृतानन्यत्वाद्वा जरसादेशः, निर्जरौ निर्जरसावित्यादि। ते हि सर्वदा पञ्चविंशतिवर्षदेशीयाः। तथा च रामायणे—श्रियं विन्दति सौमित्रे पञ्चविंशतिवर्षवदिति। दीव्यन्तीति देवाः, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति मेषवत् पचाद्यच्। जन्मसत्ता-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनाशाख्याः तिस्रो दशा एषामिति त्रिदशाः। ननु मनुष्याणामिव बाल्ययौवनवार्द्धकाख्यास्तिस्रो दशाः निर्जरत्वाद्। यद्वा तृतीया यौवनाख्या दशा सदैवैषामिति त्रिदशाः, त्रिपिष्टपवत् त्रिशब्दस्य तृतीयार्थत्वात्। त्रीन् पातान् दशन्ति पचाद्यचि पृषोदरादित्वान्नलोपे त्रिदशा इति राजदेवः। विबुध्यन्ते न स्वपन्तीति विबुधाः, विशिष्टं बुध्यन्त इति वा, इगुपधत्वात्कः। सुरन्ति सुराः, सुर प्राप्त्यैश्वर्ययोः पूर्ववत्कः, ऐश्वर्ययुक्ता इत्यर्थः। क्षीरोदोत्था सुरा एषामस्तीति सुरा इत्यागमः, अर्शाद्यच्। सुरापरिग्रहाद्वा सुराः, तथा च रामायणे—सुरापरिग्रहाद्देवाः सुराख्या इति विश्रुताः। अपरिग्रहणात्तस्या दैतेयाश्चासुरा स्मृताः इति। शोभनममावास्यादिपर्वामीषां शोभनञ्चरितमेषां, शोभनानि पर्वाण्यङ्गुल्यादिग्रन्थयो येषामिति वा सुपर्वाणः, अविरतत्वात् शोभनं पर्वोत्सव एषामिति वा। शोभनं मन एषां सुष्ठु मन्यन्ते वा असुरानिति सुमनसः। त्रिदिवे स्वर्गे ईशते त्रिदिवेशाः, इगुपधत्वात्कः। दिव ओको निवास एषां दिवोकसः। दिवशब्दोऽदन्तोऽप्यस्ति, तेन दिवौकसइति च। तथा च त्रिकाण्डशेषः—मन्दरः सैरिभः शक्रभवनं खं दिवं नभ इति। तथा च बुद्धचरितेन शोभते तेन विना हि नः पुरं मरुत्वता वृत्रवधे यथा दिवमिति। तलन्तस्यैव पृषोदरादित्वात् उत्वाभावे दिवौकस इति चान्द्राः (हड्डचन्द्रः, ग) दिव उदित्यत्र तुशब्दपरविप्रतिषेधादुकारस्य यणादेशे दिवोकस इति मैत्रेयः। अचः परस्मिन्निति स्थानिवत्वेनापि नेकारस्य यणादेशः सकृत्कृतपरिभाषया निरासादिति। गोवर्द्धनस्त्वाहाहलतस्योत्त्वाभावः संज्ञाविषयत्वादिति स्याद्दिवोका दिवौकाश्च देवे वापीह पक्षिणीति रन्तिदेवः। केप्युभयमिति कनिन् युवृषीत्यत्र बहुलवचनात् केवलादपि दिवः कनिनि वृद्धौ दिवौकस इति दिव उदित्यत्र भागवृत्तिः॥ ७॥

सुरायोगत्वात् सुरा इति सर्वानुवादिनी॥, य.

सुराजितह्रियो यूनां तनुमध्यासते स्त्रियः। तनुमध्याः क्षरत्स्वेदसुराजितमुखेन्दव इति यमकाद्यन्त्यः॥, ज.

सुपद्ममकरन्दे विष्णुमिश्रास्तु मरणं मरः न विद्यते मरो यस्येत्याहुः।......

पद्मनाभस्तु दिवन्शब्दस्य समासेन नलोपेन दिवौकसः सान्ता इत्याह, त. ऊर्ध्वलोको दिवं नभ इत्युत्पलमाला, द.

आदितेया दिविषदो लेखा अदितिनन्दनाः।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः॥ ८

अदित्या अपत्यानि आदितेयाः, कृदिकारादक्तिन इति ङयन्तात् स्त्रीभ्यो ढक् (४. १. १२०) इदन्तात्तु दित्यदित्यादित्येति ण्ये (४. १. ८५) आदित्याः। एवं दैत्यदैतेयाः। दिवि सीदन्तीति दिविषदः सत्सूद्विषेति क्विप्, हलदन्तात् सप्तम्याः हृद्युभ्यां चेत्यलुक् (६. ३. ६.) सुषा (प, क)मादित्वाद् षत्वं (८. ३. ६८.),

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पक्षे द्युसदः। लिख्यन्ते चित्रादौ ध्यानार्थं लेखाः। इयूति ऋभवः। ऋशब्दोऽदितिवाची, ततो भवन्तीति गौडः डुप्रकरणे मित मितद्र्वादिभ्य उपसंख्यानात्। नास्ति स्वप्न एषामस्वप्नाः। न म्रियन्ते अमर्त्याः हसिमृग्रीति तन् (उ ३. ८६.), स्वार्थे यत्। अमृतमन्धोऽन्नमेषाममृतान्धसः॥ ८

नञो दाञो डितिरिति शाकटायनः, तेनादितिः कृदिकारादिति ङीषन्तादृदितिशब्दात्स्त्रीभ्यो ढक् आदितेयाः, अङीषन्ताद् दित्यदित्योदित्यपत्युत्तरपदादिति ण्यः स्यात्। दिवि सीदन्ति वर्तन्ते इति सत्सूद्विषेत्यादिना क्विप्, हृद्द्युभ्यां ङेरलुग्वक्तव्य इत्यलुक्, सुषामादिषु चेति षत्वम्। दिविषदो दान्तस्तत्पुरुषे कृति बहुलवचनाल्लुकि तेन मनःसु येन द्युषदांन्यधीयतेति माघः। लिख्यन्ते गण्यन्ते ध्यानार्थं, चित्रादौ लिख्यन्ते वा लेखाः अकर्तरि चेत्यादिना कर्मणि घञ्, ग्रीवाहस्तपादेषु तिस्रो लेखा एषां सन्तीति वा प्रशंसायामर्शाद्यच्। नन्दना इति नन्द्यादित्वाल्ल्युः, अदितेर्नन्दना अदितिनन्दना इति कृद्योगा च षष्ठी समस्यत इति वक्तव्यमिति समासः। अदितेरपत्यानि दित्यदित्येत्यादिना ण्ये आदित्याः। ऋ स्वर्गो माता अदितिर्वा स्वरादिस्तत्र ततो वा भवन्तीति ऋपूर्वाद्भवतेर्मितद्र्वादिभ्य उपसंख्यानमिति डुः। उपपदसमासः क्विपि तु ऋभुशब्दात् ऋभुव इत्यन्ये। अविद्यमानः स्वप्नो निद्रा एषामिति अस्वप्नाः। अमर्त्या इति नञसमासः। न म्रियन्ते इत्यमर्त्या इति वा। हसिमृग्रिण्वाऽमि (गृजिवावमितमि, ङ) दमिलूपूधुर्विभ्यस्तन् इति तन् (३. ८६) मर्तस्ततो नवसूरमर्तयविष्ठेभ्यः स्वार्थे यत्। अमृतमन्धोऽन्नमेषामित्यमृतान्धसः सान्ताः॥ ८॥

द्युषद्दिविषदौ देवे इति श्रीपतिः, ज. (द्युषदपीति, टीका, य.) (लुकि द्युषदपीत्यमरचन्द्रिका, त)।

अन्ये तु ऋशब्दः सुखवचनः तस्माद् भूधातोर्डुरिति, त.

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः।
वृन्दारका दैवतानि पुंसि वा देवता (ताः) स्त्रियाम्॥ ९

बर्हिरग्निर्मुखमेषां बर्हिर्मुखाः। गोरेव निग्रहानुग्रहसमर्था वाणोऽस्त्रमेषां गीर्वाणाः। प्रशस्तं वृन्दमस्त्येषां वृन्दारकाः। शृङ्गवृन्दाभ्यामारकन् (च, क) वक्तव्यः (५. २. १२२. ४.)। देव एव देवता, देवात् तल्, स्वार्थिका प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि। देवतैव दैवतं प्रज्ञादित्वात् स्वार्थे विशेषविधेः पुंस्त्वं रूपभेदात् क्लीवत्वं तच्च प्रचुरप्रयोगम्॥ ९॥

बर्हिरग्निर्मुखं येषां बर्हिर्मुखाः तथा च मनुः—अग्निप्रस्ता (अग्नौ प्रास्ता, घ) हुतिः सम्यगादित्यमुपतिष्ठत इति। क्रतुषु भुञ्जते अन्येभ्योऽपि दृश्यते इति क्विप् क्रतुभुजः। गीरेव निग्रहानुग्रहसमर्थो वाणोऽस्त्रं येषां, गिरं वनन्ते याचन्ते स्तुतिप्रिय-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वादिति वा गीर्वाणाः। दानवा अरय एषामिति दानवानामरयो वा दानवारयः। प्रशस्तं वृन्दं रूपमेषामिति। शृङ्गवृन्दाभ्यामारकन् वृन्दारकाः। देवताशब्दात् स्वार्थे प्रज्ञाद्यण् दैवतानि, विशेषविधेः पुंस्त्वं रूपभेदात् क्लीवत्वं तच्च प्रचुरतरप्रयोगम्। देवशब्दात् स्वार्थे तल्, तलि स्त्रीलिङ्गवचनं कर्तव्यमिति स्त्रीत्वं, रूपभेदादेव स्त्रीत्वे लब्धे स्त्रियामिति बहुवचनान्तपुंलिङ्गशङ्कानिरासार्थम्। पुंसि सर्वत्र जातौ कामचार इति बहुवचनं एवमन्यत्रापि। षड्विंशतिनामानि सामान्येन देवतायाः॥ ६, मुकुट.

मेदिन्यादौ ओष्ठ्यवृन्दारकशब्दपाठतः द्वैरूप्यम्।...अत्र च किञ्चित् परिवृत्य स्वर्गेण स्वर्गभुक्-स्वर्गौकः-सुधाभुक्-अग्निमुखादयो बोध्याः॥, च.

दैवतं पुंस्यप्रयुक्त इति काव्यप्रकाशः, य.

आदित्यविश्ववसवस्तुषिताभास्वराऽनिलाः।
म (मा) हाराजिकसाध्याश्च रुद्राश्च गणदेवताः॥ १०॥

एते द्वादशत्वादिना संघेन युक्ता गणदेवताः। सङ्घचारिणो बहुवचनान्ता वा। एकत्वं तु समुदायेष्वपि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते इति द्वादश आदित्याः। त्रयोदश विश्वेदेवाः, श्राद्धाग्रे विशन्तीति। अष्टौ वसवः, वसन्तीति। षट्त्रिंशत् तुषिताः तुष्यन्तीति। चतुःषष्टिराभास्वराः, अभासन्त इति स्थेशभासेति वरच्। एकोनपञ्चाशदनिलाः। षट्त्रिंशद् द्वे शते महाराजिकाः, महाराजशब्दोऽस्त्येषामिति। साऽस्यदेवतेति माहाराजिका इत्येके, महाराजप्रोष्ठपदाट्ठञ् (४. २ ३५.)। द्वादश साध्याः साध्यन्त आराध्यन्त इति। एकादश रुद्राः। तुषिताद्या बौद्धपातञ्जल-पुराणादौ दृष्टाः॥ १०॥

आदित्येत्यादि। आदित्यविश्वादयः प्रत्येकं गणदेवताः सङ्घ (संपत्य, ङ)-चारिणो देवताः। आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः। वसवश्चाष्ट संख्याताः षट्त्रिंशत्तुषिता मताः। आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः। महाराजिकनामानो द्वे शते विंशतिस्तथा। साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः। अमीषामेकत्वमपि समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायाददितेरपत्यार्थे दित्यदित्यादिना ण्यः आदित्यः। विश प्रवेशने अशूप्रुषिलटिक-णिखटिविशिभ्यः (१. १५१) क्वनि, विश्वशब्दः सर्वेषां विश्वदेवानां नामेतिकृत्वा सर्वनामसंज्ञः यथा पूर्वजवृत्तिः पूर्वशब्दः। अतएव विश्वेदेवा इत्यादिप्रयोगः। देवसन्निहितस्य चास्य प्रायः प्रयोगो जगत्पर्यायशङ्कानिरासार्थः। ननु विश्वे (श्व, ग) देवा इति मिलितमेव दृश्यते, तत् कथमिहादित्यविश्ववसव इति नैवमन्यत्राप्येवंदर्शनात्। तथा च आदित्याः पितरो विश्वे साध्याश्च वसवोऽपि च। भृगवोऽङ्गिरसश्चेति स्वर्लोकस्य परिच्छदा (द, ङ) इति शब्दार्णवः। यत्तु विद्याशीलोऽसिविधौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिविभुजिभ्यां (४. २३७) विश्वे इति पठित्वा विश्वे इति सप्तम्या अलुकि दीव्यतेरसि विश्वेदेवा इति सान्तमुदाजहार स तस्य विपर्यस्तदृशोर्दोषेण हर्षामर्षं, तत्रैव पारायण-परायणैर्गोवर्धनदामोदरपुरुषोत्तमादिभिर्विदिभुजिभ्यां विश्वे (उ. ४. २३७) इति वृत्तिं पठित्वा विश्वं वेत्ति विश्ववेदा विश्वेभोजा इति अशू प्रुषीति किन्विधौ विश्वं जगत् विश्वेदेवा इत्युदाहृतत्वादिति। वस निवासे शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिम-निभ्यश्चेत्युः (उ. १. ११) वसुः। तुष तुष्टौ रुचिकुसि (ङ रुटि, घ. कटि, ग)-रुषिभ्यः (४. १८५.) कितजिति बाहुलकात् कितच्, तोषणं तुट् तारकादित्वादितच्वा। आ समन्तात् भासनशीला आभास्वराः, भासृ दीप्तौ, स्थेशभासेत्वादिना वरच्। अन्यते प्राण्यतेऽनेनेत्यनिलः, अन च अस्माद्धातोः सलिकल्यनिमहिमडिभण्डिशण्डिपिण्डि-तुण्डिकुकिभूभ्य (१. ५५.) इलजितीलच्। एषामेव बहुतरत्वान्महती राजिः पङ्क्तिः महाराजशब्दो वा वाचकत्वेनास्त्येषामत इनिठनाविति ठन्, महती राजिरेषामिति संज्ञायां कन्नित्यपरे, बहुव्रीहौ कबित्यन्ये, सास्य देवतेत्यर्थे वा महाराजप्रोष्ठपदात् ठञि संज्ञापूर्वकत्वान्न वृद्धिरित्यपरे। केचित्तु माहाराजिक इत्येकं पेठुः, तन्मते पूर्वेण ठञि वृद्धिरेव। साध्यं सिद्धिरेषामस्ति साध्या अर्शाद्यच्। रोदयन्तीति रुद्राः रुदेर्ण्यन्तात् रादेर्णिलुक्चेति (उ. २. २२) रक् णिलोपश्च। तत्र च द्वादशादित्या-श्चैत्रादिषु तपन्ति ये। विष्णवर्यमविवस्वतोऽंशुमान् पर्जन्य इत्यपि। वरुणेन्द्रधातृ-मित्राः पूषा त्वष्टा भगः परः॥ क्रतुर्दक्षो वसुः सत्यः कालः कामो धृतिः कुरुः (धुरिलोचनौ, च, ज, ड.) पुरूरवा मार्द्रवश्च (माद्रवाश्च, च, ज.) विश्वेदेवा दश स्मृताः॥ ध्रुवो धव (र, ङ) श्च सोमश्च विष्णु (आप, च, ज) श्चैवानिलोऽनलः। प्रत्यूषश्च प्रभा (वा, ज) सश्च (प्रभावश्च, च) अष्टैते वसवः स्मृताः॥ प्राणापाना-वुदानश्च समानो व्यान इत्यपि। चक्षुः श्रोत्रं रसो घ्राणः स्पर्शो बुद्धिर्मनस्तथा। द्वादशैते हि तुषिता देवा स्वारोचिषेऽन्तरे। आत्मा ज्ञानं मनो दान्तः (न्तिः, ग) शान्तिर्ज्ञानं (दीनं, च) समस्तपः। कामः क्रोधो मदो मोहो द्वादशाभास्वरा इमे॥ वायुस्कन्धाः सप्त तेषामेकेकः सप्तसप्तभिः। आमेघा देववाहा (तर्हा, घ) दिरुप-र्युपरि संस्थिताः॥ द्वौ शुक्र (क्रु, ग) ज्योतिरादित्यौ नन्दो हरिस्तपास्तथा। चित्रज्योतिः समुज् (सत्य, ङ) ज्योतिर्ज्योतिष्मान् स्कन्द आवहः॥ ऋतजित् सेना (न, ङ) जिदमित्रावमित्रजित्। भूरिमित्रसुषेणौ चेत्याभानोः प्रवहो गणः॥ ऋतः सत्यो ध्रुवो धर्ता विधर्ता च विधारयः (णः, के)। वरुणश्च तृतीयोऽयमा-चन्द्रादुद्वहो गणः॥ ध्यास्वान्तो (धास्या, ग) (ध्रुवान्तो, ङ) नय उग्रश्च भीमः क्षपश्च साह्वयः। अभियुग्मोऽथ (वा, ङ) भेद्यश्चतुर्थः संवहो गणः। स्युस्तादृगीदृगन्यादृक् प्रतिदृक्मितसम्मिताः (ङ्कतसम्मताः, ङ)। सम्भवश्चेत्याग्रहेभ्यः

Funding by IKS-MoE

पञ्चमो विवहो गणः। ईदृक्षः पुरुषोऽन्यादृक् यमिता समदृक्तथा। द्यामश्च-प्रतिद्द (वृ, ङ) वृश्चेत्यासप्तर्षेः परावहः॥ मरुदिन्द्रः सरभसः सामज्ञो मानुषीविशः। देवीविशो (श्वो, ङ)र्ध्वधर्मा च स्वन्धः सप्तम आध्रुवात्॥ महाराजिकास्तु सत्यसुधन्वमरणा (सवना, ङ) दयो विंशत्यधिकशतद्वयसंख्याता ग्रन्थगौरवभयान्न दर्शिताः। साध्या अपि द्वादशैव मनो मन्त्रश्च प्राणश्च नयोऽपानो हरस्तथा। नारायणो नरश्चैवं हंसश्चित्तिस्तथा विभुः। प्रभुश्च द्वादशैवैते साध्या रुद्राः पुनस्त्विमे। वहनो नैऋतिः सर्पो (र्वो, ङ) मृगव्याधकपालिनौ। अजैकपादहिर्बु (र्ब्र, ङ)घ्नः सेनानीरपराजितः॥ महातेजाः पिनाकी च क्वचिदङ्गारकादयः। रुद्राः धृतिकुरुस्थाने क्वचित् तु घुरिलोचनौ (काशश्च, ङ) क्वचिदन्यादृशास्त्विमे। प्रयोजनवशात्तर्पणादौ पुराणभेदतः। इह अज एकपाद् अहिर्बुघ्नः विश्वेदेवा इत्यादौ द्वे द्वे नामनी विभक्त्यन्ते एव वाचके इति निरुक्तम्। अतएव अहये बु(ब्र)घ्नाय स्वाहा इत्येवं प्रयोक्तव्यमित्युशनाः (उगडः, घ) अत्रापरा अपि गणदेवता भूयस्यः सन्ति, ता अत्यन्ताप्रसिद्धत्वान्न निबद्धाः। पितरस्तु सुप्रसिद्धत्वाद् ग्रन्थकारेण न निबद्धाः, नत्वभावात्। तथा च शब्दार्णवे सत्याज (न, ङ) याश्च पितरो वैकुण्ठा हरयोऽजिताः। मरीचयः सुशर्माणः स्वरूपा अमितौजसः। सुशाखा रोहिताः पाराः स्वभावा (सुतारा, ङ) हारिता (का, ङ) अपि। इत्यादयोऽन्ये बहवो लिखिताः। इह बहुत्वभयान्न लिख्यन्ते, तत्रैवानुसन्धेयाः॥ १०, मुकुट.

ये च 'विश्वेदेवा' इत्युलुक्सप्तमीसमासमाहुः तेऽपि भ्रान्ताः—'साध्या विश्वे च रुद्राश्च' इति पुराणप्रयोगात् 'विश्वेषां देवानामिति शिष्टप्रयोगाच्च, च. विश्वे देवास्त्रयोदश इति भगीरथः। मधुमाधवीसारमञ्जर्योस्तु दशेत्युक्तम्, त.

विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ ११॥

देवा योनिरुत्पत्तिरेषां देवांशा इत्यर्थः। देववददृष्टसंहतेभ्यः परमाणुभ्यः सद्यो जायन्ते वा। नागा अप्येवम्। तथा च द्वितीयमर्द्धं सिद्धगुह्यकभूताहिपिशाचा देवयोनय इति भागुरिः पपाठ। विद्याधराः जीमूतवाहनादयः खड्गगुलिकाञ्जनादिविद्याधारिणश्च। अप्सु सरन्त्यप्सरसो देवयोषितः यक्षाः कुवेरादयः ऋद्धीश्वराः। रक्षांसि मायाविनो लङ्कादिवासिनः। गन्धर्वास्तुम्बुरुप्रभृतयो देवगायनाः। किन्नरा अश्वादिमुखाः शृङ्गारिणः। पिशाचाः पिशिताशास्तामसाः। गुह्यका निधिपाला मणिभद्रादयः गूहन्तीति। सिध्यन्तीति सिद्धाः। प्राप्ताष्टगुणैश्वर्यविश्वावसुप्रभृतयश्च। भवन्तीति भूता बालग्रहादयो हिंस्रा रुद्रानुचरा वा, यतोऽसौ भूतपतिः॥ ११॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्याधर इत्यादि ॥ देवा योनिरुत्पत्तिस्थानं येषां ते देवयोनयः देवांशका इत्यर्थः। क्षीरस्वामी तु देववददृष्टसंहृतेभ्यः परमाणुभ्यः सद्यो जायन्ते नागाश्चैवं, एते च देवयोनिनामान इति भावः। तथा च भागुरिः—सिद्धगुह्यकभूताहिपिशाचा देवयोनयः इतीत्याह। विद्यां गुडिकाञ्जनादिकां धरतीति पचाद्यच्। विद्याधरो जीमुतवाहनपुष्पदन्तादिः कामरूपी खेचरः। समुद्रप्रभवत्वादद्भ्यः सृता इत्यप्सरसः ऋ सृ गतौ सर्तेरसुन् अपसारयन्ति स्खलयन्तीति वा औणादिकोऽसिः, पृषोदरादित्वा-दुपधाह्रस्वत्वमप्शब्दस्यान्त्याकारलोपश्च। अप्सरसो देववारयोषित उर्वश्याद्याः। यक्ष्यन्ते पूज्यन्ते इति घञ्, यक्षाः कुवेरादयः। इः कामदेवस्तस्यैवाक्षिणी अस्येति यक्ष इत्यन्ये। रक्षन्त्येभ्यः रक्ष पालने असून् रक्षांसि विभीषणादीनि। गन्धं सौरभमर्बति अर्ब पर्ब मर्ब गतौ कर्मण्यण्, शकान्ध्वादित्वात् पररूपत्वं, गानं धर्म एषामिति पृषोदरादित्वाद्वा गन्धर्वा हाहाहुहुप्रभृतयः। अश्वमुखत्वात् कुत्सितो नराः किं क्षेप इति समासः किन्नरा नरशरीरस्तुरगाननादयः। पिशितमश्नाति पचाद्यचि कर्मण्यणि वा पृषोदरादित्वाच्छितशब्दलोपः, अशशब्दस्य शाचादेशः पिशाचो मध्यतालव्यः सत्त्वविशेषः। गुह्यं कुत्सितं कायति कै-गै-रै शब्दे आतोऽनुपसर्ग इति कः, गुह्यको मणिभद्रादिः। एते च निधिरक्षका यक्षभेदाः तथा च—निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञका इति व्याडिः। सि (षि ?) धु हिंसासंराद्ध्योः गत्यर्थाकर्मकेत्या-दिना कर्तरि क्तः, सिद्धोऽणिमादिगुणोपेतो विश्वावसुप्रभृतिः। इष्टं प्राप्नोति भूः प्राप्तौ पूर्ववत् कर्तरि क्तः भूतोऽधोमुखोर्ध्वमुखादिः पिशाचभेदः भूतियोगात् अर्शाद्यच्, भूतो रुद्रानुचरो बालग्रहः। एते विद्याधरादयो दश देवानामिव योनिरुत्पत्तिकारणं अभिमाव्यमेषामिति देवयोनिविशेषाः प्रत्येकं पृथक् पृथक् वर्तन्ते॥ ११, मुकुट।

विद्याधरपर्याये रभसः 'विद्याधरः कामरूपी खेचरः स (नि, त) त्ययौवन' इति। पुष्पदन्तादयोऽपि विद्याधराः। बहुव्रीहिसमासे देवयोनिशब्दः पुंलिङ्गः षष्ठीतत्पुरुषे तु स्त्रीलिङ्ग एव। तथा च चण्डी—अव्याहताङ्गः सर्वाङ्ग यः सदा देवयोनिषु' इति, य.

जक्षन्ति खादन्ति शिशून् जक्षा इति भगीरथोक्तं न युक्तं धातोर्वर्ग्यजकारादित्वात्। …स्वार्थेऽणि पैशाचोऽपि, त. (रक्षःपैशाचसत्त्वका इति शालिहोत्रः, थ). शकुनिशकुन्त-पिशाचपिशङ्गाः इति शभेदः, म.

अमुरा दैत्यदैतेय (या, ङ) दनुजेन्द्रारिदानवाः।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः॥ १२॥

असुराः सुराया अपानात्, सुरविरुद्धा वा, अनर्थवत्, अस्यन्ति देवानिति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वा। दितिदनुश्चासुरमातरौ। अनयादेवत्वाद्भ्रष्टा इति पूर्वदेवाः। सुरान् द्विषन्तीति सुरद्विषः, सत्सूद्विषेति क्विप्॥ १२॥

असुरा इत्यादि॥ अस्यन्ति देवानसुराः असेरुरन् (१. ४३.) इत्युरन्-प्रत्ययः। अविद्यमानाः सुरा एषामिति वा विरुद्धत्वादनर्थवदिति वा प्रज्ञादित्वादण् आसुराश्च। द्यतेः क्तिचि दितिः पूर्ववत् एयः। दैतेया इति आदितेयवत् ढक्। दनुर्दक्षदुहिता तत्र जाता दनुजाः सप्तम्यां जनेर्डः। दनोरपत्यानि दानवाः तस्या-पत्यमित्यण्। दैत्यानां दानवानाञ्चेति पृथग्दर्शनात् यद्यप्येतौ भिन्नौ तथाप्यसुरत्वेनैक-त्वात् समानशीलत्वाच्च पर्यायतामाह। यथा दानवे इतः स दैत्यः प्राप्तश्रीरिति (कुमार), यथा दैत्ये हिरण्याक्षदानवमिति। शुक्रस्य शिष्याः शुक्रशिष्याः। दितेः सुता दितिसुताः। पूर्वे च ते देवाश्चेति पूर्वदेवाः पूर्वापरप्रथमेत्यादिना समासः। पूर्वदेवा इति वा सह सुपेति योगविभागात् समासः। एते हि पूर्वं देवा आसन् अन्यायाद्धि देवत्वाद्भ्रष्टा इति भावः। सुरान् द्विषन्ति द्विष अप्रीतौ सत्सूद्विषेति क्विप् सुरद्विषः। दश नामान्यसुरस्य॥ १२, मुकुट.

प्रज्ञादित्यादासुरोऽपि यथा शुकः कदाचिदगमद्वृषपर्वाणमासुरमिति भारतम्॥, त.

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः॥ १३

सर्वे गत्यर्था ज्ञानार्था इति सुगतः शोभनज्ञानः। तथागतः सत्यज्ञानः तथेति सत्यार्थं वितथवत्। बुध्यते बुद्धः। धर्मः सत्त्वोद्धरणादिस्तेन राजते धर्मराजः धर्मस्य राजा वा। सम्पूर्णान्तं निष्पन्नं भद्रमस्य समन्तभद्रः। ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतः॥ तद्वान्। मारान् कामक्रोधादीन् जयति मारजित्। बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः। लोकान् जयति तपसा लोकजित्। जयति भवं जिनाति वा जिनः॥ १३॥

सर्वज्ञ इत्यादि॥ सर्वं जानाति सर्वज्ञः आतोऽनुपसर्गे कः। शोभनं गतं ज्ञानं अस्य सर्वे गत्यर्था ज्ञानार्था इति सुगतः सुष्ठु अपुनरावृत्तये गत इति वा, सुखेन संसाराद्गत इत्यन्यः। प्रशस्ता बुद्धिरस्य बुद्धः प्रशंसायामर्शाद्यच्। बुध्यतेऽ-ध्यायिभिः मतिबुद्धीत्यादिना वर्तमाने क्तः। इगुपधादिति के बुधश्च अथ बुद्धो जिनो योगी सर्वज्ञः सुगतो बुध इति व्याडिः, धर्मेण राजते पचाद्यच् धर्मस्य राजा वा राजाहःसखिभ्यष्टच्, धर्मराजः। यथागतास्ते मुनयः शिवां गतिं तथागतः सोऽपि यतस्तथागत इति बौद्धागमः। यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गत इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथागतः सुप्सुपेति समासः। समन्तात् सर्वतः पुण्यसम्भारतो ज्ञानसम्भारतश्च भद्रः श्रेष्ठः पञ्चमीति योगविभागात् समासः। समन्तात् संपूर्णं भद्रमस्येति वा समन्तभद्रः पृषोदरादिः, माहात्म्यस्य समग्रस्य धर्मस्य यशसः श्रियः। कामस्यार्थ-प्रेमेयस्य षण्णां भग इ (मि, ग)ति श्रुतिः, ततो मतुपि भगवान्। मारं कामं जयति मारजित्। क्लेशादिना मारं जयतीति तु सर्वधरः। तपसा लोकं भुवनं जयति। लोकान् जयति उपरमयति वा लोकजित्, सत्सूद्विषेति क्विप्। जयति जिनाति वा भवं जिनः, इण्षिञ्जिदीङुष्यविभ्यो नगिति नक् (उ, ३. २.)। १३ मुकुट.

(वयमपि च रे) क्षत्रियाः शासितार इति भवभूतिः (वीर.), म. महामुनि-धर्मचक्रावप्यत्रेति वादिनी ॥, य.

षडभिज्ञो दशबलोऽद्वयवादी विनायकः।
मुनीन्द्रः श्रीघनः शास्ता मुनिः, शाक्यमुनिस्तु यः॥ १४
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः॥ १५

दिव्यं चक्षुः दिव्यं श्रोत्रं पूर्वनिवासानुस्मृतिः परचित्तज्ञानं आस्रवक्षय ऋद्धिश्चेति षडभिज्ञा अस्य। दानशीलक्षान्तिवीर्यध्यानशान्तिबलोपायप्रणिधानज्ञानानि दश बलान्यस्य। अद्वयं विज्ञानाद्वैतं वदत्यवश्यमद्वयवादी। विनयति शादस्तीति विनायकः, मन्यते मुनिः, मनेरुच्च (उ. ४. १२२) तेषामिन्द्रः। मुनिस्तु भीमवत्, सन्ति पदेषु पदैकदेशा इति। श्रिया योगभूत्या घनो निविडः श्रिया घन इव वर्षिता वा। शास्ति विनेयान् शास्ता तृन्तृचौ शासिक्षदादिभ्यः संज्ञायां चानिटौ (उ. २. ६४)। तायी च (नायी, क, तापीति त्रिकाण्डे)॥ यस्तु शकेषु जातः शाक्यमुनिः बुद्धावतारः। शका अभिजनोऽस्येति शण्डिकादिभ्यो ञ्यः (४. ३. ९२.) स शाक्यः सिंह इव शाक्यसिंहः, उपमितं व्याघ्रादिभिरिति समासः। शाक्योऽपि भीमवत्। सर्वार्थेषु सिद्धो निष्पन्नः। अतएव सिद्धार्थः, यच्छाश्वतः सिद्धार्थौ बुद्धसर्षपौ। शुद्धोदनस्य राज्ञोऽपत्यं शौद्धोदनिः शकन्ध्वादित्वात् पररूपम्। गौतमो गोतमगोत्रावतारात्। अर्कबन्धुः सूर्यवंश्यत्वात्। इत्यागमोक्तावतारभेदात् पृथङ्नामानि॥ १४-५

दिव्यं चक्षुर्दिव्यं श्रोत्रं परचित्तज्ञानं पूर्वनिवासानुस्मृतिरात्मज्ञानं वियद्गमनका-यव्यूहादिलक्षणा ऋद्धिश्चेति षडभिज्ञा आद्यज्ञानशक्तयोऽस्य षडभिज्ञः। षट् सु दानशीलक्षान्तिवीर्यध्यानप्रज्ञास्वभिज्ञा आद्यं ज्ञानमस्येति षडभिज्ञ इति तु सर्वधरः। दश बलान्यस्य सन्तीति दशबलः पूर्ववदच्, दानं शीलं क्षमा वीर्यं (चर्या, ङ) ध्यानं प्रज्ञा बलानि च। उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै॥ अद्वयविज्ञानादद्वैतं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वदत्यवश्यमित्यद्वयवादी, आवश्यके णिनिः सत्यवादित्वाद्वा विनयति हितमनुशास्ति विनायकः। मुनीष्विन्द्रः श्रेष्ठो मुनीन्द्रः। ज्ञानपुण्यसम्भारः श्रीः तथा घनः पूर्णः श्रिया योगविभूत्या वा घनो निविडः तृतीयेति योगविभागात् समासः। श्रिया घन इव वर्षति वा श्रीघनः पूर्वपदादिति प्राप्तं णत्वं क्षुभ्नादित्वान्न भवति। शास्ति विनेयान् तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटाविति तृन् शास्ता, पितृशब्दवदस्य रूपं शास्तरौ शास्तरः, अव्युत्पत्तिपक्षे (६. ४. ११) अप्तृनादिसूत्रेऽनुपादान्न दीर्घः व्युत्पत्तिपक्ष नप्त्रादिग्रहणस्य नियमार्थत्वात्। चान्द्रे शासेः क्तिचि शिष्टिरित्यत्र शास्तेति प्रत्युदाहरणेनौणादिकतृच एव रत्नमतिना दर्शितत्वात् बुद्धवाचिनोऽपि दीर्घ इति तु सुभूतिः। मन ज्ञाने मनेरुच्चेति इन् उपधाया उत्वञ्च मननान्मुनिः। सर्वज्ञाद्यष्टादश नामानि बुद्धस्य॥ शाक्येत्यादि॥ १४॥

इक्ष्वाकुराजपुत्राः केऽपि पित्रा वनवासाय दत्ताज्ञा गोतमवंश्यस्य कपिलस्याश्रमे शाकच्छन्ने वसतिं कृतवन्तः शाक्या इत्यागमः। शाकवनवासित्वात् शाक्याः दिगादित्वाद् यत्। तथा च सुन्दरानन्दचरिते—शाकवृक्षप्रतिच्छन्नं वासं यस्माच्च चक्रिरे। तस्मादिक्ष्वाकुवंश्यास्ते शाक्या इति भुवि श्रुताः। तद्वंशावतीर्णो मुनिः। शाक्यश्चासौ मुनिश्चेति तथा यस्तु शाक्यमुनिः स शाक्यसिंहः शाक्यः सिंह इव उपमितं व्याघ्रादिभिरिति समासः, सिंहादिशब्दा हि उत्तरपदभूताः पूर्वपदस्य श्रेष्ठतां गमयन्ति। शाक्योऽपि भीमवत्। सर्वार्थेषु सिद्धो निष्पन्नः सिद्धशुष्केत्यादिना समासः। सर्वोऽर्थः सिद्धो निष्पन्नः अस्येति त्रिपदो बहुव्रीहिरिति तु सर्वानन्दः। अतएव सिद्धार्थौ बुद्धसर्षपाविति शाश्वतः। शुद्ध ओदनो यस्येति शुद्धोदनः शकन्ध्वादिः। तस्य राज्ञोऽपत्यं शौद्धोदनिः। गोतमवंश्यस्य कपिलस्यायं शिष्य इति तस्येदमित्यण् गौतमः॥ गोतमस्यैव शिष्य इति तु माधवी। अर्कबन्धुः सूर्यवंशजत्वात्। मायादेव्याः सुतो मायादेवीसुतश्च। सप्त शाक्यवंश्यमुनेः॥ ब्रह्मेत्यादि॥ १५॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः॥ १६

बृंहति ब्रह्मा॥ आत्मना भवत्यात्मभूः। एतएव स्वयंभूशब्दे लब्धे स्वभूनिवृत्त्यर्थं वचः। एवं सर्वत्रोन्नेयम्। परमे पदे तिष्ठतीति परमेष्ठी। परमे स्थः किदिति इनिः (उ. ४. १०), तत्पुरुषे कृतीति सप्तम्या अलुक्स्थास्थिन्स्थृणां (स्थूनां, क) वक्तव्यात् षत्वम् (८. ३. ६७. १)। पितॄणामपि पिता पितामहः, पितृव्यमातुलमातामहपितामहा इति साधुः। हिरण्यं गर्भेऽस्य हिरण्यस्य गर्भो वा। ब्रह्माण्डप्रभवत्वात्। भूरादीन् सप्तलोकानीष्ट इति लोकेशः॥ १६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बृंहतीति बृहि वृद्धौ ग्योमादय इति बृंहेर्मनिन् नलोपोऽमागमश्च ब्रह्मा। तदुक्तं-बृहदस्य शरीरं यदप्रमेयं प्रमाणतः। बृहद्विस्तीर्णमित्युक्तं ब्रह्मा तेन स उच्यत इति। बृंहयति प्रजा इति ग्यन्तान्मनिन्वा। आत्मना भवतीति आत्मभूः भुवः संज्ञान्तरयो (३. २. १७६) रिति क्विप्। सुराणां ज्येष्ठः प्रथमजः सुरज्येष्ठः। परमे स्थाने तिष्ठतीति परमे स्थः किदितीनिः (४. १०) तत्पुरुषे कृतीत्यलुक् स्थास्थिन्स्थॄ (८. ३. ६७. १.) णाञ्चेति वक्तव्यमिति षत्वम्। लोके पितॄणां प्रजापतीनामपि पिता पितामहः पितृव्यमातुलेति निपातितः, स तु पितुः पिता भवति, पितृजननी च तन्मूर्तिरित्यागमः। उपचारादत्र हिरण्मयमण्डं हिरण्यम्। तथा च मनुः—तदण्डमभवद्धैमं सहस्रांशुसम-प्रभमिति तदस्य गर्भ उत्पत्तिकारणं तस्य गर्भोऽयमिति वा तत्प्रभवत्वाद्धिरण्यगर्भः। लोकस्य चतुर्दशभुवनस्य ईशो लोकेशः। स्वयमात्मना भवतीति स्वयम्भूः पूर्ववत् क्विप्। आत्मभूरित्यनेनैव लब्धे स्वभूनिवृत्त्यर्थं स्वयम्भूरित्युक्तम्। एवमुत्तरत्रापिज्ञयम्। चत्वार्याननान्यस्येति चतुराननः॥ सर्वं दधातीति धाता तृच्॥ १६॥

धाताऽब्जयोनिर्द्रुहिणो विरिञ्चः (ञ्चिः) कमलासनः।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः॥ १७॥

धाता विधाता कर्ता वेरर्थो धातुनैवोक्तः उपसर्गाणां द्योतकत्वात्। द्रुह्यत्यसुरेभ्यो द्रुहिणः। विरिंक्तेसूते विरिञ्चः विभिर्हंसै रिच्यते उह्यते वा, विरिञ्चिरिति प्राच्याः। विधति सृजति वेधाः विध विधाने असुन् विधाञो वेध चेति (उ. ४. २२४.) वा विधातैव। विश्वं सृजति विश्वसृट् व्रश्चभ्रस्जसृजेति षः, झलां जशोऽन्ते। विधत्ते विधिः उपसर्गे घोः किः। शतधृतिशतानन्दौ च। स्थविरो देश्याम्॥ १७॥

विष्णोर्नाभिकमलजत्वात् अब्जयोनिः। कामक्रोधादिभ्योऽसुरेभ्यो वा द्रुह्यतीति द्रुहिणः द्रुहदक्षि(२. ५०)भ्यामिनन्निति इनन्प्रत्ययः, वाहुल्यात् गुणाभावः। ब्रह्मात्मभूः स्याद् द्रुहिणो द्रुघणश्च (न, ङ) पितामह इति भागुरौ द्रुघणोऽपि (न, ङ)। भूतानि विरचयतीति रच प्रतियत्ने अच्। पृषोदरादित्वादकारयोरित्वं नकारागमश्च विरिञ्चिः। रीच (वीरच, ङ) (रिच ?) वियोजनसंयमनयोः चुरादिः अच इः पृषोदवादित्वात् नुम् कुञ्जरवत् उपधाह्रस्वत्व (इत्व, ङ)श्च विरिञ्चि-रित्यन्ये। विरञ्चोऽपि विरिञ्चो द्रुघणः शि (क, ज)ञ्जो (संज्ञो, म) विरिञ्चि-र्द्रुहिणो मत इति शब्दार्णवात्। विरिङ्क्तेसूते विरिञ्चिः विभिर्हंसै रिच्यते उह्यते वा विरिञ्चिरिति प्राच्या इति तु क्षीरस्वामी। कमलमासनमस्य कमलासनः। सृजतीति स्रष्टा तृज (न, ङ.) न्तः सृजिदृशीत्यमागमः। प्रजानां सन्ततीनां पतिः प्रजापतिः। विदधाति विधाञो वेध चे (४. २२४.) त्यसुन् वेधादेशश्च विध विधान इत्यतो वाऽसुनि वेधाः, विधाता धातेतिवत् अन्योपसर्गनिवृत्यर्थम्। विश्वं सृजति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यन्येभ्योऽपीति क्विप्, क्विबन्तस्य वा क्विन्प्रत्ययो यस्मादष्ट इति स क्विन्प्रत्यय इति तद्गुणसंविज्ञानपक्षे क्विन्नन्तस्य कुत्वं न क्विबन्तस्येति व्रश्चभ्रस्जेति षत्वे कृते विश्वसृट्, विश्वसृड्भ्यामित्यादि, अतद्गुणसंविज्ञानपक्षे क्विन उपलक्षणत्वात् तदभावे क्विबन्तस्यापि कुत्वं विश्वसृक् विश्वसृग्भ्यामित्यादि ज्ञेयम्। विदधाति इति बहुलवचनात् कर्तर्युपसर्गे घोः किरिति किः विधिः, विध विधाने इगुपधत्वाद्वा विधिः। विंशतिर्नामानि ब्रह्मणः॥ विष्णुरित्यादि॥ १७॥

सृजो गत्वे डत्वे सर्वत्र विकल्प इति चन्द्रगोमी, तेन प्रजासृट् इत्यपि बोध्यम्, च, विरिञ्चो विश्वसृक् स्रष्टा विरिञ्चिः कमलासन इति रभसः······त्रिभुवनपुरनिष्पादन-कौशलमभिपृच्छतो विरिञ्चस्येति शम्भली (सम्भ, छ) मतं, च, ज.

पद्मासनादि च तथा च भट्टिः—सीमेव पद्मासनकौशलस्य, त, द. विश्वरेताः शतधृति-र्द्रुहिणो नाभिसम्भवः। द्रुघनश्चाब्जजः शम्भुश्चिरजीवी पुरातन इति हारावलीति सर्वानु-वादिनी, न.

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः॥ १८॥

वेवेष्टि व्याप्नोति विश्वं विष्णुः विषः किच्चेति नुः (उ. २. ३६.)। नरस्या-पत्यं नारायणः नडादिभ्यः फक्। नारमम्मयं नरसमूहो वाऽयनमस्य आपो नारा इति प्रोक्ताः, तथा नराज्जातानि भूतानि नाराणीति। कृष्णो वर्णेन कर्षति वाऽरीन्। विकुण्ठस्यापत्यं वैकुण्ठः विकुण्ठितसैंहादिवक्त्रो वा संहितादिषु तथा दर्शनात्। विष्टरे इव श्रवसी कर्णावस्य विष्टरश्रवाः विष्टराकृतिर्जटा श्रवोभ्यां निर्गताऽस्येति वा। दाम उदरे यस्य दामोदरः, बाल्ये हि चापल्याद्दाम्ना बद्धोऽभूत्। हृषीकाणामिन्द्रि-याणामीशो वशिता हृषीकेशः। प्रशस्ताः केशाः सन्त्यस्य केशवः केशाद्वोऽन्यतरस्याम्। माया लक्ष्म्या धवो भर्ता माधवः, मधोरपत्यं वा। स्वतो भवति स्वभूः॥ १८॥

वेवेष्टि इति विष्णुः विष्लृ व्याप्तौ विषेः किच्चेति नुः, रषाभ्यामिति णत्वम् विशति सर्वभूतानि वा विष्णुः पृषोदरादित्वात् षत्वं विशेर्धातोः प्रवेशनादिति भारतम्। नराणां समूहो नारं तस्य समूह इत्यण्, तदेवायनं स्थानमस्य नारायण इति निरुक्त-(क्ति, ङ)काराः। क्वचिन्मन्वन्तरे नरस्य ऋषेरपत्यत्वमुपगत इति नरस्यापत्यं नडादिभ्यः फकि नारायण इति तु वैयाकरणाः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः (सम्भवा, ङ)। ता यदस्यायनं पूर्वं तेन नारायणः स्मृत इति तु मन्वादयः। नरादात्मनो जातान्याकाशादीनि नाराणि कार्याण्ययं कारणात्मा एति व्याप्नोति नारायणः। नराज्जातानि तत्त्वानि नाराणीति ततो विदुः। तान्येवायतनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य तेन नारायणः स्मृत इति मन्त्रवर्णः। पृषोदरादित्वान्नरायणोऽपि। अथ नारायणो विष्णुरूर्द्धकर्मा नरायण इति शब्दार्णवात् (संसारावर्त, म) सर्वत्र पूर्वपदादिति णत्वम्। कलियुगे कृष्णवर्णत्वात् कर्षत्यरीन् वा कृष्णः कृषेर्वर्णे इति (३. ४.) बाहुलकान्नक्। तथा च संक्षिप्तभारते सत्यत्रेताद्वापरयुगेषु शितरक्तपीताभः। कृष्णः किल कलिकाले स एष पुरुषोत्तमो जयति॥ कृषिरुत्कृष्टवचनो नश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति औपनिषदाः। उत्कृष्टा निर्वृतिरस्मादिति व्युत्पत्तेः। चाक्षुषमन्वन्तरे विकुण्ठाया अपत्यं वैकुण्ठः। शिवादित्वादण्, विकुण्ठते गुरोश्चेत्यपत्यार्थे विविधा कुण्ठा माया अस्यास्तीति वा ज्योत्स्नाद्यण् वैकुण्ठः। पलाशी विष्टरः स्थिर इति त्रिकाण्डशेषः। तरुश्चात्राश्वत्थोऽभिमतः, तथा चाश्वत्थः सर्ववृक्षाणा-मिति गीता, तत्र श्रूयत इति सर्वधातुभ्योऽसुन्। विष्टर कुशमुष्टिरिव श्रवसी कर्णा-वस्येति वा विष्टरश्रवाः। बाल्ये चापलनिषेधाय यशोदया दाम्नोदरे बद्धत्वाद्दाम उदरेऽस्येति दामोदरः। गमकत्वाद्वैयधिकरण्येऽपि समासः। हृषीकस्येन्द्रियस्येशो हृषीकेशः, प्रशस्ताः केशाः सन्त्यस्येति केशाद्व इति वः केशवः। यद्वा यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्दन। तस्मात् केशवनामा त्वं लोके ख्यातो भविष्यतीति हरिवंशोक्तेर्हन्त्यर्थाद् वधेः केशिनं हतवानित्यन्येभ्योऽपि दृश्यत इति डः, पृषोदरादित्वात् केशिशब्दस्येकारस्याकारे नलोपे च। यदोर्ज्येष्ठः पुत्रो मधुस्तद्वंशजत्वात् तस्यापत्यमित्यण् माधवः। अन्येऽपि तद्वंश्या माधवाः। तथा च प्रहितः प्रधनाय माधवानिति माघः। माया लक्ष्म्या धव इति वा। स्वतो भवतीति पूर्ववत् क्विपि स्वभूः॥ १८॥

यद्वा विष्टरः कुशमुष्ट्यादिः ताविव श्रवसी कर्णौ अस्य शङ्कुकर्णत्वात्, अतएव शङ्कुकर्णोऽप्यस्य नामेति कृष्णदासः। केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः। रुदन्ति पाण्डवाः सर्वे हा हा केशव केशव' इति श्लोकात् तालव्यः। पाण्डवा शृगालाः, ज.

नारस्यायनं प्रवृत्तिर्यस्मात् स तथेति दशमस्कन्धटीकायां श्रीधरस्वामी······केशव-स्तालव्यमध्यः केशवे वा शवे वा इति यमकात्······मा लक्ष्मीस्तस्या धवः माधवः श्रीरब्धिजारमामेति भूरिप्रयोग इति कश्चित। तन्न श्रीपतिरित्यनेन गतार्थत्वात नियमार्थत्वे श्रीकान्ताद्यनुपपत्तेः, त.

चाक्षुषस्यान्तरे देवो पुरुषोत्तमः। विकुण्ठायामसौ जज्ञे वैकुण्ठे दैवतैः सह, म.

विष्णुसहस्रनामटीकायां शङ्कराचार्यस्त्वाह विविधा कुण्ठा गतेः प्रतिहतिस्तस्याः कर्तेति वैकुण्ठः, न.

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः॥ १९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुण्डरीके इव अक्षिणी अस्य पुण्डरीकाक्षः, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गादिति षच् (५ ४. ११३.)। गां भुवं विन्दतीति गोविन्दः वाराहरूपेणोद्धारात्, अनुपसर्गाल्लिम्पविन्देति शः। न च्यवतेऽच्युतः। शृङ्गविकारो धनुरस्त्यस्य शार्ङ्गी। विष्वक् सर्वव्यापिनी सेनाऽस्य विष्वक्सेनः। जनानर्दयति जनार्दनः, नन्द्यादित्वाल्ल्युः॥ १६

दैत्यानामरिर्दैत्यारिः अवयवलक्षणया आयतत्वात्, पुण्डरीके पुण्डरीकपत्रे इवाक्षिणी अस्येति वा पुण्डरीकाक्षः, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गादिति षच्। पुण्डरीकस्थानेऽक्षि अस्य वा। अनेन किल पूर्वं शिवाय सहस्रपुण्डरीको बलिरुपनीतस्तत्र तेनैकं भक्तिं ज्ञातुमपहृतं, ततोऽनेन स्वचक्षुरेकमुत्पाट्य पुण्डरीकस्थाने दानं कृतमेतच्च महिम्नःस्तोत्रे हरिस्ते साहस्रं कमलबलिमादाय पदयोर्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्, (१६) इति श्लोकेषु व्यक्तम्। यद्वाऽक्षेष्विन्द्रियेषु दृश्यते अधिष्ठातृरूपेणानुभूयते इत्याक्षः परमात्मा शेष इत्यण, सर्वेन्द्रियाणामधिष्ठातेत्यर्थः। पुण्डरीकमध्ये परमात्मरूपेण स्थितत्वात् पुण्डरीकाक्षः सर्वेन्द्रियाणामन्द्रियरूप इति यावत्। तथा च श्रुतिः—प्राणस्य प्राण उत चक्षुषश्चक्षुः श्रोत्रस्य च श्रोत्रं मनसो मनो विदुरिति। आलौहित्यात् पुण्डरीकं कप्यास (ग) मिवाक्षि अस्य पुण्डरीकाक्षः, कप्यासशब्दस्तु (कप्यास, च, कार्पास, ङ) वानरकटिवचन इति विष्णुपुराणटीकाकाराः। गां भुवं विन्नवानिति विद्लृ लाभे गवादिषु विन्देः संज्ञायामिति शः शे मुचादीनामिति नुमि गोविन्दः। महावृष्टौ गोवर्द्धनगिरिमुत्पाट्य गोकुलमनेन रक्षितमिति ब्राह्मणैर्गोष्वाधिपत्यमस्मै दत्तमिति तु सुभूतिः। गरुडो ध्वजश्चिह्नमस्येति गरुडध्वजः। पीतमम्बमस्य पीताम्बरः। कदापि कुतोऽपि न च्युतोऽच्युतः निजपदान्नास्ति च्युतं स्खलनमस्याच्युत इति वा। शृङ्गस्य विकारः अनुदात्तादेरञ् (४. २. ४४) शार्ङ्गं धनुः तद्योगात् अत इति इनिठनावितीनिः शार्ङ्गी। विषु नानार्थे प्रथने स्यादिति व्रोपालितः। न्यासेऽपि लोमादिसूत्रे विषुशब्दो नानार्थो निपातो मूर्द्धन्यान्तो दर्शितः, पामादित्वान्न प्रत्यये विषु ण इति णत्वदर्शनात्। विष्वञ्चति इति क्विपि कुत्वे विषुची नाना अञ्चन्ती सेना अस्येति विष्वक्सेनः। विषु सर्वतोऽञ्चन्ती सेनाऽस्येति तु पञ्जिकादयः। पूर्वपदात् संज्ञायामग इति नत्वं विष्वक्शब्दस्य गकारान्तत्वात्, गकारान्तत्वं च नत्वे कर्तव्ये परस्य खरि चेति चर्त्वस्यासिद्धत्वात् इति कलिङ्गः। विष्वगिति मूर्द्धन्यमध्य एव। विष्वक् विश्वक् स्मृतं विश्वैर्विषुवं विशुवं तथेति द्विरूपकोषात् तालव्यमूर्द्धन्याश्चैते शटी च (शची च, च, वेषश्च) परिवेषो विष्वक्सेनोऽश्रेष (भीषु, च) प्रतिस्कशः कोषविषदौ चेत्यूष्मविवेकाच्च (गदसिंहः, च.) कदाचित्तालव्यमध्योऽपि। विष्वक्सर्वव्यापिनी सेनाऽस्येति विष्वक्सेन इति तु सुभूतिः। जनाः समुद्रस्थदैत्यभेदास्तेषामर्दनो जनार्दनः, अर्द हिंसायां नन्द्यादित्वात् ल्युः॥ १६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्ये तु चन्द्रसूर्यात्मकचक्षुर्द्वयत्वात् एकं शुक्लं अपरं च रक्तमित्याहुः। वस्तुतस्तु चक्षुषो भागद्वये कृष्णश्वेतरक्तानां सामुद्रकादौ प्रशस्तत्वात् इन्दीवरपुण्डरीककोकनदानामुपमानतासंगतिः।...... विष्वक्सेन आदिमूर्धन्यः, तथाहि कप्फणाभ्युदययमकं—दर्शकाश्मकभूपालौ विष्वगारम्भरोषितौ। योद्धुं निविविशाते ताविष्वगारं भरोषितौ, च. (तत्रारम्भोमारणं भरोषितौ अतिशयेन तेजस्विनौ, म.

यद्यपि पुण्डरीकं सिताम्भोजमित्यमरः तथापि पुण्डरीकं सिताम्भोजे पद्ममात्रे च दृश्यते इति रभसदर्शनात् सामान्ये पद्मावगमः, प्रयोगोऽपि—विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावद्गते चन्द्रकान्त इति मालतीमाधवे, य.

विशेषेण पूजिता शीघ्रगामिनी वा सेना यस्य स विश्वक्सेनस्तालव्यमध्यः। एवमेव सर्वानन्दः (नयनानन्दः ?)..... विष्वगिति मूर्धन्यमध्यो निपातित इति श्रीपतिरिति सारमञ्जरी। विष्वगव्ययं मूर्धन्यवदिति पद्मनाभः। वर्णदेशनायां पुरुषोत्तमदेवस्तु...... क्षपणव्याकरणे च विपूर्वात् षु प्रेरणे इत्यतोऽन्येभ्योऽपीति क्विपि उपसर्गात् षत्वमुक्त्वा विषुमञ्चतीति व्युत्पादितमित्याह। द्विरूपकोषे भगवान् पाणिनिः (??) विष्वक्सेनो विश्वक्सेन इत्याह, त,

अर्द गतौ याचने च चकाराद् हिंसायां चेति गणवृत्तौ रमानाथः, य.

विष्वक्सेन इति तालव्यादिर्दन्त्यवानित्युपाध्यायसर्वस्वम्, द.

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥ २०

इन्द्रमुपगतोऽनुजत्वादुपेन्द्रः। इन्द्रस्यावरं जातोऽनुज इन्द्रावरजः। पद्मं नाभावस्य पद्मनाभः अच् प्रत्यन्ववेति प्राङ्निर्देशादच्। त्रयो विक्रमा अस्य त्रिविक्रमः, त्रिषु लोकेषु वा विक्रमः पदन्यासोऽस्य॥ २०

अनुजत्वादिन्द्रमुपगत इत्युपेन्द्रः उपगत इन्द्रोऽस्येति वा कुगतीत्यादिना समासः। इन्द्रलोकादुपरिलोके वर्तमानत्वादुपेन्द्र इति कलिङ्गः। यद्वा हरिवंशे—ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः। उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि देवता इत्युपेन्द्रः। इन्द्रस्यावरं जातोऽनुजत्वादिन्द्रावरजः। चक्रं पाणावस्येति प्रहरणार्थेभ्यः परे निष्ठा (२. २. ३६. २.) सप्तम्याविति सप्तमीपरनिपाते च चक्रपाणिः। चत्वारो भुजा अस्येति चतुर्भुजः, पद्मं नाभावस्येति पद्मनाभः अच्प्रत्यन्ववपूर्वादित्य (५. ४. ७५.) त्राजिति योगविभागादच्, योगविभागस्य हि पूर्वाचार्येष्टमात्रसाधकत्वं न तु नाभ्यन्तस्य सर्वत्रैवाच् समासान्त इति नियमः। तेन प्रजा इवाङ्गादरविन्दनाभेरिति माघः, नाधारेण विना सृष्टिरूर्णनाभेरपीष्यत इत्यादिप्रयोगाः। उक्तञ्च योगविभागादिष्ट-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धिरिति। मधुनाम्नोऽसुरभेदस्य रिपुः। वसुदेवस्यापत्यं वासुदेवः। वासुश्चासौ देवश्चेति वा, तथा च विष्णुपुराणं सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः। अतोऽसौ वासुदेवेति विद्वद्भिः परिकीर्त्यत (पठ्यत) इति। वासुरपि तथा च त्रिकाण्डशेषः वासुर्नरायणपुनर्वसुविश्वरूपा इति। बलिवञ्चनार्थं भूव्योमस्वर्गेषु त्रयो विक्रमाः पादन्यासा अस्येति त्रिविक्रमः ॥ २०

चक्रं चक्रयुक्तं पाणिरस्येति सुभूतिः। तुष्व्यर्थं चक्रपाणिन इति दर्शनात् नान्तोऽपि, तत्र चक्रेण पणितुं शीलमस्येति णिनिः, च.

पद्मनाभिरपीति साञ्जः, न.

अरविन्दनाभिश्च तथा च प्रजा इवाङ्गादरविन्दनाभेरिति, न.

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१
विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः।
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२

शूरस्यापत्यं शौरिः। पुरुषेषु उत्तमः पुरुषोत्तमः इति सप्तमीतत्पुरुषः, न निर्द्धारण इति षष्ठीसमासनिषेधात् कर्मधारये च सन्महत्परमोत्तमेत्युत्तमपुरुष इति स्यात्। पुष्पपल्लवफलान्विता वनमाला अस्यास्तीति वनमाली व्रीह्यादित्वादिनिः। बलिं ध्वंसते बलिध्वंसी सुप्यजातौ णिनिस्ताच्छील्ये। अधःकृत्याऽक्षाणीन्द्रियाणि जातोऽधोक्षजः। अधोऽक्षाणां जितेन्द्रियाणां वा जायते प्रत्यक्षीभवति, अक्षजं ज्ञानमधोऽस्य वा॥ विश्वं बिभर्ति विश्वंभरः संज्ञायां भृतॄवृजीति खच्। मधुकैटभावसुरौ जितवान्। विधत्ते विधुः। श्रीवत्साख्यो रोमावर्तो वक्षसि लाञ्छनमस्य श्रीवत्सलाञ्छनः। गदाग्रजो दाशार्हो मुञ्जकेशोऽब्धिशायी पुराणपुरुषो बभ्रुरित्याद्यूह्यम्॥ हरौ जाते हि आनका दुन्दुभयश्चास्य नेदुः, आ (अ, ख) नकदुन्दुभी वसुदेवस्य पित्येके॥ २१-२२

देवकस्यापत्यं देवकिः॥ अत इञ्संज्ञापूर्वकत्वाद्वृद्ध्यभावः। ततः स्त्रियामितो मनुष्यजातेरिति ङीषि देवकीति वर्णदेशना। देवकानाचष्ट इति णिजन्तादच इः, ततो ङीषि देवकीति समाधेयमिति तु श्रीधरः। दैवकी देवकीति द्विरूपकोषश्च। तस्या नन्दनो देवकीनन्दन इति वृद्धिरहितपाठः। शूरो नाम यादवो वसुदेवपिता तद्वंशजत्वात् शौरिः। बाह्वादिराकृतिगणत्वात् इञ्। शर्वः शिव केशव एव शौरिरिति शाकारभेदात्तालव्यादिः। षूङ् प्राणिप्रसवे (षून् अभिषवे, घ) सु (२. २४.)-सूधाञ्गृधिभ्यः क्रन सूरो यादवो दन्त्यवान्, इति तु माधवो। श्रियः पतिः श्रीपतिः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यौगिकत्वाल्लक्ष्मीपतिरित्यादि। पुरुषेभ्य उत्तमः पुरुषोत्तम इति पञ्चमी भयेनेति (२. १. ३७.) योगविभागात् समासः, सह सुपेत्यस्य लक्षणत्वे अध्वगन्तव्यवत् समासो वा, तथा च गीता—यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मिन् लोके देवे च (वेदे च,) प्रथितः पुरुषोत्तमः। तथा उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति। षष्ठ्यान्तु न निर्द्धारण इति समासनिषेधः स्यात् सन्महदित्यादिना कर्मधारये चोत्तमपुरुष इति। यत्र समुदायो निर्धार्यमाणो निर्धारणहेतुश्चेति त्रयं सन्निहितं तत्रैव निर्धारण इति निषेधः। इह तु स भगवानेकदेशरूपतया आख्यातुं न शक्यत इति नास्ति निषेध इत्यनुन्यासः। शेषषष्ठ्या अत्र समास इति तु कैयटः। वनं वनपुष्पं तन्मालास्यास्तीति वनमाली व्रीह्यादित्वादिनिः। सपल्लवपुष्पग्रथिता स्रक् वनमालेत्येके। आपादपद्मं या माला वनमालेति सा मतेति तु कलिङ्गः। बलिमसुरं ध्वंसितुं शीलमस्येति ताच्छील्ये णिनिः बलिध्वंसीति सदाऽनुस्वारवान् सकारस्य ययोऽनन्तर्भावेन परसवर्णाभावात् (८. ४. ५८.)। कंसस्यारातिः कंसारातिः। अक्षमिन्द्रिये अध इन्द्रियं पादौ ताभ्यां जातोऽधोक्षजः अन्येभ्योऽपि दृश्यत इति डः। तदुक्तमेकादशेन्द्रियगणने विष्णुपुराणे पायूपस्थं करौ पादाविति। अधोक्षाणां जितेन्द्रियाणां सम्बन्धेन जायते प्रत्यक्षीभवतीति वा, अक्षजमिन्द्रियजं ज्ञानमधोऽस्य वा, अक्षादिन्द्रियाज्जाता अक्षजाः प्राणिनस्ते अधः कक्षा यस्मादिति वा, यद्वा अधो न क्षीयते जात्विति पृषोदरादित्वादधोक्षजः। तथा चोद्योगपर्वणि अधो न क्षीयते जातु यस्मात् तस्मादधोक्षज इति। अधोऽक्षिभ्यां दृग्भ्यां जात इत्यधोक्षज इति तु पञ्जिका॥ विश्वं बिभर्ति विश्वम्भरः संज्ञायां भृतॄवृजीति खच्, अरुर्द्विषदजन्तस्य मुम् (६. ३. ६७), कैटभमसुरं जितवानिति सत्सुद्विषेति क्विपि कैटभजित्। विधत्त इति विधुः, असुरान् विध्यतीति वा व्याधेः पृभिदिव्यधिगृधिधृषिभ्य इति कुः (उ. १. २४)। महापुरुषलक्षणं श्वेतरोमावर्तविशेषः श्रीवत्सः वदति महत्त्वमिति वदे वृॄतृवदिहनिकमिकषिभ्यः स (३. ६२) इति सप्रत्यये वत्सः श्रीयुक्तो वत्सः श्रीवत्सः। क्रुद्धस्य दुर्वाससः पदाघातरूपो रेखाविशेषः श्रीवत्स इति तु पञ्जिका, स एव लाञ्छनमस्य श्रीवत्सलाञ्छनः। सौरिश्रीवत्सदैत्यारिविश्वक्सेनजनार्दना इति शब्दार्णवात् श्रीवत्सोऽपि। ऊनचत्वारिंशन्नामानि विष्णोः॥ वसुदेव इत्यादि॥ अस्य जनकः पिता वसुभी रत्नैर्दीव्यति वसुदेवः पचाद्यच्, वसूनि दीव्यतीति कर्मण्यणि वा। कृष्णे जाते खे (ङ) देवैरानकदुन्दुभयो वादिता अस्य गृह इति आनकदुन्दुभिः। पृषोदरादित्वात् सिद्धः। आनकदुन्दुभो वसुदेवपिता अस्यापत्यमित्यर्थे अत इञिति क्षीरस्वामी। द्वे नामनी कृष्णपितुः। बलभद्र इत्यादि॥ २१-२

शूरसालन्यादिः यदुवंशमिव शूरश्रीसम्पन्नमबलपरिपालितं राजकुलं विवेशेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BVE8SMN

कादम्बर्यां वीरवाचिना सह श्लेषादिति सुभूतिः। मधुमाधवी तु सुरो दन्त्यादिर्यादव इत्याह। उभयमेव शौरिश्रीवत्सदैत्यारिविष्वक्सेनजनार्दनाः। षड्बिन्दुः श्रीपतिः सौरि-र्दैवकीनन्दनोऽच्युत इति वाचस्पतिकोषात्।..... वनं वनपुष्पं तस्य माला अस्तीति इनीति सुभूत्यादयः। वनशब्द एव पुष्पवाचक इति कश्चित्, च.

कंसो दन्त्यवान् 'श्रीकृष्ण इव राजा कंसं हतवान्' हति श्लेषात् 'काकाली काम-धुरा काशीतलवाहिनी गङ्गा। कंसं जघान कृष्णः कंबलवन्तं न बाधते शीत' इति विदग्ध-मुखमण्डनप्रश्नोत्तराच्च, ज.

वस्तुतस्तूणादिवृत्तौ "वीरवाचकः सूरस्तालव्यादिः सूर्यवाचकस्तु दन्त्यादिरिति' भेद उक्तः। तथा च गदसिंहः 'तालव्यादिः सुभटे शूरः सूर्ये तु दन्त्योऽपि'। पुरुषोत्तमदेवश्च "शूरः समर्थे शकलं च खण्डे" इति।.....पुरुषोत्तमः कर्मधारय इति वर्धमानः सम्बन्ध-षष्ठीसमास इति सुभूतिः।......आजानुलम्बिनीं षड्ऋतुकुसुमामम्लानपुष्पां मध्ये स्थूलकदम्बां वनमालामाहुरिति कृष्णदासः। सुभूतिस्तु वनं वनोद्भवं पुष्पं अतएव मालाकारो मालिकश्च पुष्पजीवी वनार्चक इति मालिकपर्याये रभसः। तत वनशब्दस्य पुष्पार्थत्वे प्रमाणाभावात् वनार्चक इत्यस्य पुष्पवनार्थत्वेनैवोपपत्तेः, त.

वासुभद्रोऽप्यत्र (वासुभद्रः पृश्निगर्भः पृश्निभद्रो गदाग्रज' इति कोषः। दिवे-र्णकान्ताद् नदादित्वाद्देवकीति शाब्दिकनरसिंहः', द.

भृगुपादचिह्नमित्यन्ये, मोक्षधर्मे तु 'अद्य प्रभृति श्रीवत्सः शूलाङ्को मे भव द्वयम्। मम पाण्यङ्कितश्चापि श्रीकण्ठस्त्वं भविष्यसि.....श्रीवत्सः (हृत्सङ्गतः, त, थ) कौस्तुभवन्मणि-रिति कृष्णदासः। तथा श्रीवत्समिन्द्रायुधसमप्रभमिति......शिल्पनैपुण्यादानका एव दुन्दुभि-शब्दा यस्येति सुभूतिः......आनकदुन्दुभीति लोकाश्रयत्वाद् लिङ्गस्य क्लीवत्वमिति सर्वस्वे सर्वानन्दः। (एवमेव नारायणमथुरेशभरतादयः, सर्वस्वे तु तूर्याङ्गत्वादेकवद्भावात् नपुंसकत्वे प्राप्ते लोकाश्रयत्वाल्लिङ्गस्येति तन्नभवतीति विपरीतमुक्तम्), च.

श्रीकृष्ण इव कृतवसुदेवतर्पण इति वासवदत्ता।........ भयादानकदुन्दुभेरिति प्रयोगः, न,

आनकदुन्दुभिः पृषोदरादित्वात् ह्रस्वादिरपि, न. (अनकदुन्दुभिश्च, थ) दुन्दुरपि (भूकश्यपो वसुदेवो, थ) दुन्दुरानकदुन्दुभिरिति त्रिकाण्डशेषः (रत्नकोषः ?), द.

मधुजिच्च "मधुजिति चक्रे" इति छन्दोमञ्जरीप्रयोगात्, न.

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः।
रेवतीरमणो रामः कामपालो हलायुधः॥ २३
नीलाम्बरो रौहिणेयस्तालाङ्को मुस (ष) ली हली।
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः॥ २४

Funding by IKS-MoE

120

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बलेन भद्रो बलभद्रः, बलस्त्वनुनिष्पादिन्यायेन भीमवत्। प्रलम्बनामानमसुरं हतवान् प्रलम्बघ्नः। अमनुष्यकर्तृके चेति टक् (३. २. ५३.)। रामः सिताङ्गत्वात्। कामान् पालयति कामं स्मरं वा अग्रजत्वात् कामपालः॥ रोहिण्या अपत्यं रौहिणेयः शुभ्रादित्वाड्ढक्। तालवृक्षोऽङ्को ध्वजोऽस्य तालाङ्कः। संकर्षति संहारमूर्तित्वात् सङ्कर्षणः नन्द्यादित्वाल्ल्युः। कालिन्द्या यमुनाया भेदनो हलेनाकर्षणात्। सात्वतोपि॥ २३-२४

बलं भद्रं श्रेष्ठमस्य बलेन भद्रो वा बलभद्रः। प्रलम्बासुरं हतवान्प्रलम्बघ्नः देवत्वादमनुष्यकर्तृके चेति टक्, मूलविभुजादित्वात् कः इति कालकौमुदी। बलातिशययोगाद्बलः अर्शाद्यच् बलश्चासौ देवश्चेति बलदेवः, बलेन दीव्यतीति वा। अच्युतस्याग्रजोऽच्युताग्रजः। रेवत्या रमणः रेवतीरमणः नन्द्यादित्वाल्ल्युः। रमयति मोदयति प्रज्ञा रूपमस्य वा रामः, ज्वलितिकसन्तेभ्यो णः। काममिच्छां भ्रातृजत्वात् स्मरं वा विलासित्वात् श्रृङ्गारात्मकं कामं वा पालयति कामपालः, पाल रक्षणे पॄ पालनपूरणयोरिति वा कर्मण्यण्। हलं लाङ्गलमायुधमस्य हलायुधः। नीलमम्बरमस्येति नीलाम्बरः। रोहिण्या अपत्यं रौहिणेयः, शुभ्रादित्वात् ढक्। तालो वृक्षविशेषोऽङ्को ध्वजोऽस्य तालाङ्कः। मुस खण्डने वृषादिभ्यः कलच् मुसलं दन्त्यमध्यं, तथा च सर्वस्य द्वे इत्यत्र न्यासः, तथा च विसं विषं मुसलं मुषलमिति षत्वं स्यादिति त्रसर-मुसल-सूपाः इति सकारभेदश्च। मुष स्तेये इत्यतो मूर्धन्योऽपीति वर्णदेशना। तद्योगान्मुषली। एवं हली। सङ्कर्षति संहारमूर्तित्वात् हलेन वा इति सङ्कर्षणः। गर्भस्थस्य सम्यक् कर्षणाद्वा, तथा च हरिवंशे—गर्भसङ्कर्षणात् सोऽथ लोके सङ्कर्षणः स्मृत इति। नन्द्यादित्वाल्ल्युः, द्वितीयपक्षे अर्शआद्यच्। सीरो लाङ्गलं पाणावस्येति सीरपाणिः। सीरो दन्त्यादिः "अजगरसर्पे शीरस्तालव्यादिः कविभिराख्यातः। लाङ्गलवचनो नियतं दन्त्यादिर्दृश्यते शास्त्र इत्यूष्मविवेकात्। कालिन्द्या यमुनाया भेदनः ल्युः। बलयोगाद्बलः। सप्तदश नामानि बलभद्रस्य। मदन इत्यादि॥ २४—४

भद्रवलनोऽपि 'स्याद् भद्रवलनोऽनन्तो हली गुप्तचरो बल' इति रत्नकोषः, य. (वलनश्चेति भरते प्रमादपाठः अस्यैव श्लोकार्धस्योत्तोलत्वात्)। तथा भद्रबलोऽनन्तो—, च.

वायुपुराणे ध्वजनिर्णये 'तालस्तालाकृतिः कार्यो मकरो मकराकृति' रिति सुभूतिः। ……'स्थितो हस्ततले नित्यं निर्मलस्तस्य दर्पणः। तलस्थत्वादसौ तालः सदा तेनाङ्कितः प्रभु' रित्युक्तम्। ……गुरुपुरुमुसलमिति भट्टिभाषासमावेशः मुषलो दन्त्यमूर्धन्य इति वर्णदेशना, मुशस्तालव्योऽपीति चण्डीटीकायां चतुर्भुजः।……सीरोऽर्कहलयोः पुमानिति रभसाच्च (दन्त्यादिः), च.

मुसली हलतालभृदिति रभसः, य.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मदनो मन्मथो मारः प्रद्युम्नो मोनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥ २५
श(स)म्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६

मदयति मदनः ल्युः । मननं मत् चेतना, अनुदात्तोपदेशवनतीत्यनुनासिकलोपे तुक् । मतो मथो मन्मथः । म्रियन्तेऽनेन मारः । प्रकृष्टं द्युम्नं बलमस्य प्रद्युम्नः । मीनः केतनं ध्वजोऽस्य मीनकेतनः, मीनो जलचरोपलक्षणम् । कमव्ययं कुत्सायां कं दर्पोऽस्य कन्दर्पः । दर्पयति दर्पकः । कामयतेऽनेन कामोऽस्त्यस्य वा । स्मरन्त्यनेनेति स्मरः पुंसि संज्ञायां घः प्रायेण । शम्बरोऽसुरस्तस्यारिः । मनसि जायते मनसिजः, हलदन्तात् सप्तम्या अलुक् । न मनसोऽन्योऽनन्यस्तस्माज्जायतेऽनन्यजः । पुष्पाणि धनुरस्य पुष्पधन्वा, वा संज्ञायामित्यनङ् । आत्मना भवत्यात्मभूः । यद्वागुरिः शम्बरारिः स्वजः स्मरः । हृच्छयश्चैत्रसखः शृङ्गारयोनिः पुष्पकेतुश्च ॥ २५—६

मदयतीति मदनः ल्युः । मनो मथ्नातीति मन्मथः पृषोदरादिः । मदी हर्षे माद्यतीति मत्क्विप्, मथ्नातीति मथः मन्थ विलोडने अच्, मच्चासौ मथश्चेति मन्मथः इति सर्वानन्दः । मननं मत्चेतना क्विप् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपे तुक्, मथ्नातीति मथः, मतो मथो मन्मथ इति तु स्वामी । म्रियन्तेऽनेनेति मारः करणे घञ्, विरहिणं मारयति वा पचाद्यच् । प्रकृष्टं द्युम्नं बलमस्येति प्रद्युम्नः । मत्स्यजातित्वान्मकर एव मीनः स एव केतनमस्येति मीनकेतनः । के ब्रह्मणि तृ (द, ङ)-प्तवान् कं ब्रह्माणं त(द, ङ)र्पितवान् वा कन्दर्पः पृषोदरादिः । कमव्ययं कुत्सायां कं दर्पोऽस्येति वा कन्दर्पः । दर्पयतीति दर्पकः । अविद्यमानमङ्गमस्येत्यनङ्गः । कामयत इति कामः पचाद्यच्, काम्यतेऽनेनेति वा पुंसि संज्ञायामिति घः । उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा । सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः ॥ एते पञ्चशरा अस्येति पञ्चशरः । पञ्चेन्द्रियार्थाः शरा अस्येत्यन्ये । स्मरयति उत्कण्ठयति स्मरः पचाद्यच्, स्मर्यतेऽनेनेति वा घः ॥ सम्बरणं सम्बरस्तस्यारिः सम्बरारिः । दैत्यपक्षे संवृणोत्याच्छादयति पचाद्यच्, सम्बरो दन्त्यादिः । क्लीवं तु सम्बरं नीरबौद्धव्रतविशेषयोः । विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य चेति दन्त्यादौ रभसः । दैत्यानां शं कल्याणं वृणोति शमि (३. २. १४) धातोरित्यादिनाऽच्, शम्बरस्तालव्यादिः । तथा च तालव्यादौ मेदिनिः– शम्बरं सलिले पुंसि मृगदैत्यविशेषयोरिति । तस्यारिः शम्बरारिरिति च । वर्णदेशनायामपि पक्षद्वयं दर्शितम् । शृङ्गाररूपेण मनसि जायते मनसिजः सप्तम्यां जनेर्डः, तत्पुरुषे कृतीत्यलुक्, लुकि तु मनोजः । कुसुमानी-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षवोऽस्य कुसुमेषुः। न मनसोऽन्यस्माज्जायतेऽन्यजः। न विद्यतेऽन्योऽस्मात् सोऽनन्यो विष्णुः सर्वं विष्णुमयं जगदिति कृत्वा तस्माज्जातोऽनन्यज इति वा। पुष्पं धनुरस्य पुष्पधन्वा वा संज्ञायामित्यनङ्, पक्षे पुष्पधनुः सान्तोऽपि द्रुतमेत्य पुष्पधनुषो धनुष इति माघः। रतेः पती रतिपतिः। मकरो जलजन्तुविशेषो ध्वजोऽस्येति मकरध्वजः। आत्मना भवत्यात्मभूः, पूर्ववत् क्विप् ॥ २५—६

(कन्दर्पः। कामार्दितः प्रजापतिः स्वसुतां चकमे इति पुराणम्, च.

एवमेव वृन्दावनयमकटीकाकारमधुमाधव्यादयः, न तु भगीरथोक्ता उन्मादनशोषण-प्रतापन-प्रक्षोभण-दहननामानः, एतन्मते सम्मोहननामानुक्तेः' 'सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाण'मिति कुमारप्रयोगासङ्गतेः, त.

सम्बरारिर्दन्त्यादिः, तथाहि साहित्यकल्पतरुणा श्रीबिब्बोकेन वासनामञ्जर्यां पठितं— 'स जयति मानसजन्मा रसवन्मारो मुनेरनङ्गाख्यः। रुद्रस्य सम्बरारिः पुष्पवतीनां कुसुम-धन्वा' इति।······वर्णादेशनायां पक्षद्वयमपि दर्शितम्, न.

पुष्पधन्वा वकारवान् तथा च—'एत पश्यत मृगीदृशो यशोवल्लिरुल्लसति पुष्पधन्वनः। भूतभर्तरि दिगम्बरे वरे भूधरेन्द्रतनयानुरज्यते।' पुष्पकेतुरपि, 'शतमखमुपतस्थे प्राञ्जलिः पुष्पकेतु'रिति कुमारे, ज.

ब्रह्मसूर्ऋष्य (विश्व) (ऋश्य) केतुः स्यादनिरुद्ध उषापतिः।
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७

ब्रह्म ज्ञानं सूयते ब्रह्मसूः। ऋष्यकेतुः ऋष्यनामा मृगः केतुरस्य। ऊषा बाणदुहिता। बलादयो विष्णोर्भ्रातृपुत्रपौत्राः। यद्वागुरिः ब्रह्मसूर्ऋष्यकेतुश्च विष्वक्-सेनात्मजात्मजः। संहितासु त्वेकं ब्रह्म वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यया चतुर्व्यूहा-त्मकमाहुः, विश्वकेतुरित्यपि पाठः॥ लक्ष्यते लक्ष्मीः लक्षेर्मुट् चेतीप्रत्यायान्तः, अतएव हल्ङ्याब्भ्यो दीर्घात्स्विति सुलोपाभावः (६. १. ६८)। पद्मं विद्यतेऽस्या पद्मा अर्शआदित्वादच्। एवं कमला। श्रयतीति श्रीः क्विब्वचिप्रच्छीति क्विब्दीर्घौ। मा रमाऽब्धिजाऽपि ॥ २७

ब्रह्म तपः सुवति चालयति ब्रह्माणं सुवति प्रेरयति वा ब्रह्मसूः, सू प्रेरणेऽन्ये-भ्योऽपोति क्विप्। विश्वव्यापी केतुर्ज्योतिरस्येति विश्वकेतुः। पताकायां द्युतौ केतुर्ग्रहोत्पातारिलक्ष्मस्विति रभसः। क्वचिदृश्यकेतुरिति पाठः। खङ्गायुधोऽनिरुद्धः स्यात्तथाचैवर्श्यकेतन इति शाम्बपुराणात्। तथा च एणः कुरङ्गमो रिश्यः स्यादृश्य-श्चारुलोचन इति पुरुषोत्तमः। ध्वजनिर्णयस्यालौकिकत्वात्तस्य स प्रमाद इति हट्टचन्द्रः। ब्रह्मस्वादिनामचतुष्टयमनिरुद्धस्य इत्येके। अनिरुद्धो विश्वकेतुर्ब्रह्मसूरप्युषापतिरिति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बृहदमरकोषात् ब्रह्मसूरनिरुद्धः स्यादिति शब्दार्णवाच्च। आत्मभूर्ब्रह्मसूः काम इत्यमरमालादर्शनात् कामदेव एवोक्तत्वात् कामस्यैव नामेत्यपरे। एकविंशतिर्नामानि कामदेवस्य॥ युद्धे केनापि न निरुद्धोऽनिरुद्धः। उषायाः पति उषापतिः मूर्द्धन्यमध्यः, ऊषा बाणस्य पुत्री स्यादनिरुद्धगृहिण्युषेत्यजयकोषदर्शनाद्दीर्घादिरपि। द्वे नामनी अनिरुद्धस्य। लक्ष्मीरित्यादि॥ लक्षयति पश्यतीति नीतिशालिनं लक्ष्मीः लक्ष दर्शनाङ्कयोः लक्षेर्मुट्चेति ईकारप्रत्ययो मुडागमश्च, अतएव ङ्यन्तत्वाभावान्न सुलोपः। पद्ममालयोऽस्या पद्मालया। पद्मं विद्यते अस्याः पद्मा अर्शआद्यच्, एवं कमला। उभयोरुपादानादन्यपद्मपर्यायेणानभिधानं सूचितम्। श्रयतीति श्रीः श्रिञ् सेवायां क्विब्वचीत्यादिना क्विब्दीर्घः संप्रसारणनिषेधश्च। श्रीलक्ष्म्यौ कृदिकारादित्यत्र (४. १. ४५.) सावर्ण्यग्रहणात् ङीषत्वे अपीति मैत्रेयः। तां दृष्ट्वा श्रीमिवायान्तीमिति, लक्ष्मी लक्ष्मीपतेरित्यादिप्रयोगः। हरेः प्रिया हरिप्रिया। षण्णामानि लक्ष्म्याः॥ शङ्ख इति॥ २७

विदग्धमुखमण्डने (धर्मदासेन, ज, य) रुद्रदासेन, द., फ.

किं वदन्ति तपोभङ्गकारिणं यतीनां जनाः। न स्वीकुर्वन्ति किं सन्तः सर्वधर्मविशारदाः इत्यत्र ब्रह्मस्वमित्युत्तरम्, च.

(अस्य) 'बलवद्दृश्याद्दृश्या स्थली, इति वृन्दावनयमकम्।......तथा च 'बाला निदाघलक्ष्मीव तापयत्येव केवलं', 'हे लक्ष्मि नैव वचनीयमिदं भवत्याः', 'मातर्लक्ष्मि भजाव कञ्चिदपरमि'ति। धातुपारायणे लक्ष्मीप्रभृतीनामङ्यन्तत्वान्न ह्रस्वत्वमित्याह। प्रयोगोऽपि 'हे लक्ष्मीः स्याः दरिद्राणां मावीः संस्पृश मे वपुः। तन्त्रीः कर्णामृतं कूज तन्द्रीः संश्रय चक्षुषी॥ वातप्रमीर्वसाटव्यां स्तरीस्तर्पय चातकम्। ययीर्भ्राम्य पपीः प्राप तरीर्धत्स्व नवांशुकम्॥ हे जम्बूः फल कर्कन्धूर्यवागूर्भज भाजनम्। चमूः पालय भूपालं तनूस्त्वं निरुजीभव। वधूः सेवय सच्छोलं कर्पूः शीतं विनाशय। कण्डूः खर्जूः क्षयं जातं धनूस्त्वं विद्धि शात्रवम्॥' इत्यादि, ज.

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः।
कौमोदकी गदा, खड्गो नन्दकः कौस्तुभो मणिः॥ २८

पाञ्चजन्यः पञ्चजने पाताले भवः बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यात् ञ्यः (४. ३ ५८) लक्ष्मीपतेरित्येव। सुखेन दृश्यते शासियुधीति युच् सुदर्शनः, पुंसि लोकाश्रयत्वाल्लिङ्गस्य यथा बन्धुरेष जगतां सुदर्शनः (शिशु १४. १६.) विष्णुः कुमोदकः शौरिरिति दुर्गपाठात् कुमोदकस्येयं कौमोदकी। संहितासु मेण्टा (ण्ठा) दौ कौपोदकीति पाठः कूपोदकाज्जातेत्याम्नायात्। नन्दयति नन्दकः। कुं भुवं स्तुभ्नाति व्याप्नोति कुस्तुभोऽब्धिस्तस्यायं कौस्तुभः॥ २८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समुद्रे तिमिरूपधारी पञ्चजनो नामासुरः प्रागासीत् तदस्थिजत्वात् बहिर्देवपञ्चजनेभ्य इत्युपसंख्यानात् ञ्यः, विष्णोः शङ्खस्य नामैकम्॥ चक्रमिति॥ लक्ष्मीपतेरेव सदा रिपूच्छेदं करोत्यनेन करोतेः के (६. १. १२ १.) द्वे चेति कप्रत्ययो द्विर्वचनञ्च चक्रम्। भक्तैः सुखेन दृश्यत इति भाषायां शासियुधिदृशिधृषिमृषिभ्यो युग्वक्तव्यः इति खलपवादो युच्। अभिरामत्वात् शोभनं दर्शनमस्येति वा सुदर्शनः सुदर्शनोऽस्त्रियाञ्चक्रे इति तु नामनिधानात् क्लीवत्वं च। एकम्॥ कौमोदकीति। लक्ष्मीपतेरित्येव। कौ पृथिव्यां मोदते सदा जययोगात् कौमोदकी बहुलमन्यत्रापीति वुन्। विष्णुः कुमोदकः शौरिरिति कोषान्तरात् कुमोदको विष्णुः तस्येयमित्यर्थेऽणि कौमोदकी। संहितासु तु कौपोदकीति पाठः कूपोदकाज्जातेत्याम्नायादिति स्वामी। देवास्त्रत्वाद् गदति सदा पचाद्यजन्ताट्टाप्, एकम्॥ खड्ग इति। लक्ष्मीपतेरित्येव। नन्दयति देवादीन् नन्दकः ण्वुल् एकम्॥ कौस्तुभ इति। लक्ष्मीपतेरित्येव ष्टुभ स्तम्भे कौ स्तोभते कुस्तुभो विष्णुः इगुपधत्वात् कः तस्येदमित्यणि कौस्तुभः। कुं भुवं स्तुभ्नाति व्याप्नोति कुस्तुभो हरिः तस्यायं कौस्तुभ इति स्वामी, एकम्॥ गरुत्मानित्यादि॥ २८

सुदर्शनोऽस्त्रियामिति हारावली। हरिवंशे च (बाणयुद्धे, म) 'पुनः कराग्रं कृष्णस्य चक्रं प्राप्तं सुदर्शनम्।' कुस्तुभो विष्णुरिति सर्वस्वम् (=म), च.

(कौमुदकी) कुमुदाख्यस्य दानवस्येयमिति भगीरथः, त.

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः॥ २९

गरुतः पक्षा अस्य गरुत्मान् झय इति वत्वं (८. २-१०.) यवादिपाठान्नास्ति। गरुद्भिर्डयते गरुडः, पृषोदरादित्वात् तलुक्, गिरति नागान् वा। तृक्षस्यापत्यं तार्क्ष्यः, गर्गादित्वाद्यञ्। विनताया अपत्यं वैनतेयः, स्त्रीभ्यो ढक्। सुपर्णो हेमपक्षत्वात्॥ २९

प्रशस्ता अतिशयिता वा गरुतः पक्षा अस्य मतुप् यवादिपाठाद्झय इति न वत्वम्। गरं विषं हन्ति गरुडः गरुद्भिर्डीयते गिरति नागं वा अन्येभ्योऽपि दृश्यते इति डः पृषोदरादिः गरुडः। क्वचित्कल्पे तृक्षस्य (२. ४. ६४.) मुनेरपत्यं तार्क्ष्यः गर्गादित्वाद् यञ् बहुत्वे यञञोश्चेति लुगिति तृक्षाः। विनताया अपत्यं स्त्रीभ्यो ढकि वैनतेयः। खगानामीश्वरः खगेश्वरः, न चात्र प्रतिपदविधाना षष्ठी न समस्यते इति वक्तव्यमिति (२. २. १०. १) समासनिषेधः शङ्कनीयः। यावता शेषलक्षणेवेयं षष्ठी नहि स्वाम्यादिसूत्रेण षष्ठी विधीयते, किन्तु सप्तम्यनेन विधीयमाना षष्ठ्या बाधिका माभूदिति चकारेण षष्ठ्याः प्रतिप्रसवः क्रियते, नत्वपूर्वतया विधानम्। एवंविध-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषये च समासः स्यादेव न निर्द्धारणे इति ज्ञापकात्। अन्यथा प्रतिपदविहितत्वान्न षष्ठ्याः समासो भविष्यति किं प्रतिषेधेनेति। नागानामन्तको नागान्तकः। रथस्थानीयत्वात् देहत्वाद्वा विष्णो रथो विष्णुरथः। तथा च त्रिकाण्डशेषः 'रथः पौरुषदेहयो'रिति। कनकमयत्वात् शोभनं पर्णं पत्त्रोऽस्य सुपर्णः। पन्नगानश्नाति अश भोजने ल्युः पन्नगाशनः। नव गरुडस्य॥ शम्भुरित्यादिः।॥ २९

तृक्षः कश्यप इत्यन्ये, च.

एवं पक्षिसिंहद्दुधाहरादि, त.

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः।
ईश्वरः श (स) र्व ईशानः शङ्करश्चन्द्रशेखरः॥ ३०

शं भवत्यस्माच्छम्भुः मितद्र्वादित्वाड्डुः। पशूनां सुरनरतिरश्चां पतिः शिवः श्रेयस्करत्वात्। ईष्टे ईश्वरः ताच्छील्ये स्थेशभासेति वरच्। महेश्वरो महोदधिवद् रूढः। शृणाति हिनस्ति शर्वः। ईशानः ताच्छील्ये चानश्। शङ्करः कृञो हेत्विति टः (३. २. २०)॥ ३०

शं कल्याणं भवते प्राप्नोति शम्भुः, भू प्राप्तावात्मनेपदी, आधृषाद्वेति न णिच्मितद्र्वादित्वाड्डुः, शं कल्याणं भवति अस्मादिति वा। ईष्ट इतीशः ईश ऐश्वर्ये इगुपधात्कः। स्कान्दे "पालयामि पशून् यस्मात् सृजामि च यदृच्छया। तेषाञ्च पतिरेवाहं तस्मात् पशुपतिः स्मृत इति पशुपतिः। पशुमृगादौ छगले प्रमथेऽपि पुमानयमिति तालव्यान्ते रभसः। पशवः प्रमथास्तेषां पतिः पशुपतिरिति तु कौमुदी। पशूनां सुरनरतिरश्चां पतिः तदुक्तं तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिषु पुंस्ययमिति स्वामी। शिवं कल्याणं तद्योगात् लोकानां शिवकारित्वाद्वा शिवः अर्शआद्यच्। शूलमस्यास्तीति अत इनिः शूली। महांश्चासौ ईश्वरो महेश्वरः सन्महेत्यादिना समासः, आन्महेत्यादिना (६. ३. ४६) आत्वम्। ईशितुं शीलमस्येति ईश्वरः, स्कान्दे 'ईश एवाहमत्यर्थं न च मामीशते परः (रे ?)। ददामि च सदैश्वर्यं ईश्वरस्तेन कीर्तित' इति॥ स्थेशभासेत्वादिना वरच्। प्रलये शृणाति सर्वं, शॄ हिंसायां कॄगॄशॄदॄभ्यो वः (१. १५५.) शर्वस्तालव्यादिः। अर्वशर्वसर्वहिंसायामित्यतः पचाद्यचि सर्वो दन्त्यादिरपीत्युपाध्यायसर्वस्वम्। अतएव सर्वस्तु शर्वो भगवान् शम्भुः कालञ्जरः शिव इति नामनिधानम्। ऐश्वर्यसामर्थ्यादीशानस्ताच्छील्यवयोवचनेत्यादिना चानश्। शश्वद् भूतानां शं कल्याणं करोतीति शङ्करः। तथा च स्कान्दे—'शङ्करोमि सदा ध्यानात् परमं यन्निरामयम्। भूतानामसकृद्यस्मात्तेनाहं शङ्करः स्मृत' इति। शमि धातोः संज्ञायामित्यच्। चन्द्रः शेखरोऽस्य चन्द्रशेखरः॥ ३०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्भूरिति दन्त्यादिर्दीर्घान्त इति टीकान्तरम्।......गौरीव सर्वान्तःपुरप्रधानेति वासवदत्ता। तालव्य ईशे शङ्करः स्यान्मेलके तु सङ्करो दन्त्यादिरिति गदसिंहः, च.

चन्द्रेणेव शर्वरीति हारिणीति वासवदत्ताश्लेषतस्तालव्यादिश्च। शर्वर्या ईतिरुपद्रवः, ज.

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः॥ ३१

गिरिं श्यति उपभोगेन तनूकरोति गिरिशः। गिरिर्वाऽस्यास्तीति लोमादित्वाच्छः गिरौ शेते वा गिरौ डः छन्दसि, लोके त्वाशुशुक्षणिवत्। मृडयति सुखयति मृडः। मृत्युं जयति मृत्युञ्जयः, संज्ञायां भृतॄवृजीति खच्। कृत्तिश्चर्म वासोऽस्य कृत्तिवासाः॥ ३१

भूतानां प्रमथादीनामीशो भूतेशः। गजासुरवधे खण्डः परशुरस्य खण्डपरशुः, खण्डयतीति खण्डः परशुरस्येति वा चतुरच्कोऽप्ययं खण्डपर्शुः पर्शुरामे शङ्करे चूर्णलेपिनीति विश्वात्। गिरेः कैलासस्येशो गिरीशः। गिरौ शेते तिष्ठतीति गिरौ डश्छन्दसीति डे वा गिरिराश्रयत्वेनास्यास्ति लोमादित्वाच्छे वा गिरिशः। मृडति भूतग्रामं मृडः, मृड सुखने इगुपधत्वात्कः। मृत्युं जयति मृत्युञ्जयः संज्ञाया भृतॄवृजीत्यादिना खच्मुम्। कृत्तिश्चर्म वासोऽस्य कृत्तिवासाः सान्तः। पिनाको धनुरस्यास्तीति पिनाकी इनिः। प्रमथानां गणानामधिपः प्रमथाधिपः॥ ३१

(कृत्तिवासाः) अदन्तोऽपि 'ये नमस्यन्ति तं देवं कृत्तिवासाख्यमव्यय' मिति लिङ्गपुराणात् (पाद्मात्, त), ज.

उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः॥ ३२

उच्यति क्रुधा समवैत्युग्रो रौद्रत्वात् (रक्ताङ्गत्वाच्च, क)। श्रीः शोभा कण्ठेऽस्य श्रीकण्ठः। नीलगलत्वात् शितिकण्ठः शितिर्नीलः कण्ठोऽस्य। वामः श्रेष्ठो देवः संसारे वामाद्वा। विरूपाणि त्रित्वादक्षीण्यस्य विरूपाक्षः, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्॥ ३२

उच्यति रौद्रत्वात् क्रुधा समवैति उद्धतः सर्वोपरि वर्तते वा उग्रः, उच समवाये ऋज्वेन्द्राग्रादिना रन् (उ. २. २८; रक्, गघङ)गश्चान्तादेशः। कपर्दो जटाबन्धोऽस्याऽस्तीति कपर्दी इनिः। कालकूटभक्षणात् श्रीः शोभा कण्ठेऽस्य श्रीकण्ठः। धृतं कण्ठे विषं घोरं ततः श्रीकण्ठतामियादिति नीलकण्ठस्तवः। अतएव शितिः कालः कण्ठोऽस्येति शितिकण्ठः। ब्रह्मकपालं बिभर्ति कपालभृत्। लोकाचारविपरीतत्वाद वामः, टुवम उद्गिरणे घञि नोदात्तोपदेशेत्यादिना वृद्धिनिषेधे प्राप्ते अनाचमिकमिवमीनामित्यादिना (७. ३. ३४. १) निषेधः। वामः सुन्दरो देवः वामदेवः। संसारवामत्वाद्वेति स्वामी। एवं महांश्चासौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवश्चेति महादेवः सर्वदेवानां महनीयत्वात् महत्त्वाच्च महादेवः तथा च साम्बपुराणं—"पूज्यते यः सुरैः सर्वैर्महांश्चैव प्रमाणतः। धातुर्महेति पूजायां महादेवस्ततः स्मृत" इति॥ स्कान्देऽपि, "महतामपि देवानामहमेव महान् यतः। न तु मत्तो महानन्यो महादेवस्ततो ह्यह"मिति॥ रविचन्द्राग्निरूपत्वात् विविधरूपाण्यक्षीण्यस्य त्रिनेत्रत्वाद्वा विरूपाक्षः, बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्। त्रीणि लोचनान्यस्य त्रिलोचनः॥ ३२

कृशानुरेताः सर्वज्ञो धुर्जटिर्नीललोहितः।
हरः स्मरहरो भर्ग (र्ग्य) स्त्र्यम्बकस्त्रिपुरान्तकः॥ ३३

कृशानौ रेतोऽस्य कृशानुरेताः, देव्या सोढुमशक्यत्वादग्नौ हि क्षिप्तं रेतः, अतएव पावकिः कुमारः। धूर्गङ्गा जटास्वस्य धूजटिरिति निरुक्तम्। नीलः कण्ठे लोहितश्च केशाऽतो नीललोहित इति पुराणम्। हरत्यघं हरः हरतेरनुद्यमनेऽच्। बिभर्ति भर्गः, भृज्यन्तेऽनेन कामकालादयो वा। त्रीण्यम्बकान्यक्षीण्यस्य त्र्यम्बकः, त्रयाणां लोकानाम् अम्बकः पितेत्यागमः। तिस्रोऽम्बा द्युभूम्यापोऽस्येति (भारतं, क; स्मरन्त,: ख)॥ त्रिपुरीति भाष्यदर्शनेऽपि लोकाश्रयत्वात् त्रिपुरं पात्रादौ॥ ३३

कृशानौ रेतोऽस्य कृशानुरेताः, देव्या सोढुमशक्यत्वादग्नौ क्षिप्तमस्य रेतः अतएव कुमारः पावकिरिति स्वामी। सर्वं जानाति सर्वज्ञः कः। जट झट संघाते सर्वधातुभ्य इतीन्, जटिर्जटी शिला शिलीति द्विरूपकोषः। धुरस्त्रैलोक्यचिन्ताया जटिः संघातोऽत्र धूर्जटिः। धूर्गङ्गा जटा अस्य पृषोदरादित्वादाकारस्येत्वमिति स्वामी भ्रान्तः उक्तरूपेण जटिसाधनात्, धूर्भारभूता जटिर्जटा अस्येति तु कौमुदी। जुह्वतो ब्रह्मणो ललाटे स्वेदो जातस्तन्माहेश्वरन्तेजोऽध्यतिष्ठत्, तच्चाग्नौ निपत्य नीलं भूत्वा लोहितं बभूव, ततोऽयं जात इति नीललोहित इति पौराणिकः। स्कान्दे "नीलं येन ममाङ्कं तु रसाक्तं लोहितं त्विषा। नीललोहित इत्येवं तेनाहं परिकीर्तित" इति वा। (नीलः कण्ठो लोहिताश्चकेशा इति स्वामी, ङ). प्रलये कृत्स्नं हरति हरः, पचाद्यच्। पृषोदरादित्वादीत्वे हीरोऽपि 'हीरः कपर्दी च शिवो दक्षयज्ञहरो हरः,' इति संसारावर्तात् (हड्ड, च, ज)। स्मरं हरति स्मरहरः, हरतेरनुद्यमनेऽच्। भर्जति भर्गः पचाद्यच् न्यङ्क्वादित्वात्कुत्वं भृज्यन्तेऽनेन कालादयो वा घञ् भर्गः। भृज्यते पच्यते जगदत्रेति वा भ (भा, ग) र्ग्य इति पाठे ऋहलोर्ण्यत् चजोः कुघिण्यतो (७. ३. ५२) रिति कुत्वम्। बहुभिस्तु भर्ग इत्येव मूलपाठः स्वीकृतः। त्रीण्यम्बकान्यक्षीण्यस्य त्रयाणां लोकानामम्बकः पिता वा त्र्यम्बकः तिस्रोऽम्बा द्योभूम्यापोऽस्येति तु भारतम्। त्रयाणां पुराणां समाहारः त्रिपुरं, पात्रादिस्तस्यान्तकः त्रिपुरान्तकः॥ ३३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भर्ग्य इति साञ्जः, ज. धूर्जटी नान्त इति केचित्, च.

धूर्गङ्गा भारो जटायामस्येति धूर्जटिरिति निरुक्तमिति मधुमाधवः, संज्ञायामिति समासान्त इति साञ्जः, जटा समानार्थो जटिरित्यन्येन.

नयनाम्बकंनेत्राक्षिचक्षुरीक्षणलोचनमिति जटाधरः, त.

गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः॥ ३४

गङ्गाया धरश्चक्रधरादिवत्, अन्यथा कर्मण्यण् संज्ञायां भृ तृ इति खज्वा स्यात्। अन्धकनामाऽसुरस्तस्य रिपुः। क्रतुं दक्षयज्ञं ध्वंसतेऽवश्यं क्रतुध्वंसी। व्योम द्यौः के मूर्ध्नि शेतेऽस्य व्योमकेशः, शीर्ष्णो द्यौः समवर्ततेति श्रुतेः, गङ्गां धारयितुं व्योमव्यापिनोऽस्य केशा वा। भवत्यस्मात् विश्वं भवः। बिभ्यत्यस्माद्भीमः, भीमादयोऽपादाने। तिष्ठतीति स्थाणुः। रोदनाद् रुद्रः सोऽरोदीत् यदरोदीत् तद् रुद्रस्य रुद्रत्वमिति श्रुतेः। रोदयत्यरिस्त्रोर्वा रोदेर्णिलुक्। अहिर्बुध्नोऽष्टमूर्तिर्गजासुरारिश्च। महानटो देश्याम्। शिपिविष्टो वृषाकपिर्भैरवो नानार्थे॥ ३४

धरति धरः पचाद्यच्। गङ्गाया धरः गङ्गाधरः अन्यथा तु कर्मण्यण्, संज्ञायां भृतृ इति खज्वा स्यात्। अन्धकस्य दैत्यस्य रिपुः अन्धकरिपुः। दक्षयज्ञध्वंसनात् क्रतुध्वंसी नान्तः। वृषो ध्वजश्चिह्नमस्येति वृषध्वजः। गङ्गाधरणाय व्योमव्यापी केशोऽस्य व्योमकेशः। व्योम द्यौः के मूर्ध्नि शेतेऽस्य वा, शीर्ष्णो द्यौः समवर्ततेति श्रुतेः अन्येभ्योऽपीति डः, व्योमकेशः। भवत्यस्मादिति भवः। बाहुल्यादप्। विश्वमस्त्यस्मिन्निति वाऽस्त्यादेशात् भुवोऽप्। श्रिणीभुव इत्यत्र श्रिणीसाहचर्यात् भुवो भौवादिकादेव घञ्। बिभेत्यस्मात् महाभैरवरूपाद्भीमः, भीमादयोऽपादाने इति साधु। प्रलये तिष्ठतीति स्थाणुः स्थो णुरिति (३. ३७) णुः। रुद्र उक्तः, सर्वगतरुजां द्रावणात् रोदनहननाद्वा रुद्रः। तथा च स्कान्दे—रुजः सर्वगतो यस्मात् द्रावयामि जगत्यहम्। रोदनं हन्मि यस्माच्च रुद्रस्तस्मादहं प्रिय इति। उमायाः पतिः उमापतिः। अष्टचत्वारिंशच्छम्भोः। कपर्द इत्यादि॥ ३४

केचित्तु भोलानाथो महेश्वर इति क्षीरस्वामी, भोला गणविशेष इति, च

व्योम्नि कायन्ति व्योमका देवास्तेषामीश इति, कृष्णदासः।......स्थाणुः कीलकशूलिनोरित्युणादिवृत्तिः, त, य.

कपर्दोऽस्य जटाजूटः पिनाकोऽजग (क) वं धनुः।
प्रमथाः स्युः पारिषदाः ब्राह्मीत्या (ब्रह्माण्या) द्यास्तु मातरः।
विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा॥ ३५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कं शिरः पिपर्ति कपर्दः औणादिको दः॥ अस्य धनुः पिनह्यते पिनाकः, शूलार्थोऽप्यनेकार्थेषु वक्ष्यते। अजगवे विप्रतिपत्तिः। गाण्ड्यजकात् संज्ञायामिति (५. २. ११०) मत्वर्थे वे अजकवमिति भाष्यम्। अथाजगवोऽस्थिविकारस्तदाणि वृद्धिः स्यात् यत् कात्यः धनुर्वदन्त्याजगवं पिनाकिकरगोचरम्। प्राच्यास्तु गाण्डाजगादिति पेठुः। अजगवं धनुः प्रोक्तमिति पाश्चात्याः (पठन्त्यपीदम्, क)। प्रमथ्नन्ति प्रमथाः अच्। परिषदि साधवः पारिषदा भक्ताः, ण इति प्रकृते परिषदो ण्य इति योगविभागात् णः। सङ्घाते प्रमथे गण इति गणा अपि॥ अस्याष्टौ परिवारत्वेन मान्ति वर्तन्ते मातृनाम्न्यः। ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा। कौमारी चर्ममुण्डा च कालसङ्कर्षणीति च॥ ब्रह्माणीत्यनुगागमाभावाच्चैव प्रसिद्धं नाम। कथञ्चिज्जातित्वाद् ब्राह्मोऽजाताविति (६. ४. १७१.) ब्राह्मीत्याद्या इत्येके पेठुः। यद्वाागुरिः ब्राह्मयाद्या मातरः स्मृताः। रेवत्यो देश्याम्॥ भवनं भूतिः। अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यं ईशिता वशिता ईशस्य यत्र कामावसायितेत्यष्टधैश्वर्यम्। भूतिविभूतो समानार्थे लोचनविलोचनवत्॥ ३५

अस्य जटाजूटो जटाबन्धः: पर्व पूरणे सम्पदादित्वात् क्विपि राल्लोप इत्यन्त्यलोपः, कस्य गङ्गाजलस्य परा पूरणेन दायति शुध्यतीति कपर्दः, दैप्शोधने सुपीति योगविभागात् कः। कस्य जलस्य पूः पूरणमिति पृषोदरादित्वादूकारस्याकार इति त्वन्यः। के शिरसि पर्दते शब्दायते वा कं शिरः पिपर्ति कपर्दः औणादिको द इति तु स्वामी। जटानां जूटो बन्धः झुटिझुंट इति ख्यातः हरजटाबन्धनस्यैकम्॥ पिनाक इत्यादि। त्रिपुरदाहे शरानलज्वालाजालेन नाकमपि पिहितवानिति पिनाकः। निजभासा पिहितनाको वा। अपिरेव पिहितार्थवाचो पृषोदरादित्वात् पूर्वनिपातोऽकारलोपश्च। यद्वा पातीति पिनाकः पिनाकादयश्चेति पातेराकः नुमागम इत्वञ्च निपात्यते। अजो विष्णुः को ब्रह्मा तावत्र स्त इति गाण्ड्यजकात् संज्ञायामिति वः, निपातनाद्गत्वं, अजगवं अजकवमिति तु भाष्यं, तन्मते सूत्रेऽपि ककारः। प्रज्ञादित्वादणि आजगवमिति दीर्घाद्यपि। तेन शार्ङ्गं धनुर्मुरारेराजगवमजगवं पिनाके इति वोपालितः, स्थाणोर्धनुराजगवमित्यमरमाला (नाममाला, म) च। कपक्षे अन्येषामपि दृश्यत इति दीर्घत्वे अजकावमित्यपि धनुस्त्वजगवं युग्ममजकावमजाकवमिति शब्दार्णवात्। शिवधनुषो द्वे नाम्नी॥ प्रमथा इत्यादि। अस्येत्येव। अस्य पारिषदा रुद्रद्वेषिणं प्रमथन्ति प्रमथाः मथ विलोडने पचाद्यच्। परिषदि साधवः पारिषदाः परिषदो ण्य इति योगविभागाद् णः ण्ये तु पारिषद्य इत्यपि। पर्षदो ह्यच्कत्वं, ततः पार्षदपार्षद्यावपि, भूताः शिवस्य पार्षदा इति संसारावर्तादेः। स पार्षदैरम्बरमापुपूर इति जाम्बवत्यां पाणिनिः। द्वे शिवानुचराणाम्॥ ब्राह्मीत्यादि॥ अस्य मातरो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मादीनां स्वेदनिर्गतत्वात् तस्येदमित्यण्, ब्राह्मो जाताविति टिलोपे ब्राह्मी। ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा। कौमारीत्यपि चामुण्डा चर्च्चिकेत्यष्ट मातरः॥ तथा च भट्टस्वामी—अस्याष्टौ परिवारत्वेन मान्ति वर्तन्ते मातरः इति। सर्वधरादयस्तु चामुण्डीचर्च्चिकाशब्दावपनीय कौवेरीति पठित्वा सप्त मातर इत्याहुः। ब्रह्माण्याद्यास्तु मातरः इति पाठे ब्रह्माणमणति कीर्तयतीति अण रणेति दण्डकधातोः कर्मण्यणि ङीपि ब्रह्माणी। ब्रह्माण्याद्याः स्मृताः सप्त देवतामातरो बुधैरिति हलायुधः। ब्रह्मादिशक्तिदेवतानामेकैकम्॥ विभूतिरित्यादि॥ विशेषेण भूतिर्भवनमस्यां विभूतिः, एवं भूतिः। भवतेः स्त्रियां मन्ते वृषेषपचमनविदभूवोरा उदात्त इति क्तिन् (३. ३. ९६.) भूतिरित्युक्त्वा विभूतिरित्यन्यप्रादिनिवृत्त्यर्थं कामो (मौ, ङ) विभूति-र्भूतिश्चेत्याह॥ ऐश्वर्यमित्यादि। अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशिता वशिता चैव तथा कामावशा (सा, ङ)यिता॥ तत्र अणिमा अणुत्वं येन सूक्ष्मो भूत्वा विचरति। लघिमा लघुत्वं येन वायोरपि लघुतरो भवति। प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शः। प्राकाम्यमिच्छानभिघातः। महिमा महत्त्वं येन भुवनेऽपि न सम्माति। ईशिता प्रभुत्वं येन स्थावरादिसर्वभूतान्यादेशकारीणि भवन्ति। वशिता यया भूमावपि जलवन्मज्जनोन्मज्जनम्। कामावशायिता सत्यसङ्कल्पता, शीङो णिनिः। सर्वानन्दस्तु कामावसायितेत्येनेकार्थत्वाद्धातूनां स्यतिरिह तिष्ठत्यर्थ इति वदन् दन्त्यमध्यं मन्यते। एतदेव युक्तं मन्यामहे। बहुषु प्रयोगादैश्वर्यमपि नाम। विभूतिर्भूतिरिति शम्भुधृतभस्मनो नामद्वयमित्यन्यः। अणुत्वाद्यष्टप्रभावस्य नामत्रयम्। उमेत्यादि॥ ३५

केचित् तु जूट इति नामान्तरम्। अतएव शम्भोर्जूटे नवशशिकला संश्रयन्ती विरेजे इति राघवपाण्डवीये।......अतएव रत्नकोषे स्थाणोराजगवं धनुः, भाषावृत्तौ पुरुषो-त्तमोऽप्येवम्।......कामेनेच्छया अवशायितुं शीलमस्य तस्य भावः अनेकार्थत्वात् सत्य-सङ्कल्पतेति सुभूतिः, च.

जूटो बन्धसमूहयोरिति वर्ग्यादौ गङ्गाधरः।......आदिवृद्धौ अन्तवृद्धौ वृद्ध्यभावे च आजगवं अजगावं अजगवमिति रूपत्रयम्।......ब्रह्माणी साभिधीयते इति देवीमाहात्म्यम्, च, ज.

जूटो बन्धनविशेषः झुटा (एटा, थ.) इति ख्यात इति सारमञ्जरी, समूह इति सर्वस्वम्।......(अजगव......) ओष्ठ्यो वः, त. (वो दन्त्यः, च.)

उमा कात्यायनी गौरी काली हैमवतीश्वरा (री, ङ)।
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका॥ ३६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उमेति मात्रा तपसो निषिद्धेति उमा। कात्यशब्दाद् गर्गादियञन्तत्वात् लोहितादिकतन्तेभ्य इति ष्फः (४. १. १८.) षित्वात्ङीष्कात्यायनी। हिमवतोऽपत्यं हैमवती। ईष्टे तच्छीला ईश्वरा स्थेशभासेति वरच्। अश्नुतेराशुकर्मणि वरट् चोपधाया ईच्च (५. ५०.) इतीश्वरी॥ शिवा स्वतः श्रेयस्करीत्वात् शिववत्। यच्छाश्वतः शिवं भद्रं शिवः शम्भुः शिवा गौरी शिवाऽभया। पुंयोगे शिवस्य पत्नी शिवी। भवस्य स्त्री भवानी, इन्द्रवरुणभवेति ङीषानुकौ। एवं शर्वाण्यादि। अपर्णा तपसि पर्णानामप्यनशनात्। दुःखेन गन्तुं शक्यतेऽस्यामिति दुर्गा, सुदुरोरधिकरणे चेति डः। चण्डी कोपना, बह्वादित्वात् ङीष्। इकः के ह्रस्वे अम्बैवाम्बिका। जगन्माता अर्या भैरवी सती दाक्षायणी च। गणनायिका देश्याम्॥

उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगामेत्युमा (कुमार. १. २६)। यद्वा अवति मन्प्रत्यये रक्षत्यस्यापत्यमिति अविसिविसिशुषिभ्यः किदिति (उ. १. १४३.) कित्त्वे ज्वरत्वरेति बाहुलकाद् ह्रस्वत्वे च उमा। क्वचित् कल्पे श्रीर्महेश्वरस्य मा लक्ष्मीरिति वा। तस्यापत्यमिति गर्गादित्वाद् यञ् (४ १. १०५.) ततः सर्वत्र लोहितादिकतन्तेभ्य इति ष्फः, षित्वात् ङीष् कात्यायनी। गौरी गौरादित्वात् ङीष्, तथा च स्कान्दे—"इच्छामि देव दिव्यञ्च वपुः कनकसुप्रभम्। गौरीति लोके ख्याता च भवेयं कमलोद्भवे"ति॥ अवस्थाभेदेन काली जानपदेत्यादिना ङीष्, वर्णस्याविवक्षायां काला "उमा कात्यायनी दुर्गा काली हैमवतीश्वरी। काला कालञ्जरी गौरी (रे, घ)"ति वाचस्पतिः। हैमवती तस्यापत्यमित्यण्। ईष्टे स्थेशभासेति वरच् टाप् ईश्वरा। अश्नुतेराशुकर्मणि वरट् चेचादेरिति टित्वात् ङीपि ईश्वरी। ईश्वरः शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरेति वोपालितः। शक्तिशक्तिमतो-(शिवशक्त्यो, ङ) रभेदात् श्रेयस्करीत्वाद्वा शिवा। पुंयोगे शिवीति स्वामी। भवस्य स्त्री भवानी, इन्द्रवरुणेत्यादिना ङीषानुकौ। एवं रुद्राणी शर्वाणी मृडानी। सर्वाणि मङ्गलान्यस्यां सर्वमङ्गला। तपस्यन्त्यानया स्वयं विशीर्णमपि पर्णं न भुक्तमिति न विद्यते पर्णमप्याहारो यस्या अपर्णा, जातेरित्यनुवृत्तेः पाककर्णपर्णेत्यादिना ङीष् (४. १. ६४.) न भवति। पर्वतस्यापत्यं पार्वती पूर्ववदण्। सर्वे गत्यर्था ज्ञानार्था इति दुःखेन गम्यते ज्ञायतेऽसाविति दुर्गा, अन्येभ्योऽपि दृश्यत इति डः। दुःखेन गन्तुं शक्यतेऽस्यामिति आधारविवक्षायां सुदुरोरधिकरणे ड इति तु माधवी। दुर्ग गिरिर्वनं वा निवासत्वेनास्यास्तीत्यर्शआद्यचि वा दुर्गनामासुरवधाद् वा, तथा च "तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्। दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति" इति मार्कण्डेयपुराणम्। अतिकोपनत्वात् चण्डिका दुर्गा, चडि कोपे। स्त्रियां बह्वादिभ्यश्चेति ङीबन्तः, संज्ञायामिति कन्, केऽण इति ह्रस्वः ण्वुल्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वा। जगन्मातृत्वादम्बैवाम्बिका संज्ञायां कन्। सप्तदश दुर्गायाः॥ विनायक इत्यादि॥ ३६

दन्त्यादेस्तु सर्वीत्येवेति सुभूतिः, च.

चण्डिः चण्डा चण्डी चेति तथा च 'हर पापं जगन्मातश्चण्डये ते नमो नमः', य.

अथवा उर्महादेवस्तस्य मा लक्ष्मीः उकारश्च महेश्वर इत्येकाक्षरकोषादिति सारमञ्जरी। कात्यः शिवस्तस्य स्त्री कात्यायनी। (शिवा) ओष्ठ्यो बः, त.

विन्यस्तमङ्गलमहौषधिरीश्वराया इति भारविः, न.

अजादित्वात् चण्डा गौरादित्वात् चण्डीति कृष्णदासवैकुण्ठौ, न.

विनायको विघ्नराजद्वैमातुरगणाधिपाः।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः॥ ३७

विगतो नायको नियन्ताऽस्य विनायकः, अन्येषां विनेता वा। अत एव विघ्नानां राजा नियन्ता। द्वयोर्मात्रोरपत्यं द्वैमातुरः (गाङ्गयोऽपि यतः, क) मातुरुत्संख्यासंभद्रपूर्वाया (४. १. ११५) इत्यण्, अन्त्यस्योत्वञ्च। प्रत्यूषे हेरम्बते शब्दायते हेरम्ब इति नैरुक्ताः देशीपदप्रायं तु मन्महे। गुहोत्पाटितदन्तत्वादेकदन्तः। आखुरथोऽपि॥ ३७

विघ्नानां विशिष्टानां नायको विगतो नायको नियन्ता अस्य वा अन्येषां विनेता वेति विनायकः ण्वुल्। तथैव विघ्नानां राजा नियन्ता विघ्नराजः राजाहःसखिभ्यष्टच्। दुर्गायाश्चामुण्डायाः पालितत्वात् द्वयोर्मात्रोरपत्यं द्वैमातुरः, मातुरुत्संख्यासंभद्रपूर्वाया इत्यण्, उत्वं रपरत्वञ्च। शिरोरहितो जातो हस्तिशिरसि योजित इत्यतो हस्तिन्या अपत्यत्वात् द्वयोर्मात्रोरपत्यमिति तु कौमुदी। गणानां प्रमथानामधिपो गणाधिपः। कार्त्तिकेयेनोत्पाटितदन्तत्वादेकदन्तः। हे शङ्करे रम्बते लम्बते वाल्य इति हेरम्बः, हे प्रत्यूहे (षे ?) रम्बते शब्दायते इति तु स्वामी। यद्वा हे शिवसमीपे रम्बते शब्दायते हेरम्बः, अबि रबि शब्दे, पचाद्यच्, तत्पुरुषे कृतीत्यलुक्। लम्बमुदरमस्य लम्बोदरः। गज आननमस्येति समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति गजाननः। गजाननमिवाननमस्येति उष्ट्रमुखवत् समासोत्तरपदलोपौ। अष्टौ गणपतेः॥ कार्त्तिकेय इत्यादि॥ ३७

बाणयुद्धे बलदेवेन मुषलेन एकदन्तो भग्न इति पद्मपुराणम्।······गज इव आननमस्य गजशब्दः अवयवपर इति सुभूतिः, च.

कार्त्तिकेयो महासेनः शरजन्मा षडाननः।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभू गुहः॥ ३८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृत्तिकानां बहुलाख्यानामपत्यम्। महती सेनाऽस्य महासेनः। शरवणे जन्मास्य शरजन्मा। षडाननः कृत्तिकानामग्निपत्नीनां षण्णां स्तनपानात्॥ स्कन्नं शुष्कं रेतोऽस्य स्कन्दत्यरीन्वा स्कन्दः। गूहते सेनां गुहः, कः॥ ३८

कृत्तिकानामपत्यं तत्पालितत्वात् कार्त्तिकेयः, महती सेना अस्य महासेनः, दन्त्यसः। शरवणात्जन्म अस्य शरजन्मा, नान्तः। कृत्तिकानामग्निपत्नीनां षण्णां स्तनपानार्थं षडाननः। पार्वत्या नन्दनः पार्वतीनन्दनः, ल्युः। स्कन्दति गच्छति शोषयति वा दैत्यान् स्कन्दः। तथा च वायुपुराणं—"स्कन्दिता दानवगणास्तेन स्कन्दः प्रतापवा"निति। स्कन्दिर् गतिशोषणयोः, पचाद्यच्। सेनां नयति सेनानीः, सत्सूद्विषेति क्विप्। पुरा किल तारकोपप्लुतदेवरक्षार्थं शिवेनाग्निरूपं स्वबीजं वह्निमुखे क्षिप्तं, तेनापि कृत्तिकासु क्षिप्तं, ताश्च दैवागतगर्भसत्रपाः शरवणं प्रविश्य प्रसूता, तेनाग्निभूरिति सर्वानन्दः। कौमुद्यान्तु तारकाभीतदेवरक्षाक्षमपुत्रोत्पादनाय देव्यां बीजमुत्सिसृक्षू रुद्रो गौरीगर्भजत्वादपत्यादतिबलाद्देवा भीरव इत्यग्निना ज्ञापितो भूमौ रेतोऽक्षिपत्, देवीशापात् स गर्भोऽग्नावेवाभूत्, स च तं गर्भं खिन्नो गङ्गायामक्षिपत्, सा च शरवणे कुमारमसृजत्, स च कृत्तिकादिभिर्नीत्वा पालित इत्यतोऽयमग्निभवत्वादग्निभूरित्युक्तम्। गूहति रक्षति सेनां गुहः, गुह संवरणे, इगुपधेति कः। ३८

सेनानीनामहं स्कन्द इति गीताप्रयोग आर्ष एव, त.

'भातिशाविष्कृता येन महती राजसेनया। तामेवमुक्त्वा स मायां महती राजसेनया' इति कीचकवधे, न.

बाहुलेयस्तारकजिद् विशाखः शिखिवाहनः।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः॥ ३६

विशाखासु जातो विशाखः, नक्षत्राल्लुग् बहुलम्। शिखी मयूरो वाहनमस्य शिखिवाहनः। षण्णां मातृणामपत्यं षाण्मातुरः। शक्तेर्धरः शक्तिधरः, अन्यथा शक्तिधरः, शक्तिधारो वा स्यात्। कुमारो ब्रह्मचारित्वात्, कुत्सितो मारोऽस्येति वा। क्रौञ्चो गिरिस्तेन ह्यस्य कैलासमस्त्रशिक्षार्थं गच्छतो मार्गो रुद्धोऽभूत्, तं दारयति क्रौञ्चदारणः, ल्युः। स्वामी च, गाङ्गेयोपि। भृङ्गी भृङ्गरिटिस्तण्डुनन्दिनौ नन्दिकेश्वरे। कर्णमोटी तु चामुण्डा चर्ममुण्डा च चर्चिकेति वक्तव्यम्॥ ३६

बहुलाः कृत्तिकास्तासामपत्यं बाहुलेयः, स्त्रीभ्यो ढक्। तारकं जयति तारकजित्, क्विप्। विशाखानक्षत्रेण युक्तः काल इत्यण्, तस्य लुबविशेष (४ २. ४.) इति लुप्, लुपि युक्तवद्व्यक्तिवचन इति प्रकृतिलिङ्गसंख्ये। ततो विशाखायां जात इति सन्धिवेलादीत्यण् (४. ३ १६.)। तस्य श्रविष्ठाफल्गुनीत्यादिना लुकि लुक् (४. ३. ३४.)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्धितलुकीति (१. २. ४९.) टापो लुकि विशाखः। शिखो मयूरो वाहनमस्य शिखिवाहनः, षण्णां मातृणामपत्यं षाण्मातुरः, द्वमातुरवत्। शक्तेर्धरः शक्तिधरः, अन्यथा अण्प्राप्तेः। वायुपुराणे—"यस्मात् क्रीडति सोऽत्यर्थं कुमारस्तेन कीर्तित" इति कुमार क्रीडायामिति धातोः पचाद्यच्। काम्यते इति कमेः किदुच्चोपधाया (उः ३. १३८) इत्यारन्प्रत्यये उपधायाश्चोत्वे कुमार इति तु व्याख्यामूलं सदा बालत्वाद्वा। तथा च स्कान्दे—"पुत्रस्ते भविता देवि महायोगबलान्वितः। सदाबलोऽथ सुभगो धर्मविद्धर्मवत्सल" इति नारदवचनात् षोडशवर्षदेशीयः, नत्वनूढतया कुमार इति प्रवाद आदर्तव्यः, यतोऽनेन देवसेना व्यूढा तथा च वायुपुराणे—"शतक्रतो रूपवती देवसेनेति या सुता। सा महेन्द्रेण रत्यर्थं भार्यात्वेनोपपादिता। उदीर्ण-सेनापतये महासेनाय सुव्रते"ति। क्रुञ्चेः किनि प्रज्ञाद्यणि क्रौञ्चमसुरं पर्वतं वा दारयति क्रौञ्चदारणः, दृ विदारणे ण्यन्ताल्ल्युः क्रौ (कौ, ग)ञ्चपर्वतं वा, तथा च "कैलासो धनदावासे क्रोञ्चः (कौञ्च, ङ) क्रौञ्चोऽभिधीयते" इति बृहद्धारावली। इहापि द्वैरूप्यम्। सप्तदश कार्त्तिकेयस्य। इन्द्र इत्यादि ॥ ३९

कुत्सितो मारः कामोऽस्य ब्रह्मचारित्वादिति चतुर्भुजः।......तथा च कादम्बर्यां—'षण्मुखचरितमिव श्रूयमाणक्रौञ्चवनितालापमच्छोदं नाम सर' इति, च.

इन्द्रो मरुत्वान्मघवा विडौजाः पाकशासनः।
वृद्धश्रवाः सु (शु) नासीरः (शुनाशीरः) पुरुहूतः पुरन्दरः ॥ ४०

इन्द्रः परमैश्वर्ययोगात्। मरुतो देवाः सन्त्यस्य मरुत्वान्, तसौ मत्वर्थ इति भसंज्ञायां पदकार्यं जश्त्वं नास्ति। मघः सौख्यमस्यास्ति मघवा। श्वन्नुक्षन्नित्यत्र तु निपातितस्य मघवन्नित्यस्य पक्षे सौ त्रादेशाद्दीर्घाभावान्मघवन् मघवा बहुलम् (६. ४. १२८)। वेवेष्टि विट् व्यापकमोजोऽस्य विडौजाः, विट्सु प्रजासु ओजोऽस्य पृषोदरादित्वाद्वृद्धिः, विड भेदने वा, विडं भेदकमोजोऽस्य। पाकानां दितिगर्भाणां शासनः। वृद्धे श्रवसी अस्य वृद्धश्रवाः, वृद्धेभ्यः शृणोति वा। शोभना नासीरा अग्रेसरा अस्य (शुः पूजायां श्वशुरवत्, ख) शुनासोरयोरपत्यमित्येके। पुरु प्रभूतं हूतं यज्ञेष्वाह्वानं यस्य पुरुहूतः। पुराण्यरीणां दारयति त्रिपुरं वा पुरन्दरः, वाचंयम-पुरन्दरौ चेति साधुः ॥ ४०

इन्दति परमैश्वर्यं करोति इन्द्रः, ऋज्रेन्द्रेत्यादिना रन्। मरुतो देवता अनुचरत्वेनास्य सन्तीति मरुत्वान्, मतुप् झय इति वत्वम्। तसौ मत्वर्थ इति भत्वात् पदकार्यं जश्त्वाभावः। मह्यते मह पूजायां श्वन्नुक्षन्पूषन् इत्यादिना कनिनि (उ. १. १२८.) मघवन्निति निपातितः। मघवा बहुलमिति पक्षे त्रादेशात् सौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीर्घाभावात् मघवन्नपि। हविर्जक्षिति निःशङ्को मखेषु मघवानसाविति भट्टिप्रयोगात् मघः सौख्यमस्तीति मतुबन्तोऽपि। एवं मघवा मघवन् मघवानिति त्रैरूप्यम्। वेवेष्टीति विट् विष्लृ व्याप्तौ क्विप्, विट् व्यापकं ओजोऽस्येति विडोजाः सान्तः। पृषोदरादित्वादकारागमे विडौजा इति च। विड भेदने इगुपधत्वात् कः, विडं दैत्यानां भेदकमोजोऽस्येति विडौजा इति स्वामी। बिडौजाश्च विडोजाश्चेति वर्णविवेके हड्डचन्द्रः। पाकं वृत्रभ्रातरं शासितवान् पाकशासनः, ल्युः। दितेर्गर्भमतिवलमसह्यं मत्वाऽन्तःप्रविश्यैकोनपञ्चाशत् खण्डान् कृतवान् इत्यतो वा। पाकानामर्भकाणां शासन इति तु कौमुदी। वृद्धेभ्यः शृणोति वृद्धश्रवाः असुन्, सान्तः, वृद्धोपजीवीत्यर्थः। वृद्धाद्बृहस्पतेः शृणोतीति वा, वृद्धे श्रवसी अस्येति तु स्वामी। णासृ शब्दे बाहुलकादोरन्, नासीरा अग्रेसरास्ते शोभना अस्येति सुनासीरो द्विदन्त्यः। तत्र शुनो वायुः शीरः सूर्यः तावस्य इति अर्शआद्यचि अन्येषामपीति दीर्घ इति व्युत्पत्त्या द्वितालव्योऽपि। एतत्पक्ष एव शोरि-शुनाशीर-शीतशिव-शङ्खा इति तालव्यादावूष्मविवेकः। आशुर्नासीरो यस्येति पृषोदरादित्वादाकारलोपे शुनासीर इत्यन्ये। युद्धे पुरुनाम्नाऽसुरेणाहूतः ह्वेञः क्तः संप्रसारणं हल (६. ४. २.) इति दीर्घः। पुरु प्रभूतं हूतमाह्वानं यज्ञेऽस्येति तु स्वामी। पुराण्यरीणां दारयति इति पुरन्दरः पूःसर्वयोर्दारिसहोरिति खच्, वाचंयमपुरन्दरौ चेति निपातितः॥ ४०

सौ मघवा मघवन् मघवान् इति रूपत्रयमिति रायः। विद्यासागरोऽप्येवम्। सुभूत्यादयस्तु तान्तत्वमनिच्छन्तः द्वैरूप्यमाहुः, च.

हरिप्रबोधयमकात् शुनासीरस्य तालव्यादित्वं—'गुर्वीं वहन् स दानवलक्ष्मीकृत्यां गदां शुनासीरेण। अनुवलितोऽञ्जलिमुदकं (कुलं, य) लक्ष्मीकृत्यां गदांशुना सीरेण। द्विदन्त्योऽपि तथाहि—'पूजायां किं पदं प्रोक्तमस्तनं को बिभर्त्युरः। क आयुधतया ख्यातः प्रलम्बासुरविद्विषमि'ति विदग्धमुखमण्डने। अत्रोत्तरं—सुनासीरः। शक्र इव नाकविख्यातः सुनासीरश्चेत्याश्चर्यमञ्जरी। द्वितालव्य इति रमानाथमधुमाधवीप्रभृतयः, तन्नातिचारु आदित्यवाचकस्यापि सीरस्य दन्त्यादित्वमेव, ज.

जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।
सं (सू) त्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा (षः, ङ)॥ ४१
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।
जम्भभेदी हरिहयः स्वाराण् नमुचिसूदनः॥ ४२

जयनशीलो जिष्णुः ग्लाजिस्थश्च ग्स्नुः। लेखानामृषभः श्रेष्ठः। शक्नोति शक्रः। शतं मन्यवः क्रतवोऽस्य शतमन्युः। षष्ठ्याः पतिपुत्रेत्यलुकि कस्कादित्वात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सत्वे दिवस्पतिः। सुष्ठु त्रायते सुत्रामा, मनिन्, शोभनं त्राम बलं वास्य। गोत्रान् गिरीन् पक्षच्छेदाद्भिन्नवान् गोत्रभित्। वस्वपत्यं वासवः। वृत्रबलजम्भनमुचयोऽसुराः। वर्षतीति वृषा, कनिन्। वास्तोर्गृहक्षेत्रस्याधिष्ठाता वास्तोष्पतिः षष्ठ्या अलुकि षत्वं, वास्तोष्पतिगृहमेधाच्छ चेति लिङ्गात्। हरयः पिङ्गा हया अस्य हरिहयः। स्वः स्वर्गे राजते स्वाराट्, ढ्रलोपे पूर्वस्य दीर्घोऽणः, व्रश्चभ्रस्जेति षः॥ ४१-४२

जयनशीलो जिष्णुः ग्लाजिस्थश्चेति ग्स्नुः। लेखेषु देवेषु ऋषभो लेखर्षभः देवश्रेष्ठः सप्तमो योगविभागात् समासः, लेखोऽयं ऋषभ इति वा उपमितं व्याघ्रादिभिरिति समासः। शक्नोत्यतिशयेन (जेतुं, ङ) स्फायितञ्चीत्यादिना रक् (२. १३.)। शतं मन्यवो यागा यस्य शतमन्युः। दिवः स्वर्गस्य पतिर्दिवस्पतिः, तत्पुरुषेण कृतीयत्र बाहुलकादकृत्यपि षष्ठ्या अलुक् षष्ठ्याः पतिपुत्रेत्यादिना सत्वम् (८. ३. ५३.)। सुष्ठु त्रायते भुवनमिति त्रैङ् पालने, आतो मनिन्नित्यादिना मनिनि अन्येषामपीति दीर्घत्वे सूत्रामेति वर्णदेशना। पाक्षिकं दीर्घमिति रूपमञ्जरी। मतिनिर्णये च सुत्रामेत्यस्य प्रत्यागतं मात्रास्विति। गोत्रान् गिरीन् पक्षच्छेदाद्भिनत्ति गोत्रभित्, भिदेः क्विप्। वज्रयोगाद्वज्री इनिः। वसूनि रत्नानि बहून्यस्य सन्तीति वासवः, ज्योत्स्नादित्वादण्। वसोरपत्यं वासव इति तु स्वामी। वृत्रं हतवानिति ब्रह्मभ्रूणवृत्रेष्विति क्विप्, वृत्रहा। वर्षतीति वृषा, पृषु वृषु मृषु सेचने, कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिव इति (१. १६२) कनिन्, सर्वनामेत्यादिना दीर्घः। वास्तोः गृहक्षेत्रस्य पतिरधिष्ठातृत्वाद्वास्तोष्पतिरिति, द्यावापृथिवी-शुनासीर-मरुत्वदग्नीषोम-वास्तोष्पति-गृहमेधाच्छ (४. २. ३२.) चेति निपातनात् षष्ठ्यलुक्, षष्ठ्याः पतिपुत्रेत्यादिना सत्वे इणः परत्वान्मूर्धन्यमध्यः। सुराणां पतिः सुरपतिः। बलासुरस्यारातिर्बलारातिः। शच्याः पतिः शचीपतिः। जम्भमसुरं भेत्तुं शीलमस्य जम्भभेदी, णिनिः। शालिहोत्रे—"त्वक्केशवालरोमाणि सुवर्णाभानि यस्य तु। हरिः स वर्णतोऽश्वस्तु पीत (वात, ङ; यति, ग)कौशेयसप्रभ", इति॥ हरिर्हयोऽस्येति हरिहयः। स्वः स्वर्गे राजते क्विप् रो रीति रलोपे ढ्रलोप इति दीर्घः (६. ३. १११.) स्वाराट् जान्तः, व्रश्चभ्रस्जेति षः जश्त्वं डकारः। यरोऽनुनासिकेऽनुनासिको वा न पदान्तादिति नकारस्य ष्टुत्वाभावः। न मुञ्चतीति नमुचिः मुच्लृ मोक्षणे इक्, कृष्यादिभ्य इतीक्, नाकवत् नञः प्रकृतिभावः। तं सूदितवानिति नमुचिसूदनः सूद क्षरणे, नन्द्यादित्वात् ल्युः। अनुदात्तेतश्च हलादेरिति वा युच्, सूददीपदीक्षश्चेत्यस्य न य इति योगविभागेनानित्यत्वान्न युचो निषेधः (३. २. १५२-३.)॥ ४१-४२

अहल्यासूत्राम्णोः क्षणिकमिव तत्सङ्गममभूदिति प्रयोगः, ज.

सचिः सची इति वीरसेनः (=ज) तालव्यादि धातुपारायणे इति सुभूतिः, ज.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शच्यश्रुकौशल्या इति तालव्यदन्त्ये गदसिंहः ह्रस्वदीर्घान्तश्चतुर्धा, च.

संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः।
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया॥ ४३

पुलोमजा श (स) चीन्द्राणी नगरी त्वमरावती।
हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम्॥ ४४

संक्रन्दयति रिपुस्त्रीः संक्रन्दनः ल्युः। दुष्टं च्यवते परदारेषु रेतःस्रुतेः दुश्च्यवनः, चलनशब्दार्थादिति युच्, दुःखेन च्यवते रणात् वा। तुरं त्वरितं साहयत्यभिभवत्यरीन् तुराषाट्, तुरं वेगं सहते वा, छन्दसि सह इति ण्विः, नहि-वृति-वृषीति पूर्वपदस्य दीर्घः, सहेः साडः स इति षत्वम्। मेघा वाहनमस्य, इन्द्रो हि मेघानाविश्य वर्षति, मेघ ऐरावतो वाभ्राधिष्ठातृत्वात्। आखण्डयति भिनत्त्यरीना-खण्डलः। ऋभून्देवान् क्षियत्यधिवसति ऋभुक्षाः, यद्वा अर्तेर्भुक्षिनक् (=देवराज, ३. ३.), पथिमथ्यृभुक्षामात्। प्राचीनबर्हिरहिहा पृतनाषाट् पुलोमजित्। उग्रधन्वा च पुराणे॥ पुलोम्नो मुनेर्जाता पुलोमजा, अतएव पौलोमी। शचति शची, शच श्वच गतौ। इन्द्रस्य स्त्री इन्द्राणी, इन्द्रवरुणेति ङीषानुकौ। तस्येति प्रत्येकं संबध्यते॥ अमरा विद्यन्तेऽस्याममरावती, मतौ बह्वचोऽनजिरादीनामिति दीर्घः॥ उच्चैः श्रवसी अस्य उच्चैःश्रवाः॥ तस्य सूतः सारथिः, मात (म, ख) लस्यापत्यं मातलिः॥ तस्योपवनं नन्दयति नन्दनं, ल्युः॥ ४३-४४

संक्रन्दयति दैत्यस्त्रीः दितिगर्भं संक्रन्दितवानिति वा संक्रन्दनः, दारणाद्गर्भस्थमरुतो वा कदि क्रदि आह्वाने रोदने च ल्युः। दुःखेन च्यवनं पतनमस्येति दुश्च्यवनः, च्यवनमुनिनैकदा जितत्वात् दुःसहश्च्यवनोऽस्येति वा दुष्टं च्यवते परदारेषु रेतःस्रुतिर्वा चलनशब्दार्थादिति युच्, दुःखेन च्यवते रणाद्वेति प्रादिसमास इति तु स्वामी। तुरं त्वरितं साहयत्यभिभवत्यरीन्, तुरं वेगवन्तं सहते इति वा, तुरस्त्वरितः सन् परबलानि सहत इति वा तुराषाट्, हान्तः। छन्दसि सह इति ण्विः, सहेः साडः स इति षत्वम्। अन्येषामपि दृश्यत इति दीर्घः, तुरासाहावित्यादौ तु षाड्रूपभावान्न षत्वम्। महामेघा गजरूपधारिण ऐरावतादयो वाहनमस्य, मेघान् वाहयति चालयति वा मेघवाहनः, इन्द्रो हि मेघानाविश्य वर्षतीत्यागमः। आखण्डयत्यरीनित्याखण्डलः, खड खडि भेदे, वृषादिभ्यः कलच्। सहस्रमक्षीण्यस्य बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गादिति षच्। ऋभवः क्षियन्त्यत्रेति डः ऋभुक्षः स्वर्गः स तस्याश्रयत्वेनास्तीति इनिः, ऋभुक्षा इति कौमुदी। ऋभुक्षो वज्र इति तु धातुपारायणे पूर्णचन्द्रः इनिः। ऋभुक्षः स्वर्गवज्रयोरिति विश्वः (?) अर्तेर्भक्षिनगिति स्वामी। ऋभून् देवान् क्षियति कार्येषु व्यापारयति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृषोदरादिरिति तु पञ्जिका। इतोऽत्सर्वनामस्थान इति (७. १. ८६) इकारस्यात्वं पथिमथ्यृभुक्षामादिति नकारस्यात्वं ऋभुक्षाः, पथिशब्दवद्रूपम्। पञ्चत्रिंशदिन्द्रस्य॥ तस्यात्वित्यादि॥ पुलोम्नो मुनेर्जाता पुलोमजा पञ्चम्यामजाताविति डः। पौलोमी-त्यपि। शचति व्यक्तं वक्तीति शच व्यक्तायां वाचि सर्वधातुभ्य इन् शचिः, कृदिकारादक्तिन इति ङीष्, शची तालव्यादिः। सर्वेन्द्रियेषु सचते समवैतीति सच समवाये, सर्वधातुभ्य इन् (४. ११७.) इतीन्प्रत्यये सचीति दन्त्यादि इति पञ्जिका। इन्द्रस्य स्त्री इन्द्राणी, इन्द्रवरुणेति ङीषानुकौ, अनुकि कर्तव्ये दीर्घोकारमानुकं शास्ति तज्ज्ञापयति यतो विहितं ततोऽन्यत्रापि भवति, तेन कीर्याणी गिर्याणीत्यादि सिद्धं भवतीति धातुपारायणम्। अतएव "लेखर्षभोऽप्यथ शची स्यादिन्द्राणी शतावरी। चारुधामा (रा, ग) महेन्द्राणी शक्राणी जयवादिनी"ति रभसः। त्रीणि इन्द्रपत्न्याः॥ तस्येति प्रासादो वैजयन्तः इत्येतपर्यन्तमुन्नेयम्। नगरी इत्यादि। अमराः सन्ति तस्यां मतुपि मतौ च बह्वचोऽनजिरादीनामिति दोर्घः। अमरावत्येकम्॥ हय इत्यादि॥ उच्चैः श्रवसी अस्य उच्चैः शृणोतीति वा उच्चैःश्रवाः, असुन्नन्तः। वा शरीति पक्षे विसर्गस्य सत्वं तस्यापि चुत्वं शकारः। एकम्॥ सूत इत्यादि॥ धातूनामनेकार्थ-त्वात् मतं गतिः, मतं लातीति मातलिः बहुलवचनात् कर्तरि किः। पृषोदरादित्वादा-कारः। मतलस्यापत्यं अत इञ् वा। एकम्॥ १॥ नन्दनमित्यादि॥ नन्दयतीति नन्दनं ल्युः। एकम्॥ स्यादित्यादि॥ ४३-४४

ऋभुक्षो वज्रमिति धातुपारायणे पूर्णचन्द्रः, म.

इदन्तमते ऋभुभिर्देवैः क्षीयते गम्यते देवान् क्षियति व्यापारयति वा किः पृषोदरा-दित्वादिकारलोपः, डिर्वा उभयथापि पन्थिमन्थिऋभुक्षिणामित्यत्र श्लेषात् पथिवच्चास्य रूपमिति विततं कातन्त्ररहस्ये, च.

मातलिस्तु हयंकष (श, त) इति रभसः, ज.

स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः।
ऐरावतो (ता, ङ) ऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः॥ ४५

विजयते विजयन्तो जिष्णुः, झच्, तस्यायमित्यण्, वैजयन्ती अस्यास्तीत्येके॥ पाकशासनस्यापत्यम्॥ इरावति अब्धौ जातः ऐरावतः। अभ्रस्थत्वादभ्रमातङ्गः, अभ्ररूप इत्येके, यत् कात्यः—"ऐरावतं विजानीयान्नागमम्बुदगोचरम्।" इरावणोद्भव ऐरावणः, विभाषौषधोति वा णत्वम्। अभ्रे खे माति न भ्राम्यति वा मन्थरगा-मिनीत्वात् अभ्रमुस्तद्भार्या, यल्लक्ष्यं अभ्रम्वा जघनान्तदोलितकरः। सुरगजो गजमल्लश्च॥ ४५

Funding by IKS-MoE

प्रशस्ता वैजयन्त्यः पताका अत्र सन्तीत्यर्शआद्यच् वैजयन्तः। विजयत इति विजयन्तो वि (जि) ष्णुः। तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्चेति झच् (उ. ३. १२८) तस्यायं वैजयन्त इति तु स्वामी। इन्द्रगृहस्यैकम्॥ जयन्त इत्यादि॥ जयतीति जयन्तः, झोऽन्त इत्यन्तादेशः। पाकशासनस्यापत्यं पाकशासनिः, अत इञ्। द्वे इन्द्रपुत्रस्य॥ ऐरावत इति। इरावत्यब्धौ भवः अण् ऐरावतः। इरावती कश्यपजा अनपत्या पुलहप्रिया तया संभृतत्वाद्वा, तथा चागमः—"इरावत्या भृ (वृ, ङः) तः पुत्रस्यार्थे ऐरावतस्तत" इति। अभ्रात्मको मातङ्गोऽभ्रमातङ्ग इति मध्यपदलोपिसमासः। ऐरावत एव ऐरावणः पृषोदरादित्वात्तस्य णः, अभ्रमोर्वल्लभोऽभ्रमुवल्लभः। चत्वार्यैरावतस्य॥ ४५

जयन्तो जयसन्तानो जयदत्तो जयश्च स इति रत्नकोषः, च

ह्रादिनो वज्रमस्त्री स्यात्कुलिशं भिदु (दि) रं पविः।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः॥ ४६

ह्रादः स्फूर्जथुरस्यास्तीति ह्रादिनी। वजति यात्येव न प्रतिहन्यते वज्रम्। कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति कुलिशं, कुत्सितं लिशति तद्गणोत्थरीन् वा। भिनत्ति तच्छीलं भिदुरं, विदिभिदिच्छिदेः कुरच्। पुनातीति पविः, हीरकस्य पविसंज्ञया प्रसिद्धत्वात्। शतं बह्वः कोटयोऽस्य शतकोटिः। स्वरति स्वरुः, शॄस्वृति उः, शोभनान्यरूंषि धारा अस्येति सान्तो वा। शं विद्यतेऽस्य शम्बः, कंशम्भ्यां बभेति बः। दभ्नोति खेदयति दम्भोलिः। अश्नाति शैलानशनिः, न शनैर्यातीति वा। व्याधामोऽपि॥ ४६

स्फूर्जथुरस्यास्तीति ह्रादिनी, अत इनिठनाविनि स्वामी। वजति यात्येव न प्रतिहन्यत इति वज्रं, ऋज्रेति रन्। अस्त्रीति कुलिशेनैवान्वीयते वज्रोऽस्त्री हीरके पवाविति नानार्थे वक्ष्यमाणत्वात्। अस्त्रियौ वज्रकुलिशौ दम्भोलिरशनिर्द्वयोरिति संसारावर्तः। कलिङ्गस्त्वेतद् दृष्ट्वा नपुंसके कुलिशशतधार इति रत्नकोषं पश्यन् अस्त्रीति वज्रेण संबध्नन् कुलिशो मम वक्षसीति भट्टिमाप्याकुलयति स्म। कुलिहंस्तो भुजदल इति त्रिकाण्डशेषः, कुलौ हस्ते शेते इति डप्रकरणेऽन्येभ्योऽपि दृश्यत इति डः कुलिशम्। कुलिनः कुलवतः कुलपर्वतान् श्यति पक्षच्छेदेन तनूकरोति कुत्सितं लिशति तद्गणोति वेति तु स्वामी। भेदनशीलत्वाद्भिदुरं विदिभिदिच्छिदेः कुरच्, कर्मकर्तरि चायमिष्यत इत्यत्र चकारः कर्तरीत्यनुकर्षणार्थः, तेनाकर्मकर्तर्यपि भवतीति वामनः। तथा च गुरुमत्सरच्छिदुरयेति माघः। केचित्तु भिदिरमिति पठन्ति, तत्र इषिमदीत्यादिना किरच् (उ. १. ५२.)। पुनातीति पविः, हीरकस्य पवित्रत्वोक्तेः पुनातेरच इः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वज्रोऽस्त्री हीरके पवावित्युक्तेर्न सान्तत्वाशङ्का। शतानि दशशतानि कोटयो धारा अस्येति शतकोटिः, शतं बह्वाः कोटयोऽस्येत्यन्ये। स्वरत्युपतापयति दैत्यान् स्वरुः, स्वृ शब्दोपतापयोः, शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेति (उ. १. १०)। सु शोभनान्यरूंषि धारा अस्येति वा सान्त इति तु स्वामी। शमयतीति शाम्बः, अन्तर्भावितण्यर्थात् शमेर्बन् इति (४. ६४) बन्प्रत्ययः, शं शुभमस्यास्तीत्यभेद्यत्वात् कंशंभ्यां बभयुस्तितुतयस इति (५. २. १३८) बः। तालव्या अपि दन्त्याश्च शम्बशूकर-पांशव इत्यूष्मविवेकाद्दन्त्यादिरपि। दम्भादाटोपात् लीयते श्लेषयति दम्भोलिः, पृषोदरादिः। दभ्नोति खेदयति उलिप्रत्यये दम्भोलिरिति तु स्वामी। अत्र स्वरुदम्भोली पुंलिङ्गौ शाम्बसाहचर्यात् शतकोटिः स्वरुसाहचर्यात्, तत्साहचर्यात्तु पविरिति बोध्यम्। अन्यत्र तु पविर्द्वयोरित्युक्तम्। अश्नाति शैलान् अश्यते भुज्यते स्वाराज्यमनेनाशनिः, अर्तिसृधृधम्यश्यवितॄभ्योऽनिः (उ. २. १०३)। न शनैर्याति वेत्यशनिरिति तु स्वामी। वज्राशनिरिति समुदितं नामास्य वज्राशनिं विदुर्वज्रमिति त्रिकाण्डशेषादथ वज्राशनिर्द्वयोरिति नामनिधानाच्च। दश वज्रस्य॥ व्योमयानमित्यादि॥ ४६

शनिरशनिश्च तमुच्चैरिति विरोधाभासः, च

'वज्राशनिर्गिरिकण्टकः पविर्दम्भोलिरक्षजमिति', रभसः। 'अस्त्रियौ वज्रकुलिशौ दम्भोलिरशनिर्द्वयोः। नैवं वज्राशनिः फेनवाही हीराङ्गजोऽक्षज' इति साहसाङ्कः। अतएव वज्राशनिसमस्वन इति भारतम्, ज.

कुलीशपाणिर्नवलोकनाथ इति मत्स्यपुराणदर्शनात् दीर्घेकारवदपि, त.

व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः।
स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा॥ ४७

व्योम्नि यान्त्यनेन व्योमयानम्। विमान्ति वर्तन्तेऽस्मिन्देवाः विमानम्। नारं नरसमूहं द्यति भिनत्ति कलहैर्नारदः। आद्यशब्दात् देवलादयः। सुराश्च ते ब्रह्मादिपुत्रत्वात् ऋषयश्च षष्ठीसमासो वा। सुष्ठु धर्मोऽस्यां सुधर्मा, यल्लक्ष्यं सुधर्मानवमां पुरीं, धर्मादनिच् केवलात्। सह भान्त्यस्यां सभा आस्थानं गृहम्। पीयते पीयूषं पीयेरूषच् (न, ४. ७६.)। नास्ति मृतमत्रामृतम्। सुष्ठु धीयते सुधा, धेट् पाने। समुद्रनवनीतं देश्याम्॥ ४७

व्योम्नि यान्त्यनेनेति व्योमयानं, करणे ल्युट्। विशिष्टं मानयन्त्यनेनेति करणे घञ् विमानः॥ विमान्ति वर्तन्ते अस्मिन् देवा इति स्वामी। द्वे देवरथस्य॥ नारदा इत्यादि॥ नारदाद्याः सुरर्षिशब्देनोच्यन्ते। आद्येन तुम्बरु-भरत-पर्वतादेर्ग्रहणम्। नरस्य धर्म्यं नारं, नराच्चेति वक्तव्यमित्यण्, तं ददाति नारदः। यद्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नारं पानीयं पितृभ्यः सदा ददाति नारदः। तथा चागमः—"नारं पानीयमित्युक्तं तत् पितॄणां सदा भवान्। ददाति तेन ते नाम नारदेति भविष्यति'। एकम्॥ स्यादित्यादि॥ शोभनो धर्मोऽस्यामिति सुधर्मा, धर्मादनिच् केवलादित्यनिच्, नकारान्तः। सुधर्मामिव तां सकौशिकां विन्ध्याटवीं विवेशेति वासवदत्तायामाबन्तत्वे समासान्तविधिरनित्य इति कृत्वा, यद्वा डावुभाभ्यामिति डाप्। अत्र तु ऋन्नेभ्यो ङीबिति ङीपि प्राप्तेऽनो बहुव्रीहेरिति प्रतिषेधः। देवानां सभा देवसभा इन्द्रस्यास्थानगृहम्। अतएव देवसभेत्यत्राशाला चेति न क्लीवत्वम्। नापि सभा राजमनुष्यपूर्वेति अमनुष्यशब्दस्य रक्षःपिशाचादौ रूढत्वादिति। पीयूषमित्यादि। पीयत इति पीयूषं पीयुः इति सौत्रो धातुः, पीयेरूषन्। न म्रियतेऽनेनेति अमृतं तनिमृङ्भ्यां किच्चेति तन् किच्च। अविद्यमानं मृतं मरणमनेनेति तु स्वामी। सुखेन धीयत इति सुधा, धेट् पाने आतश्चोपसर्ग इत्यङिति पूर्वटीकाकृतः। तदयुक्तं, कर्मण्यङोऽभावात् द्वितीयभावग्रहणस्य कारकाधिकारनिवृत्त्यर्थत्वात्तस्मात् सुष्ठु दधाति पुष्णाति शरीरमिति पचाद्यजन्ताट्टाप् सुधेति तु वत्सेश्वरः। त्रीण्यमृतस्य॥ मन्दाकिनीत्यादि॥ ४७

ब्रह्मर्षि-देवर्षि-राजर्षि-परमर्षि-काण्डर्षि-महर्षि-श्रुतर्षिभेदात् सप्त ऋषयः, च.
पेयूषमपि 'पेयूषं नवदुग्धामृतयो' रित्यरुणादत्तः, ज.

मन्दाकिनी वियद्गङ्गा स्वर्ण (र्न, ङ) दी सुरदीर्घिका।
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः॥ ४८

मन्दमकत्यवश्यं मन्दाकिनी, अक अग कुटिलायां गतौ। सिद्धसिन्धुश्च। गङ्गामात्रस्य नामानि वक्ष्यामः। मिनोति क्षिपत्युच्चत्वात् ज्योतींषि मेरुः। सुमेरुरभिन्नार्थः, महेन्द्रवत्। हेम्नोऽद्रिः हेमाद्रिः। रत्नानि सानवोऽस्य रत्नसानुः॥ ४८

मन्दमकितुं शीलमस्या मन्दमकत्यवश्यमिति वा मन्दाकिनी, अक अग कुटिलायां गतौ णिनिः। खजेराक (उ. ४. १३.) इत्यत्र बहुलवचनान्मन्दतेराके मन्दाकानि स्रोतांसि सन्त्यस्यामिति मन्दाकिनी वियद्गङ्गेति धातुपारायणम्। मन्दनाम्नः सरसोऽकति मन्दाकिनीति तु कौमुदी। वियतो गङ्गा वियद्गङ्गा। स्वः स्वर्गस्य नदी स्वर्णदी। वा-प्रकरणे गिरिनद्यादीनामुपसंख्यानमिति (८. ४. १०. १) पूर्वटीकाकृतः, वयन्तु तत्र गिरिनदी वक्रनदी वक्रनितम्बेत्युदाहरणत्रयमेव दृष्टवन्तस्तेन स्वर्णदीत्यत्र पूर्वपदात् संज्ञायामग इति नित्यणत्वमिति कौमुद्युक्तमेव युक्तं पश्यामः। यत्तु पुरुषोत्तमेन स्वर्णदी स्वर्नदीति भाषावृत्तावुदाहृतं तदमूलं, कातन्त्रसवज्जुमरादिव्याकरणेषु स्वर्णदीति नित्यणत्वदर्शनात्। सुराणां दीर्घिकेव सुरदीर्घिका। चत्वार्याकाशगङ्गायाः॥ मेरुरित्यादि॥ माति मानं गच्छति मा माने मापो रुरिच्चेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(उ. ४. १०१.) रुः, इकारश्चान्तादेशः गुणः मेरुः। मिनोति प्रक्षिपत्युच्चत्वात् ज्योतींषि इति मेरुरिति तु स्वामी। सुरनधिकार्थः इन्द्रमहेन्द्रवत् सुमेरुः, सुमेरुरित्यनेनान्योपसर्गनिवृत्तिरिति तु सर्वधरः। हेमप्रधानोऽद्रिर्हेमाद्रिः, शाकपार्थिवादिः, ढ्रलोप इति दीर्घः, हेम्नोऽद्रिरिति वा। रत्नानि सानावस्य रत्नसानुः, रत्नप्रधानसानुरिति वा। सुराणामालयः सुरालयः। पञ्चकं सुमेरोः॥ पञ्चैत इत्यादि॥ ४८

छायापथो देवपथः सिद्धगङ्गा नभःसरिदिति विक्रमादित्यः, च, य

पञ्च ते देवतरवो मन्दारः पारिजातकः।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥ ४६

मन्दा आरा धारा अस्य सरलत्वात्। पारिणः पारवतोऽब्धेर्जातः। सन्तन्यतेऽस्मिन् पुष्पाणि सन्तानः। कल्पवृक्षः संकल्पपूरणत्वात्। हरेरिन्द्रस्य चन्दनं, कषे पीतं वा॥ ४६

मन्दते मोदयति मदि स्तुतिमोदस्वप्नगतिष्वित्यतः अञ्जिमदिमन्दिभ्य आरन् (उ. ३. १३४.) इत्यारन्, मन्दारः। मन्दा आरा धारा अस्य सरलत्वादिति श्रीधरः। समुद्रपारे जातः पारिजातः, पृषोदरादिः, स्वार्थे कन्पारिणः पारवतोऽब्धेर्जात इति तु स्वामी। पारिजातो जन्यत्वेनास्यास्तीति अर्शआद्यच् पारिजातः, समुद्रः तत्र भव इत्यणि पारिजात इति त्वन्ये। सम्यक् तनोति फलमिति सन्तानः तनोतेर्ण उपसंख्यानमिति णः (३. १. १४०. १.)। तननं तानः गन्धस्य सम्यक्तानोऽस्येति त्वन्ये। सम्यक् तन्यन्ते पुष्पाणि अस्मिन् अधिकरणे घञित्यपरे। कल्पः सङ्कल्प इच्छा तत्फलको वृक्षः कल्पवृक्षः। कल्पः संकल्पितोऽर्थः, तस्य वृक्ष इति वा। कल्पः तस्य वृक्षः जन्यजनकसम्बन्धात् कल्पवृक्ष इति तु माधवी। चन्दयत्याह्लादयति नन्द्यादित्वाल्ल्युः, चन्दनं, हरेश्चन्दनं हरिचन्दनं, चदि आह्लादने दीप्तौ च। वा पुंसीत्युक्तेः हरिचन्दन इत्यपि। पञ्चानां देववृक्षाणामेकैकं नाम॥ सनदित्यादि॥ ४६

सनत्कुमारो वैधात्रः, स्वर्वैद्यावश्विनीसुतौ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ॥ ५०

सनत् नित्यं कुमारः। सनात्कुमारोपि। विधातुरपत्यं वैधात्रः॥ वैद्यसंहिताप्रणेतृत्वाद्वैद्योक्तः॥ न असत्यौ असाधू नासत्यौ, नभ्राण्नपादिति नञ् प्रकृत्या। अश्विनौ सदश्वाधिरूढौ। दस्यतो हरतो रोगान् दस्रौ। अश्विन्या अपत्यं, ढकि आश्विनेयौ। उभाविति द्वित्वाविष्टत्वादेकवचनाभावः। भागुरिस्त्वाह नासत्यदस्रौ यमजावश्विनावर्कजौ यमौ। नासत्यसहितौ दस्राविति व्याख्येयम्। न त्वेको नासत्योऽन्यो दस्रः॥ ५०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हंसगो द्रुहिणः सनदित्यादि ब्रह्मपर्याये रभसः। तस्य कुमारोऽपत्यं सनत्कुमारः दन्त्यादिः। सनन्नित्यं कुमार इति तु स्वामी। विधातुरपत्यं वैधात्रः अण्। विष्णु-शिव-प्रस्तावे कामदेव-विनायकादिवद् वक्तुं योग्यस्यास्य वैद्यसंहिताप्रणेतृत्वात् स्ववैंद्य-पर्यायसन्निधौ कथनमिति टीकाकृतः। द्वे ब्रह्मणः पुत्रस्य॥ स्ववैंद्यावित्यादि॥ स्वः स्वर्गस्य वैद्यो स्ववैंद्यौ। वडवारूपिणी संज्ञा, रूपयोगादश्विनी तस्याः सुतावश्विनोसुतौ। संज्ञा च सूर्यस्त्री उत्तरकुरौ धृताश्वरूपा तपस्यन्तीति प्रागासीत्। सूर्योऽपि तत्सङ्गमेच्छुरश्वरूपी तत्समीपमगात्। स च तया सामान्यपुरुषधिया निरस्तः सन् तन्नासापुटद्वये रेतो न्यषिञ्चत्। तत्र तौ जातावित्याश्चर्यपूर्वं (पर्वणि, च), अतो नासां त्यक्तवन्तावित्यन्येभ्योऽपि दृश्यते इति डः ङ्यापोः संज्ञाछन्दसोर्बहुलमिति (६. ३. ६३) ह्रस्वत्वं नासत्यौ। यद्वा अतएव नासाभवत्वात् सत्सु साधू सत्यौ तत्र साधुरिति यत्, न सत्यौ असत्यौ पुनर्नञ्समासे नभ्राण्नपादित्यादिना नञः प्रकृतिभावः इति तु स्वामी। द्वौ वाडवेयौ नासिक्याविति नामनिधानम्। अश्विन्यां जाताविति नक्षत्राणो, नक्षत्रेभ्यो बहुलमिति लुकि कृते, लुक् तद्धितलुकीति ङीपो लुक् अश्विनौ नान्तौ ह्रस्वादी। सदश्वारूढत्वात् अश्वयोगादश्विनाविति तु स्वामी। दस्यत उपक्षिपतो रोगानिति दस्रौ सदन्त्यौ तसु उत्क्षेपे दसु चेत्यतः स्फायितञ्चीति रक्। अश्विन्या अपत्यमिति स्त्रीभ्यो ढगिति आश्विनेयौ। सर्वं एवामी नित्यद्विवचनान्ताः अतएवाह तावुभाविति उभावित्याविष्टद्वित्वादेकवचनाभाव इति स्वामी। यद्यपि "देव्यां तस्यामजायेतां नासत्यो दस्र एव चे"ति मार्कण्डेयपुराणम्। "एते वयं वृत्ररिपुस्तथैतौ नासत्यदस्रौ वरुणस्तथे"ति वायुपुराणे। उत्पलिन्याञ्च—"वैवस्वतो मनुर्नाम यमौ च यमुनायमौ। नासत्यदस्ररेवन्ता षट्संज्ञायां रवेः सुता" इति व्याडिरिति भेदः, तथाप्यनयोरेकात्मकत्वात् समानसर्वप्रकारत्वाच्चाभेदोऽपि॥ यथा भारते—"उभावेतौ न सम्मोहो नासत्याविति मे मतिः"। तथा च माघे—"अनुसस्नतुस्तमथ दस्रयोः सुता"विति। यदाहि नासत्य उपचारात् दस्रेऽपि वर्तते तदा नित्यद्विवचनान्तता नत्वेकवृत्तिः। यच्च नभ्राण्नपादित्यादिसूत्रे नासत्या इत्येकस्मिन्नपि नासत्ये बहुत्वमारोप्य बहुवचनं तच्चारोपितं बहुत्वमेकास्मिन्नपि बहुवचनं भवतीति ज्ञापनार्थं तेन गुरुष्वित्याद्युपपन्नं भवतीति कौमुदी। यमजत्वाद् द्वित्वमित्यन्ये। तथा च भागुरिः—"नासत्यदस्रौ यमजावश्विनावर्कजौ यमा"विति। एकत्वमपि—"दीप्यमानं ततः शूलमश्वी सुविपुलं दृढ"मिति भारतोक्तेः। षडश्विनीसुतयोः॥ स्त्रियामित्यादि॥ ५०

(वैधात्रः) वैधातकिरित्यन्यटीका, त.

वामेयः सूर्यतनयो रेवन्तो रुद्रदैवत इति शब्दार्णवः, च.

अत्यन्तसौहार्दात्, सादृश्याच्च नासत्यदस्रयोर्भेदेऽप्यभेद इति साञ्ञः, ज.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः।
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्॥ ५१

(घृताची मेनका रम्भा उर्वशी च तिलोत्तमा। सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः, ख)। अद्भ्यः सृता अप्सरस इति एकत्वमपि शब्दशक्तिस्वाभाव्यात्, अप्सरा इत्यपि दर्शनात्, प्रायिकं बहुत्वम्। ऊरू अश्नुते नारायणस्योरूद्भवत्वात् उर्वशी, पृषोदरादित्वाद्ध्रस्वः, यल्लक्ष्यम्—"ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री"ति (विक्र. ३ ३.)। मुखशब्दाद् रम्भादयः। हाहा एकः हूहूरन्यः, एकं नामेत्येके, गन्धर्वौ च हाहा हूहूः इति तु लक्ष्यम्। आलापनिकानुकारात् पुंस्येतौ, अव्ययाविति श्रीभोजः। आद्यशब्दात् तुम्बुरुमुखा गायना गन्धर्वाः॥ ५१

अप्सरस इति पूर्वमेव व्युत्पादितं। बहुष्विति बहुत्वे प्रायेण प्रयोगदर्शनादुक्तं एकवचनेऽपि चयो द्वितीया। शरि पौष्करसादेरिति वक्तव्यमित्यत्र (८. ४. ४८. ३) वामनेनाप्सरा इत्युदाहृतत्वात्। स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपीति शब्दार्णवाच्च। शुभंयाशब्दवद्रूपम्। तथा च "सान्द्रबाणपटसंभृ (वृ) तमूर्तेर्दन्तिदन्तशयनीयगतस्य। मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्वमशून्य"मिति प्रयोगः (कप्फणाभ्युदये, म)॥ स्वः स्वर्गस्य वेश्या स्वर्वेश्या। उरून्महतो वष्टि कामयते वशीकरोति वा वश कान्तौ अच् गौरादित्वान्ङीष् पृषोदरादित्वादुकारलोपः। ऊरुमश्नुते व्याप्नोतीति नारायणोरूद्भवत्वात् पृषोदरादित्वाद्ध्रस्वत्वे इको यणचीति यणादेशः पूर्ववदन्यदिति स्वामी। एवं ह्रस्वादिस्तालव्यान्ता तथा च शतपथे—"उर्वशी ह्यप्सराः पुरा पुरुरवसमैलं चकमे" इति, माघे च "दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तल"मिति। ऊरौ उषितेति वस निवास इत्यत्र उर्वसी दीर्घादिर्दन्त्यान्ता पृषोदरादित्वाद्ध्रस्वादितेति वर्णदेशना। तथा च हरिवंशे—"नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी"ति। मुखशब्देनाद्यर्थेन रम्भामेनकादीनां ग्रहणम्। द्वे उर्वश्यादेः॥ हाहेत्यादि॥ गायन् हाहति कुत्सितध्वनिं जहाति हाहाः जहातेर्विच् शसाद्यचि आकारलोपे हाहः, टाप् हाहा इत्यादि। हू इति कृत्वा ह्वयतीति हूहूः, ह्वेञ् स्पर्द्धायां, शब्दे च क्विप्, वच्यादिना संप्रसारणं, हल इति दीर्घः, संप्रसारणाच्चेति परपूर्वत्वम्। अव्युत्पत्तिपक्षे तु सह एन विष्णुना वर्तते इति पुंलिङ्गसाशब्दवत् हाहाः पुंलिङ्गः। कर्पूवत् हूहूः। क्विबन्तत्वाभावेनाधातुत्वात् द्वितीयाबहुवचने हाहानिति, टादौ तु आतो धातोरिति योगविभागादाकारलोपे पूर्ववद्रूपम्। बहुलवचनात् मिथुनेऽसिः (उ ४. २२२) इत्यसौ हाहाः सान्तोऽपि, रत्नकोषाच्च। हाहाहूहूरित्येकं नामेत्यन्ये। केचित् तु हहा आदिह्रस्वोऽव्युत्पन्नो हुहुराद्यन्तह्रस्वोऽपीत्याहुः। तथा च "गीतमाधुर्यसम्पन्नौ विख्यातौ च हहा हुहु" रिति व्यासः। हंसो हहाहुहू च द्वौ (ह्रौ) वृषणाश्वश्च तुम्बुरुरिति शब्दार्णवः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आद्येन तुम्बुरुविश्वावसुचित्ररथादिग्रहणम्। गन्धर्वः प्रागुक्तः। पृषोदरादित्वाद् दीर्घादिरपि। तथा च "अपि गन्धर्वगान्धर्वदिव्यगायनगातव" इति शब्दार्णवः। शृङ्गारप्रकाशे हाहाहूहूशब्दयोरव्ययत्वमप्युक्तम्। द्वे देवगायनविशेषस्य॥ अग्निरित्यादि॥ ५१

अप्सरा आदन्तोऽपि तेन अप्सरायामिति प्रयोग इति नृसिंहः (=त)।......

(स्ववेंश्या) वेश्याशब्दे तालव्यमूर्धन्योभयरूपतेति सर्वस्वम्। ...(उर्वशी), ह्रस्वादिर्दन्त्यान्त इत्यपि केचिद्दीर्घादिर्दन्त्यान्त इति सर्वानन्दः, तेन त्रैरूप्यं, च-(दीर्घादिर्दन्त्यसेति केचिदिति वर्णदेशना, म).

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥ ५२

अगत्यूर्द्ध्वं यात्यग्निः। विश्वानरस्यापत्यं वैश्वानरः विदादित्वादञ्। वहति हव्यं वह्निः। वीतयोऽश्वा होत्रं हव्यं अस्येत्यागमः, वीतिरशनमिति प्राच्याः। धनं जयति धनञ्जयः, संज्ञायां भृ-तॄ-वृजीति खच्। "उदकनामान्युत्तराण्येकशतमिति, (नि २. २४) कृपीटस्याम्भसो योनिः धूमजत्वान्मेघानां, अग्नौ प्रास्ताहुतिः सम्यगिति च, कृपीटं योनिरस्येत्येके, यदाहुः—"अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्"। ज्वलति ज्वलनः यु (जु, ३. २. १५०.) चंक्रम्येति युच्, जाता वेदा अस्माज्जातवेदाः, जाते जाते विद्यते वा। तनूं न पातयति तनूनपात् देहधर्तृत्वात्, नभ्राण्नपादिति नञ् प्रकृत्या॥ ५२

अङ्गति ऊर्द्ध्वं गच्छत्यग्निः अगि रगि लगि गत्यर्थाः अङ्गेर्नलोपश्च। विश्वानरस्यापत्यं वैश्वानरः, विदादित्वादञ्, बहुत्वे लुकि विश्वानराः। वहति हव्यमिति वह्निः वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निदिति (उ. ४. ५१.) निप्रत्ययः। वीतिरशनं होत्रं हविरस्य वीतिहोत्रः, वीतिर्होत्रे हवने अस्येति वा, वी गतिप्रजनकान्त्यशनखादनेषु, कर्मणि क्तिन्, वीतयोऽश्वा होत्रं हव्यमस्येत्यागम इति तु स्वामी। धनमिच्छेद्धुताशनादिति धातूनामनेकार्थत्वात् धनं जयति यथेष्टं ददातीति धनञ्जयः, मृत्युञ्जयवत् साधनं धनं जितवान् आयत्तीकृतवान् इत्यतो धनमभिलष्यते इत्यागम इति वा। कृपीटमुदरे जलमिति रत्नकोषः। कृपीटं जलं योनिरुत्पत्तिस्थानमस्येति कृपीटयोनिः। "अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थित"मिति मनुः। कृपीटस्याम्भसो योनिर्धूमजत्वात् मेघानां, अग्नौ प्रास्ताहुतिः सम्यगिति स्मृतेरिति भट्टः (ह्रिः, घ, ङ)। ज्वलतीति ज्वलनः, ताच्छील्ये जु चंक्रम्येत्यादिना युच्। जाता वेदास्त्वदर्थञ्चेत् (हि, ङ) जातवेदा ततो ह्यसीति भारते, जातं वेत्तीति वा गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वञ्चेत्य(४. २२६) सिः, जाता वेदा अस्माज्जातवेदाः पृषोदरादित्वात् सान्त इति तु कौमुदी। तनोतेरौणा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिक ऊः तनूः। नपादिति नभ्राएनपादितिसूत्रे निपातितः। अत इन्धनं विना त्राणमपि तन्वाः शरीरस्य नपात् तनूं न पातीति निपातनात् तन्वा न पात् रक्षणमस्येति कलिङ्गः। तनूनपात्तान्तः, शलन्त इत्येके, तनूनपान् तनूनपान्तौ आगमशासनानित्यत्वान्नुमोऽभावे तान्त इत्यन्यः (पुरुषोत्तमः, य)। तनूं न पातयति देहवर्तित्वादिति तनूनपादिति स्वामी। तन्वा ऊनं पातीति तनूनपं घृतादि, तदत्तीति दान्त इति तु रामदासटीका ॥ ५२

श्रीहर्षचरिते तनूनपाति पीतसर्पिषि पतङ्ग इव पापकी पातयत्यात्मानमिति। दान्त इति रामदासः शब्दभेदे तु तनूनपात् तकारान्तो, न तवर्गतृतीयवान्, च. शुष्मोर्चिषि हुताशने इति (अदन्ते, ज) शुभाङ्कः, य

व (ब) र्हिः शुष्मा कृष्णवर्त्मा शो(रो, ङ) चिष्केश उषर्बुधः।
आश(श्र)याशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५३

वर्हिः शुष्मेति व्यस्तसमस्तं नाम वर्हिर्दर्भः शुष्म बलमस्येति। वर्हते वर्धते वर्हिः, यथा वर्हिर्मुखा देवाः। शुष्यन्त्यनेन शुष्मा, यल्लक्ष्यं—"शुष्मणि प्रणयनाभिसंस्थिते (शिशु १४. २२)। वर्हिरुत्थ (ष्क, ख) इत्यमरमाला यथा दृशां वर्हणो वर्हिरुत्थः। कृष्णो धूमो वर्त्मास्य। शोचींषि ज्वालाः केशा अस्य शोचिष्केशः। उषसि रात्रौ बुध्यते प्रकाशते उषर्बुधः, अहरादीनां पत्यादिष्विति रेफः। आशेतेऽत्रेत्याशयमाधारमश्नात्याशयाशः, आश्रयाश इत्येके। बृहन्तो भानवो रश्मयोऽस्य बृहद्भानुः। कृश्यति कृशानुः, कृशोऽप्यनति वर्धते वा। पुनाति पावकः। अनित्यनेन लोक इत्यनलः ॥ ५३

बृंहतीति बृंहेर्नलोपश्चेतीस् (सिः, २-११०.) वर्हिः सान्तः पुंलिङ्गः, वर्हिरुक्तो बृहद्भानुर्वीतिहोत्रो धनञ्जय इत्यमरमालापुंस्काण्डपाठात्। भट्टस्वामी त्वाह—वर्हिःशुष्मेति व्यस्तसमस्तं नाम। वर्हते वर्हिः यथा वर्हिर्मुखा देवाः। वर्हिर्दर्भः शुष्म बलमस्येति यथा शुक्रो वैश्वानरो वर्हिर्वर्हिःशुष्मा तनूनपादिति शब्दार्णवात्। कौमुदीकारस्तु शब्दार्णवादेव वर्हिः सान्तः वर्हिरिदन्तः शुष्मेति नान्तः पृथगित्याह। शोषयति जलमिति शुषेर्णिजन्तादन्येभ्योपीति मनिन्, संज्ञापूर्वकत्वान्न गुणः, शुष्मा नान्तः, शुष्यत्यनेनेति तु स्वामी। शुष्मणि प्रणयनाभिसंस्कृत इति माघः। अवि-सिवि-सि-शुषिभ्यः किदिति मन् (उ. १. १४६.) शुष्मोऽग्निरित्युणादावदन्तोऽपि। कृष्णो धूमो वर्त्मास्य इति कृष्णवर्त्मा नान्तः। शोचींषि ज्वालाः केशा इवास्येति शोचिष्केशः, नित्यं समासेऽनुत्तरपदस्थस्येति षत्वम्। उषः प्रभाते सन्ध्यायामिति विश्वः उषसि सन्ध्यायां बुध्यते प्रकाशते उषर्बुधः, इगुपधत्वात् कः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहरादीनां पत्यादिषूभयथा रुर्वा रेफो वेति व्यवस्थितविभाषया नित्यं रः। आश्रयमाधारमश्नातीत्याश्रयाशः। आशेरतेऽत्रेत्याशयः, तमश्नातीति आशयाश इति तु स्वामी। उभयत्रापि कर्मण्यण। बृहन्तो भानवोऽस्येति बृहद्भानुः। कृश्यतीति कृशानुः, कृश् तनूकरणे, ऋतन्यञ्जि (ञ्चि, घ)वन्यंज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निच्-यतुच्-अलिच्-इष्टुच्-इष्ठुच्-इसन्-स्यन्-इथिन्-उलि-अस्-आस्-आनुक् (उ ४. २) इत्यानुक्। कृशोप्यनिति वर्तते कृशानुरिति तु स्वामी, कृशानुर्मध्यतालव्यः। वैश्यः किंशारुदश्वित्कुशलं कृशानुश्च मध्यतालव्याः ऊष्मविवेकात्। पुनातीति पावकः पूञो ण्वुल्। अनिति प्राणित्यस्मात् आनयति वा अनितिधातोरन्तर्भावितण्यर्थाद्वृषादित्वात् कलच् अनलः। अनित्यनेनेत्यनल इति स्वामी॥ ५३

रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः॥ ५४
सप्तार्चिर्दमु (मू) नाः शुक्रश्चित्रभानुर्विभावसुः
शुचिरप्पित्तम्, और्वस्तु वाडवो वडवानलः॥ ५५

रोहिताख्यो मृगोऽश्वो वाहनमस्य रोहिताश्वः। वायुः सखाऽनुचरोऽस्य वायुसखः। आशोषितुमिच्छति आशुशुक्षणिः आङि शुषेः सनश्छन्दसि अनिः (उ. २. १०४)। हिरण्यं रेतोऽस्य हिरण्यरेताः, यत् स्मृतिः—अग्नेरपत्यं प्रथमं सुवर्णम्। हव्यं वाहयति देवान् नयति हव्यवाहनः, हव्यपुरीषपुरोष्येषु ञ्युट्॥ (३. २. ६५.)

दाम्यति दमुनाः, दमूना इत्येके दमेरूनसि। शुक्रं तेजोऽस्त्यस्य शुक्रः अर्शआदित्वादच्। विभैव वसु धनमस्य विभावसुः। शुचिः शोधकत्वात्। अपां पित्तं सारं धूमयोनित्वात् अप्पित्तम्। उदर्चिश्च॥ क्षारस्तु भसितं भस्मेति वाच्यम्॥ उ(ऊ, क)र्वस्यापत्यम् और्वः, वरुणभयान्मात्रा ऊर्वोर्गोपितत्वादित्यागमः। वाडवोऽश्वमुखत्वात्॥ .४-५५.

लोहितवर्णोऽश्वोस्येतिऽ रोहिताश्वः। तथा च शालिहोत्रे—"वरुणस्त्वशितानश्वान् कुबेरः कुसुमोपमान्। हुताशनः किंशुकाभान् वायुर्बभ्रूंस्तथावृणोत्॥ रोहितो मृगोऽश्वो वाहनमस्येति तु श्रीधरः। वायुः सखा अनुचरोऽस्येति वायुसखा। अनङ्सावित्यनङ्, अतत्पुरुषत्वाट्टजभावः। तत्पुरुषे तु राजाहःसखिभ्यष्टजिति टचि वायुसखोऽपीति तु कौमुदी। शिखा अस्य सन्तीति शिखावान तान्तः। आशो (ष्टु, ङः)षितुमिच्छत्याङ्पूर्वात् शुष्यतेः सनन्तादाङि शुषेः सन्छन्दसीत्यनिः, भाषायाञ्च दृश्यते आशुशुक्षणिर्द्वितालव्यः। हिरण्यं रेतोऽस्येति हिरण्यरेताः सान्तः, तथा च "अग्नेरपत्यं प्रथमं सुवर्णमिति श्रुतिः, अग्निना धृतस्य रुद्ररेतसः शेषमनु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(प्सु ?) जातं तच्च सुवर्णं जातमिति हिरण्यरेताः। हुतं भुङ्क्ते हुतभुक् जान्तः। दहतीति दहनः ल्युः। देवानां हव्यं वहति प्रापयतीति स्वयं वा प्राप्नोति हव्यवाहनः हव्येऽनन्तःपादमिति वहेर्ण्युट् (३. २. ६६)। काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वविरूपिणी च नीलायमानेति च सप्त जिह्वाः॥ सप्त वह्नेर्ज्वाला(जिह्वा, ग)मार्कण्डेयपुराणोक्ताः। तासामर्चिःषु तावत्ताः। सप्तार्चिषोऽस्येति सप्तार्चिः। दमुना दमु उपशमे अस्मादन्तर्भावितण्यर्थात् दमेरुनसिरित्युनसिः (४. २३४)। दाम्यतीति दमुना इति स्वामी। दमूना दीर्घमध्योऽपि। दमूना दमुनाः प्राचीनवर्हिःशुचिवर्हिषाविति नामनिधानात्। शोचयतीति शुक्रः ऋज्रेन्द्रेत्यादिना निपातितः। शुक्रं रेतोऽस्यास्तीति अर्शआद्यचि शुक्र इति तु स्वामी। चित्रा विचित्रा भानवोऽस्येति चित्रभानुः, वैचित्र्यञ्च जिह्वारूपार्चिषां भेदात्। अत्र पूर्वपदादिति न णत्वं क्षुभ्नादेराकृतिगणत्वात्। विभा प्रभा सैव वसु धाम अस्य विभावसुः। विशेषेण भान्तो वसवो रश्मयोऽस्येति तु कौमुदी। शोचयतीति शोधयतीति शुच शोके, अन्तर्भावितण्यर्थात् सर्वधातुभ्य इन्। अपां पित्तमिव दाहकत्वादप्पित्तं, बाहुलकादलुगपि, "सोऽङ्घ्रिपाङ्गैरपांपित्तमिन्धानः शर्वरीं नयेदिति" प्रयोगात्। चतुस्त्रिंशन्नामान्यग्नेः॥ और्वस्त्वित्यादि॥ उर्वस्य ऋषेरपत्यम् और्वः विदाद्यञ्। बहुत्वे लुकि उर्वा इत्यादि। वरुणभयान्मात्रा ऊर्वोर्गोपितत्वादित्यन्य इति तु स्वामी। उर्वेण किलायोनिजपुत्रार्थिना ऊरुर्मथितस्तत्र ज्वालायामयं पुरुषो जातस्तस्य च समुद्र आधार आसीदिति स्मृतिः(श्रुतिः, ग)। अयमेव वडवामुखभवत्वाद्वाडवः भवार्थे अण्। वडवानल इत्याधाराधेयसम्बन्धः। और्वादित्रयं वाडवाग्नेः॥ वह्नेरित्यादि॥ ५४-५५.

(कृशानु) मूर्धन्यकृषधातोरानुक्क्षुभ्नादित्वात् न णत्वमिति सर्वानन्दः, तेन शद्वैधम्॥, च.

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।
त्रिषु स्फुलिङ्गोऽग्निकणः सन्तापः संज्वरः समौ॥ ५६

ज्वलति ज्वालः, ज्वलितिकसन्तेभ्यो णः। कील बन्धे। प्रायेणार्चिः स्त्री, ज्वालाभासोर्नपुंस्यर्चिरिति हि वक्ष्यते, अर्च्यतेऽर्चिः। हिनोतीति हेतिः। शिनोति शेते वा शिखा॥ स्फुलति चलति स्फुलिङ्गः, जातावपि न ङीप् कन्दरावत्॥ सन्तापयति सन्तापः। संज्वरयति संज्वरः॥ ५६॥

ज्वलतीति ज्वालः ज्वलितिकसन्तेभ्यो णः। स्त्रियां ज्वाला। कीलति बध्नाति गन्तुं न ददाति कील बन्धे इगुपधत्वात् कः। स्त्रियां कीला। अर्च्यते अर्चिः, अर्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूजायां, अर्चिशुचिहुसृपिछादिच्छर्दिभ्य इसिरितीसिः (उ. २. १०६), अर्चिः सान्ता। इनि त्विदन्ताऽपि—"रजनिधमनिकाकिन्यर्चिशुण्ठ्यः (च्यः ङः) पुरन्ध्रि"रिति, ङीष्विषये वाचस्पतिः। स्त्रियामित्यर्चिरादिभिः सम्बध्यते। स्त्रीत्वन्त्वर्चिषः प्रायिकं "ज्वालाभासोर्नपुंस्यर्चिरिति नानार्थे क्लीवत्वकथनात्। हिनोतीतस्ततो गच्छतीति हेतिः, हि गतौ ऊतियूतिसातिहेतिकीर्तयश्चेति निपातितः, क्तिन्नन्तः। शेते इति शीङः किद् ह्रस्वश्चेति खः शिखा। अत्र केचिदाहुः प्रक्रमाद्वह्नेर्लाभे, वह्नेरिति नियमार्थं ज्वालादिपञ्चकमग्नेर्ज्वालायां नान्यस्येति तदयुक्तं, ज्वालाभासोर्नपुंस्यर्चिरिति नानार्थे-द्युतिमात्रपाठात्, हेतिः स्यादायुधज्वालासूर्यतेजःसु योषितीति हेतेः सूर्यतेजसि च दर्शनात्। अन्ये तु ज्वालाकीलयोर्नियमार्थमित्याहुः, तदप्यसत् शिखायामपि वह्न्यर्चि-र्मात्रवृत्तेः। शिखा ज्वालाबर्हिचूडालाङ्गलिक्यग्रमात्रक इति कोषदर्शनात्। वयन्तु ब्रूमः पञ्चैव वाचकान्यर्चिषः वह्नेरिति तु तेजोमात्रवाचकानि। अर्चिर्विशेषेणाग्नि-द्युतौ वर्तते, धातुरिव गैरिक इत्येतत्सूचनार्थमिति। पञ्चाग्निशिखायाः॥ त्रिष्विति॥ स्फुता स्फुत्कारेण लिङ्गति गच्छति स्फुलिङ्गः लिगिर्गत्यर्थः अच् पृषोदरादित्वाल्लोपो ह्रस्वश्च। स्फुलिर्भावे किः, स्फुलिं गच्छति भावे खच् स च डिच्च स्फुलिङ्ग इति त्वन्यः। स्फुशब्द एव स्फुत्कारवृत्तिरिति तु कलिङ्गः। त्रिष्विति स्फुलिङ्गं जातात्विति स्फुलिङ्गा अजादिपाठात् न ङीप् कन्दरावत्। अग्नेः कणोऽग्निकणः। द्वे अग्निकणायाः॥ सन्ताप इत्यादि॥ सन्तपनं सन्तापः घञ्। संज्वरयतीति संज्वरः अच्। समौ समानार्थौ समलिङ्गौ। द्वे सन्तापस्य॥ धर्मराज इत्यादि॥ ५६

धर्मराजः पितृपतिः समवर्ती परेतराट्।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः॥* ५७

धर्मस्य राजा धर्मराजः। समवर्ती रिपौ मित्रे च समवर्तनात्। परेतराट् प्रेताधिपः। कृतोऽन्तो विनाशो येन कृतान्तः। शमयति शमनः। यमेन राजते यमराट्। यमयति यमः, यमलजातत्वाद् वा। कलयत्यायुः कालः। श्राद्धदेवः पितृपतित्वात्, श्राद्धे देवत्वाद्वा, यद्वा विवस्वदपत्यसामान्यान्मनुवत्, यद्दुर्गः श्राद्धदेवोऽर्कजो मनुः। अन्तं करोति अन्तयतीत्यन्तकः ण्वुल्॥ ५७

यथापराधदण्डनाद्धर्मोऽस्तीति धर्मः, स चासौ राजा चेति धर्मप्रधानो वा राजा धर्मराजः, टच्। धर्मस्य राजेति तु स्वामी। पितॄणां कव्यवालादीनां पतिः पितृपतिः। शत्रुमित्रयोः समं वर्तितुं शीलमस्येति समवर्ती णिनिः। परेता मृतास्तेषु

* प्रेताधिपः पाशहस्तः कीनाशो मृत्युरर्कजः। इत्यधिकम् ङपुस्तके एव।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजत इति सत्सूद्विषेति क्विप्, परेतराट् जान्तः। कृतोऽन्तो विनाशोऽनेनेति कृतान्तः, निष्ठेति पूर्वनिपातः। यमुनाया नद्या भ्राता, ऋदन्तः। शमयतीति शमेर्ण्यन्ताल्ल्युः। यमा मृत्युप्रभृतयो यमकिङ्करास्तेषु राजत इति यमराट् पूर्ववत्, यमेन संयमेन राजत इति तु स्वामी। यमयतीति यमः यमयोगाद्वा। कलते प्राणिनां धर्माधर्माविति कालः, कल संख्याने भौवादिकात् बहुलवचनात् कर्तरि घञ्, कलयत्यायुरिति तु स्वामी। कालाख्यस्य दण्डस्य धरो दण्डधरः, अच्। श्राद्धं पितृक्रिया तदंशभागित्वात् पितृपतित्वाद्वा श्राद्धदेवः। विवस्वतोऽपत्यं वैवस्वतः, अण्। अन्तं कायतीत्यन्तकः, तत्करोतीति णिजन्तात् ण्वुल। चतुर्दश यमस्य॥ राक्षस इत्यादि॥ ५७

तथा "दण्डधरो दण्डधारः श्राद्धदेवोऽन्तको यम इति हड्डः, च, (—साज्ञः, य.)

राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्र(श्र)प आश(शि)रः।
रात्रिञ्चरो रात्रिचरो कर्बुरो निकषात्मजः।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी॥ ५८

रक्ष एव राक्षसः, स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति पुंस्त्वम्। कुणपमत्ति कौणपः। विशेषेण क्रव्यं मांसमत्ति, क्रव्ये चेति क्विप् अण् च। अस्रं रक्तं पिबत्यस्रपः, आतोनुपसर्गे कः। न श्रपयति क्रव्यात्त्वात् अश्रप इत्येके। आशृणाति हिनस्ति आशरः। रात्रौ चरति रात्रिञ्चरः, चरेष्टः, रात्रेः कृति विभाषेति पक्षे नुम्। कर्बुरो वर्णेन, कर्ब हिंसायां वा। निकषा रक्षसां मातेति (नाम, क) माला। अतो नैकषेयभ्रान्त्या कैकसेयमाहुः। यातूनि यातना धीयन्तेऽस्मिन् यातुधानः। पुण्यजनो विपरीतलक्षणया। निर्ऋतेर्दिक्पालस्यापत्यं नैर्ऋतः। यातयति व्यथयतीति यातुशब्दो भीमवत्। रक्षन्त्यस्माद्रक्षः। विथुरोऽपि। कीनाशो नानार्थे॥ ५८

भीमत्वाद्रक्षन्त्यस्मादिति रक्षः, रक्ष पालनेऽसुन्। प्रज्ञाद्यणि राक्षसः॥ स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति पुंलिङ्गः कुणपः शवस्तद्भक्षणं शीलमस्येति कौणपः, शीलमित्यण्। कुणपमत्तीति शेष अणिति तु कौमुदी। कुणपा रक्षोमाता तस्यापत्यं कौणप इत्यन्ये। क्रव्यमत्तीति क्रव्यात् क्रव्ये चेति विट् क्रव्याद इति मांसवाचककृत्तविकृत्तशब्द उपपदे अदेः कर्मण्यण्, पृषोदरादित्वात् कृत्तविकृत्तशब्दस्य क्रव्यादेशः। अदोऽनन्ने इत्येवं सिद्धे क्रव्येति सूत्रं वासरूपविधिना प्राप्तस्याणो निवृत्त्यर्थमिति न्यासः। कौमुदीकारादयस्तु "पृषोदरादित्वात् क्रव्यभावे कृत्तविकृत्तपक्वमांसभक्षकः क्रव्यादः आममांसभक्षकस्तु क्रव्यादिति जयादित्यानां प्रमादः। नैर्ऋतः कर्बुरः क्रव्यात् क्रव्यादोऽस्रप आशर इति शब्दार्णव-संसारा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्त्तादावविशेषेणैव निबन्धादिति हट्टचन्द्रः। सोऽयं चन्द्रे कलङ्को हट्टचन्द्रस्याप्रतिसन्धानदोषात्। शब्दार्णव एव रक्षःपर्याये द्वावेतौ पठित्वापि पुनः कृदध्याये "सदान्नादकणादौ च स्यात् क्रव्यादाममांसभुक्। क्रव्यादः कृत्तविकृत्तपक्वमांसभुगुच्यते", इत्युक्तेः तस्माद्राक्षसरूढिरूपेण द्वे एते संज्ञे सामान्येन यौगिकत्वे तु जयादित्यव्यवस्थेत्याहुः। अस्रं रक्तं पिबतीति अस्रपः सदन्त्यः। न श्रपयति क्रव्यत्वादश्रप इति पचाद्यचि सतालव्योऽपीति गोवर्द्धनीयोणादिवृत्तिः। सुराशीध्वोरित्युपसंख्यानात् अस्रप इत्यत्र गापोष्टगिति न भवति। आशृणातीत्याशरः शृ हिंसायां तालव्यशः। आशिर इति पाठे अशेर्णिच्चेति (१. ५३.) किरच्, आशिरी हनुषः शङ्कः क्रव्यादोऽस्रप आशर इति संसारावर्तः। रात्रौ चरतीति रात्रिचरः, चरेष्टः, रात्रेः कृति विभाषेति पक्षे मुमि रात्रिंचरः। कर्बुरो वर्णेन कर्व हिंसायामित्यतो मद्गुरादयश्चेति निपातनात् कुरचि। कर्वर (वूं, घ) इति च पाठः—"नैऋतः कर्बुरः क्रव्यात् कर्व (वूं, घ)रो यातुरक्षसी, इति शब्दार्णवः। अत्र कृगृशृवृञ्चतिभ्यः ष्वरच् (२. १२३.)। निकषा रक्षसां माता तस्या आत्मजत्वान्निकषात्मजः षमूर्द्धन्यः। यातुसंज्ञां दधातीति यातुधानोऽन्तस्थादिः, या प्रापणे कमि-मनि-जनि-गा-भा-या-हिभ्यश्चेति तुः(१. ७३.) यातुरर्धर्चादिरिति शवरस्वामी, धात्रः कृत्यल्युटोबहुलमिति ल्युट्। यातूनि रक्षांसि दधाति पुष्णाति स्वजातिपोषकत्वादिति वा। यातूनि यातना धीयन्तेऽस्मिन्निति तु स्वामी। जातु कदाचिद्रन्ध्रं प्राप्य धानं सन्निधानमस्येति चवर्गादिरपीति पुरुषोत्तम इति कौमुदी। भद्रमङ्गलादिवद्विरुद्धलक्षणया पुण्यजनः। नैर्ऋत्यां दिशि भवो विद्यमानः शेषे अण् तदपत्यं वा नैर्ऋतः। यातयति व्यथयति यातु रक्षः पूर्ववत् द्वे क्लीवे। पञ्चदश राक्षसस्य॥ प्रचेता इत्यादि॥ ५८

(कर्वर) कृधातोर्वरच् इति निरुकारमध्य इति शबरस्वामिनन्दिनौ। कर्व्र वर्णे इत्यस्य मद्गुरादित्वान्निपात इति सुभूतिगोवर्धनौ। कर्व हिंसायां कुर इति रामः। कर्वूरो दीर्घमध्योऽपीति मिश्र इति नृसिंह आह।……यातु यातुप्रवीणानां प्रणम्य चरणान्यसौ। (नरो न रोपप्रकरं सोढुमिन्द्रजितः क्षमः। म.) इत्याभिनन्दयमकात् यातुरन्तस्थादिः, च.

कर्बूराधिपतेर्महेशमनसो भूयादनर्थो महान् इति दीर्घमध्यप्रयोगः, ज.

प्रचेता वरुणः पाशी यादसां पतिरप्पतिः॥ ५९

प्रचेतयते प्रचेताः, असुन्। वृणोति वरुणः। यादसां जलचराणां पतिः, यादःपतिरिति वाच्ये पक्षे वाक्याभ्यनुज्ञानम्। अपां पतिरप्पतिः॥ ५९

प्रचेतयति प्रचेता असुन्। "वरं वृणन्ति तं देवः वरदश्च वरार्थिनाम्। धातुर्वृ वरणे प्रोक्तः तस्मात् स वरुणः स्मृत इति शाम्बपुराणम्। वृणोतेः कृवृदारिभ्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उनन् इत्युनन्, व्रियत इति वरुणः। नागपाशयोगात् पाशी नान्तः। यादसां जलजन्तूनां पतिः तत्पुरुषे कृतीत्यल्युक्, लुकि तु यादःपतिरपि। अपां पतिरप्पतिः। अलक्ष्यपांपतिरपि। पञ्च वरुणस्य॥ श्वसन इत्यादि॥ ५९

वरणो वरुणो नत इति द्विरूप (कोषः), च.

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः।
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः॥ ६०
समीरमारुतमरुज्जगत्प्राणसमीरणाः।
नभस्वद्वातपवनपवमानप्रभञ्जनाः॥ ६१

श्वसन्त्यनेन श्वसनः। स्पृशति स्पर्शनः। वाति वायुः, कृवापाजेति उण्। मातरि खे श्वयति मातरिश्वा। पृषन् मृगविशेषोऽश्वोऽस्य पृषदश्वः। पृषन्ति अम्बुकणा अश्वा अस्येत्येके। गन्धस्य वहः अकारादनुपपदात् कर्मोपपदो विप्रतिषेधेनेत्यस्य प्रायिकत्वात् पक्षे कर्मरायणि गन्धवाहः। अनन्त्यनेन अनिलः, न निलति वा णिल गहने। समीरयतीत्यचि चलनशब्दार्थेति युचि च समीरसमीरणौ। समेति समी (मि, ख)र इत्यपि एकदेशविकृतस्यानन्यत्वात्। म्रियन्तेऽनेन मरुत्। मरुदेव मारुतः स्वार्थेऽण्। नभोऽस्यास्ति नभस्वान्, तसौ मत्वर्थ इति भसंज्ञा। पवते पवनः, युच्, तथापूङ्यजोः शानन् (३. २. १२८.)। प्रभनक्ति प्रभञ्जनः प्रकम्पनो महाबलश्च। वृष्ट्याकुलश्चण्डस्तु भञ्झामरुत्॥ ६०-६१

श्वसित्यनेन श्वसनः श्वस प्राणने ल्युट्। स्पृशति स्पर्शनः स्पृश संस्पर्शे ल्युः। बहुलमन्यत्रापि इत्यौणादिको युजिति सर्वानन्दः। वातीति वायुः, वा गतिगन्धनयोः कृत्रापाजिमीत्युण्। मातरीति सप्तम्यन्तप्रतिरूपकं ब्रह्माण्या नाम, तत्र श्वयति वर्धते मातरिश्वा। अयं किल गर्भस्थ एव शक्रेणोनपञ्चाशद्भागः कृतः। श्वन्नुक्षन्नित्यादौ निपातितो नान्तः। सदागमनात् सदागतिः। पृषन्मृगभेदः, स इव पिङ्गलोऽश्वोऽस्य पृषदश्वः मूर्द्धन्यमध्यः। वायुर्बभ्रूनथावृणोदित्यागमात्। पृषन्मृग एवाश्वोऽस्येति तु स्वामी, पृषन्त्यम्बुकणा अश्वोऽस्येति त्वन्ये। गन्धस्य वहो गन्धवहः। अकारादनुपपदात् सोपपदो भवति विप्रतिषेधेनेत्यस्य प्रायिकत्वात् पचाद्यच्, वह इत्यचा व्युत्पाद्य पश्चाद् गन्धन समासो वा। गन्धवाहः कर्मण्यण्। अनिल उक्त एव। आशु गच्छति अन्यत्रापीति डः आशुगः। सम्यगीरति गच्छति समीरः, ईर गतौ अच् सम्यगीरयति प्रेरयतीति तु कौमुदी। म्रियन्तेऽनेन क्रुद्धेन मृग्रोरुदित्युत्(तिः ?)। मरुदेव मारुतः प्रज्ञाद्यण्। मारुतः श्वसनः प्राणः समीरो मरुतो जगदिति संसारा-व्रतात् मरुतोऽपि, अतएव [illegible] पृथगपि। तत्र द्यति-गमि-जुहोतीनां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३. २. १७८. २.) द्वे चेति क्विपि द्वित्वे गमः काविति मलोपे तुकि जगत् जगतौ, यदा वर्तमाने पृषद्बृहन्महज्जगच्छतृवदित्येतन्नास्ति (२. ८४.)। नभोऽस्यास्तीति मतुप् नभस्वान्, तसौ मत्वर्थ इति भसंज्ञा, पदत्वबाधान्न रुत्वम्। स हि नभःस्वामी, तथा च वायुपुराणम्—"शब्दाकाशबलानाञ्च वायुरीशस्तथाकृत" इति। वातीति वा गत्यादौ हसिमृग्रिण् (णि, ङ)वाऽमिदमिलूपुधुर्विभ्यस्तनि वातः (३. ८६.)। बाहुलकात् वातेस्तिरिति तिप्रत्यये वातिः (? ५. ६.)। वायुर्मरुत्वान् श्वसनः समीरः (मरुतो मारुतः, ङ) पवनोऽनिलः। नभस्वान् त्विषणुर्वातिः सुषिरो नद्यटो (रघटो, ग) वह (न, ङ) इति साहसाङ्कः। पुनाति जगत् पवनः बहुलमन्यत्रापीति युच्। पवमानः पूङ्यजोः शानन्, आने मुक्। प्रकृष्टम् उच्छ्रितं भनक्ति प्रभञ्जनः ल्युः। विंशतिर्वातस्य ॥ प्राण इत्यादि ॥ ६०-६१

पृषतः अदन्तोऽपि तथा च पृषताश्च इत्यपीति। उभयथापि मूर्धन्यतालव्यवानिति वादिनी (तालव्यमध्योऽपीति माधवी, तत्र युक्तिं न पश्यामः, त.)······(जगत्प्राणः) एक इति सुभूतिः, तथाहि मालत्यां—'क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यती'ति। सानुषङ्गोपि जगन्त्शब्दः, तस्य जगन् इति नृसिंहः, च.

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः।
(प्राणोऽपानसमानोदानव्यानाः पञ्च वायवः। ङ)
शरीरस्था इमे, रंहस्तरसी तु रयः स्यदः ॥ ६२
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्।
सत्वरं चपलं तूर्णमविलम्बितमाशु च ॥ ६३

प्राणेन प्रपूरणेन अपसरणेन समन्तात् ऊर्ध्वं व्याप्त्या च अनित्यनेनेति घञ्। आनयतेर्डान्तस्यैतानि रूपाणीति योगशास्त्रम्। एते शरीरे व्यापका अपि नियतस्थानस्थाः। यदाहुः "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥" वायोर्धर्मानाह रंहत्यनेन रंहः। तरत्यनेन तरः, असुन्। रयते रीणाति वानेन रयः, अच्। स्यन्दतेऽनेन स्यदः, स्यदो जव इति साधुः। जवनं जवः, जुङ् गतौ, ऋदोरप् (३. ३. ५०)। वाजोऽपि। वेगो नानार्थे॥ शिङ्घति व्याप्नोतीति शीघ्रम्। त्वरते स्म त्वरितं, तूर्णञ्च, विभाषा भावादिकर्मणोरितीट्, ज्वरत्वरेत्युपधाया ऊठ्। लङ्घते लघु। क्षिपति क्षिप्रम्। (६. ४. २०) अर्तेररम्, अव्ययम्, नामेत्यन्ये यच्छाश्वतः—"अरमङ्गे रथाङ्गस्य शीघ्रशीघ्रगयोरपि।" द्रवति स्म द्रुतम्। सह त्वरया वर्तते सत्वरम्। न विलम्बते स्म अविलम्बितम्। अश्नुते आशु, कृवापाजीति उण्। सवेगगतिवचनो जवः, धर्मवचनास्तु शीघ्रादय इति अर्थभेदः॥ ६२-६३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः-सर्वशरीरगः ॥ अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम्। भाषणादि निमेषादि तद्व्यापाराः क्रमादमी ॥ प्राद्युपसर्गाद्यथाक्रमं प्रसरणेनापसरणेन समन्तादूर्ध्वेन व्याप्त्या च अनित्यनेन घञि अनितेरिति (८. ४. १९) णत्वम्, एवमपानादयः। देहस्थपञ्च-वायूनां पृथक् पृथक् ॥ वायुधर्मत्वेन वायुप्रस्तावे रंह आदीनाह रंह इत्यादि ॥ रमतेऽनेन रमेर्हुक् चेति (४. २१३) असुन् हुगागमश्च, रंहत्यनेनेति वा रहि गतौ असुन् "रंहः संघः सुराणा"मित्यत्रापि हकार एव घकारस्तु प्रामादिक एवेति पुरुषोत्तम-गोवर्धनौ, रघिधातोस्त्वसुन् नेष्यते, रहि गतावित्यतोऽसुनि सिद्धे रंघेरसुन्निरासार्थं रमेश्चेति सूत्रणादिति। तरन्त्यनेन तरतेरसुन् तरः। री (रि) णात्यनेन री गतिरेषणयोः एरच् रयः। स्यन्दन्त्यनेन स्यदः स्यदो जव इति निपातितः। जवनं जवः जु इति सौत्रो धातुः ऋदोरबित्यप्, वर्ग्यो जः—'गजवती जवतीव्रहया चमू'रिति रघोः ॥ पञ्च वेगस्य ॥ अथेति ॥ रंहआदयः सवेगगतिवचनाः। शीघ्रादयस्तु धर्मवचनाः। एतावता पृथङ्निर्देशः। अतएव शीघ्रं पचतीति प्रयोगो भवति नतु जवं पचतीति। शिङ्घति व्याप्नोति शीघ्रादयश्चेति शिङ्घेरक् शीघ्रम्। त्वरते स्म त्वरितं, रुष्यमत्वर-संघुषास्वनामिति वा इट्। लङ्घ्यते लघु, लघि शोषणे, लघिबंह्योर्नलोपश्चेति कुन् (१. ३०.), नलोपश्च। क्षिपति क्षिप्रं, क्षिपेः स्फायितञ्चीत्यादिना रक्। अरमिति ऋ गतौ अप् बाहुलकात् क्लीवत्वम्, अरमव्ययमिति तु स्वामी। द्रुतमिति द्रु गतौ भावे क्तः। सह त्वरया वर्तते सत्वरम्। चुप मन्दायां गतौ, चुपेरच्चोपधाया इति (१. ११०.) कले चपलम्। तूर्णमिति ज्वरत्वरेत्यादिना ऊठ् रदाभ्यामिति नत्वं। विलम्बतेर्भावे क्तः, नञ्समासः अविलम्बितम्। अशू व्याप्तौ, कृपावाजीत्यादिना उण् आशु। एकादश शीघ्रस्य ॥ सदागतिप्रसङ्गेन सततादीनाह। सततमित्यादि ॥ ६२-६३

एते पञ्च इति केचित्। तार्किकास्तु क्रियाभेदादेकस्यैव संज्ञाभेदः।····· रघेर्गत्यर्था-दधनि रङ्घ इति साञ्जधातुपारायणौ। अंहोरंहोद्रुहणा संहर्षांह्यो कवर्गतुर्याश्चेति गदसिंहोऽपि। ······(रयः) भागवते तु सान्तस्यापि प्रयोगः, च.

आद्यभुवनगुरोरंहसा सोंऽहिरंह इति वृद्धशतके हकारानुप्रासः। सूर्यशतके तु रंघःसंघः सुराणामिति घानुप्रासः प्रमादः। रयोऽदन्तः 'वरदाय नमो हरये पतति यं स्मरन्नपि न मोहरये' इति वृन्दावनयमकात्। (जवनः) चवर्गादिरयं गजवती जवतीव्रहया चमूरिति रघुयमकात् स्फुटसरोजवना जवना नदीरिति भारवेश्च। ज. (यवनश्च, त).

सततेऽनारताऽश्रान्तसन्तताविरतानिशम्।
नित्यानवरताऽजस्रमप्यथातिशयो भरः ॥ ६४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्।
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च।
क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्व(भेद्य)गामि यत्॥ ६५

सदागतिप्रस्तावादाह सन्तन्यते स्म सततं समो वा हिततततयोरिति पक्षे मलुक्। आरतविरतावरतशब्दा विरामार्थाः, ततो नञ्समासः। न श्राम्यति स्म अश्रान्तम्। अविद्यमाना निशाऽत्र अनिशं, साहि विरतिस्थानम्॥ नियतं भवं नित्यम्। न जस्यति तच्छीलमजस्रं, नमिकम्पीति रः॥ अतिशेते जयत्यनेनातिशयः। भरः पूर्णता, भृ भरणे ऋदोरप्। अतिक्रान्तो वेलामर्थं मात्रां च। बिभर्ति भृशम्। उद्गाहते स्म उद्गाढम्। निःशेषेण भरोऽत्र निर्भरम्॥ तीवति तीव्रं, तीव स्थौल्ये रक्। एको निश्चितोऽन्तोऽत्र एकान्तम्। निताम्यति स्म नितान्तम्। क्षुब्धस्वान्तध्वान्तेति बाढं भृशे साधु, दृढः स्थूलबलयोरिति दृढं बलमिति साधु। अतिमर्यादं दरश्च॥ सततमविच्छेदः प्रकर्षस्त्वतिशय इति अर्थभेदः। असत्त्वे गुणक्रियाविशेषणत्वादद्रव्यवृत्तित्वे सति शीघ्राद्या नपुंसके यथा भृशं मूर्खः भृशं याति। एतन्मध्याद् यत्सत्त्वगामि द्रव्यवृत्ति तत् त्रिलिङ्गं यथा शीघ्रा स्त्री शीघ्रोऽश्वः शीघ्रं कुलम्। सत्त्वगामीति किं भरोऽयं गुणातिशयोऽयम्॥ ६४-६५

सन्तनोतेर्भावे क्तः अनुनासिकलोपः। समो वा हिततततयोरिति विकल्पेन समो मलोपे सततं, पक्षे सन्ततम्। आङ्पूर्वो रमिर्विरामे वर्तते, तथा सङ्कीर्णे "आरत्यवरतिविरतय" इति वक्ष्यते। अविद्यमानमारतमस्मिन्निति अनारतम्। अश्रान्तमिति श्रमु तपसि खेदे च भावे क्तः, अनुनासिकेत्यादिना दीर्घः। नास्ति विरतमस्येत्यविरतम्। निशाव्यापारशून्यत्वमुपचारात्, तद्रहितमनिशम्। नास्ति निशाप्रायो व्यवच्छेदकः कालोऽस्येत्यनिशमिति तु सर्वानन्दः। नित्यमिति नियतभवमित्यर्थे नियतार्थान्निशब्दात् त्यब् नेर्ध्रुव इति त्यप् (४. २. १०४. १.)। अनारतवदनवरतम्। न जस्यति अजस्रं, जसु हिंसायां सदन्त्यः, नमिकम्पीत्यादिना रः। सततमजस्रंशब्दावव्ययावपि नित्यपर्यायौ स्तः शश्वदभीक्ष्णं नित्यदा सदा सततमजस्रमिति सातत्य इत्यव्ययप्रकरणे आपिशलिः। नव निरन्तरक्रियाकरणस्य॥ अथेति। सततात्यतिशययोरयं भेदः सततं क्रियान्तरैरव्यवधानमतिशयस्तु क्रियाभ्यासः पौनःपुन्यमिति यावत्। अतिशेते जयत्यतिशयः, अतिपूर्वात् शीङ एरच्। भरः पूर्णता भृ भरणे करणे ऋदोरप् अन्योपसर्गनिवृत्त्यर्थं निर्भरम्। अतिक्रान्तं वेलां मर्यादां अतिवेलः, अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति समासः। भृशु अधःपतने, धातूनामनेकार्थत्वाद्भृशते अतिशेते, इगुपधत्वात्कः, भृशंशतालव्यम्। अर्थो निवृत्तिविषयो वा तमतिक्रान्तमत्यर्थम्। एवमतिमात्रं, मात्रा स्तोकम्। उद्गाहते स्म उद्गाढं, गाहू विलोडने क्तः, कुत्वधत्वष्टुत्व-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ढलोपदीर्घत्वानि। तीवति तीव्रं तीव स्थौल्येबाहुलकात् स्फायीत्यादिना रक्। ऋज्रेन्द्राग्रेत्यत्र बहुलवचनात् तिज निशाने अतोऽपि रन् दीर्घत्वञ्च जकारस्य वकार इति उणादौ। एकोऽन्तो निश्चितोऽत्रत्येकान्तम्। नितान्यति स्म नितान्तं, तमु काङ्क्षायां क्तः दीर्घः। गाढमुद्गाढवत्। बाढमिति क्षुब्धस्वान्तेत्यत्र निपातितं यथा ओं आं नाम अधिकं वत सत्यं बाढं इत्युभ्युपगमार्था इति श्रीभोजोऽव्ययमाह॥ दृढञ्च दृढः स्थूलबलयोरिति निपातितम्। चतुर्दशातिशयस्य॥ जवादीनां शीघ्रादीनाञ्च परं भेदमाह क्लीब इत्यादि। शीघ्रादि दृढपर्यन्तं क्रियाविशेषणत्वाददूव्ये वर्तमानं क्लीबे नपुंसकलिङ्गे वर्तते। यत्तु एषां मध्ये सत्त्वगामि द्रव्यगामि त्रिषु वाच्यलिङ्गमित्यर्थः, यथा शीघ्रं जुहोति सततं भुंक्ते, द्रव्यगामिषु यत् कलौ शीघ्रा जरा शीघ्रो मृत्युः शोघ्रं वयस्तथेति। अन्यस्त्वाहातिशयभरौ वर्जयित्वा एतयोर्नित्यमेत्रासत्त्ववचनत्वेऽपि पुंलिङ्गेन निर्देशात् घञजबन्ताः पुंसीति वचनाच्च पुंस्त्वमेवानयोः। तथा च रभसः— "गाढैकान्तनितान्तानि पुमानतिशयो भर" इति। यत्त्वतिशयं पचतीत्यादि प्रयोगस्तत् क्रियाविशेषणम्। कलिङ्गस्त्वाह तत्र सत्वगामिनः शीघ्रपर्याया आशुशब्दरहिताः सतत-पर्याया अनिशाजस्त्ररहिताः अतिशयपर्याया अतिशयभररहिताः। अत्राशुशब्दस्य वर्जनमसम्यक्। तथा च कालिदासः— "मेरुमेत्य मरुदाशुवाहन" इत्यत आशुशब्दोऽपि त्रिष्वित्यन्ये। एवमनिशशब्दस्यापि त्रिलिङ्गतां कोऽपि मन्यत इति सर्वधरः। क्वचिद् भेद्यगामीति च पाठस्तत्र भेद्यगामि विशेष्यगामीत्यर्थः॥ कुवेर इत्यादि॥ ६४-६५

(सतत) तालव्यादिरपि—"न्यविशत शततं मधुलिट् लवङ्गकुसुमेषु कुसुमेषुणार्दित" इति वृन्दावनयमकाव, "द्विरेफः शततमेव कमलं तडागे। अत्र वितिष्ठ पिब मधूनि चिरं निदाघ" इति कविकल्पलताश्लेषाच्च। भ्रमरपक्षे हे द्विरेफशत……। शेमुषीशततश्यानशस्य-शूकरशालय इति तालव्यादौ रभसः, ज.

कुवे(बे)रस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः।
मनुष्यधर्मा धनदो राजराजो धनाधिपः॥ ६६

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः॥ ६७

कुत्सितं बेरं देहोऽस्य कुष्ठित्वात् कुबेरः। त्र्यम्बकस्य सखा त्र्यम्बकसखः राजाहःसखिभ्यष्टच्। मनुष्यस्येव धर्मः श्मश्रुलत्वादिरस्य मनुष्याधर्मा, धर्मादनिच् केवलात्। धनं दयते रक्षति धनदः। एवं श्रीदः। राज्ञां यक्षाणां राजा राजराजः॥ विश्रवसोऽपत्यं वैश्रवणः, (विश्रवसा विग्रहो, क) विश्रवणेन वृत्तिर-विरविक्रन्यायेन, शिवादिभ्योऽण्। पुलस्तेरपत्यं गोत्रं पौलस्त्यः। नरो वाहनं यस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरवाहनः, वाहनमाहितादित्यनेन नरस्यानाहितवाचित्वात् णत्वं नास्ति, पूर्वपदात् संज्ञायामित्यपि नास्ति क्षुभ्नादित्वात्। किन्नरादिस्वाम्येऽपि जात्या यक्षः, यजेर्यक्षेर्वा रूपम्। एकपिङ्गः पिङ्गलैकनेत्रत्वात्। अतएव भागुरिणा हर्यक्ष उक्तः। इडविडा माताऽस्यैडविडो डलयोरेकत्वस्मरणात्॥ ६६-६७

त्रिचरणोऽष्टदंष्ट्रो जातोऽयं अतः कुत्सितं वेरं शरीरमस्येति कुवेरः। कुष्ठित्वेन कुत्सितदेहत्वे कुवेर इति तु स्वामी। "कुत्सायां किति शब्दोऽयं शरीरं वेरमुच्यते। कुवेरः कुशरीरत्वान्नाम्ना तेनैव सोऽङ्कित" इति वायुपुराणम्। अथवा कुबि आच्छादने, कुम्बेर्नलोपश्चेत्येरक् नलोपः कुबेरो धनच्छादको धनरक्षक इत्यर्थः। त्र्यम्बकस्य सखा त्र्यम्बकसखः टच्। यक्षराट् यमराड्वत्। गुह्यकादोनामीश्वरो गुह्यकेश्वरः। मनुष्य इव धम आचारः श्मश्रुलत्वादिर्वा अस्येति मनुष्यधर्मा, सप्तम्युपमानेत्यादिना समासः, धर्मादनिच् केवलादित्यनिच्। धनं दयते रक्षतोति धनदः, देङ् रक्षणे अदन्तलक्षणः कः। राजानो यक्षास्तेषां राजेति राजराजः टच्, यक्षे चन्द्रे च राजा स्यादिति त्रिकाण्डशेषः। धनानामधिपो धनाधिपः। किन्नरानामीशः किन्नरेशः। पुलस्तेः पुत्रो विश्रवाः, तस्यापत्यं वैश्रवणः तालव्यमध्यः। शिवादिभ्योऽणित्यत्र विश्रवण-रवणाविति पाठात् विश्रवणादेशोऽण् च। पुलस्तेरपत्यं गोत्रं वा पौलस्त्यः गर्गादिभ्यो यञ्, बहुत्वे लुक् पुलस्तयः। रुद्रदत्तनरयुक्तशिविकावाहनत्वात् नरवाहनः, वाहन-माहितादिति न णत्वमनाहितवाचित्वात् नापि पूर्वपदात् संज्ञायामिति णत्वं क्षुभ्नादेराकृति-गणत्वात्। यक्षः पूर्वमेवोक्तः, इं लक्ष्मीं अक्षणोति व्याप्नोति इति तु स्वामी (?)। गौरीनिरीक्षणे तत्प्रभावाद्वामे चक्षुषि नष्टे रुद्रानुनयात्तत् पिङ्गलचिह्नं देव्या दत्तमस्येत्ये-कपिङ्गः। इलविला पुलस्तभार्या अस्य पितामही, तस्यापत्यम् अपतनादपत्यमितिकृत्वाऽण् ऐलविलः। अवृद्धाभ्यो नदीमानुषीभ्य इत्यण्, इडविडा माताऽस्येति ज्योत्स्नादित्वादणि ऐड विडो डलयोरेकत्वस्मरणादैलविलोऽपीति तु स्वामी। धनदवत् श्रीदः। पुण्यजना यक्षास्तेषामीश्वरः पुण्यजनेश्वरः। सप्तदश कुवेरस्य॥ ६६-६७

एकपिङ्गलोऽपि 'एकपिङ्गलगिरौ जगद्गुरु' रिति दर्शनात्, ज.

अस्योद्यानं चैत्ररथः, पुत्रस्तु नलकूवरः।
कैलासः स्थानमलका पूर्विमानन्तु पुष्पकम्॥ ६८

स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः।
निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः॥ ६६॥ इति स्वर्वर्गः॥

अस्येति प्रत्येकं सम्बन्धः। उद्यान्त्यस्मिन् उद्यानम्। चित्ररथेन निवृत्तं चैत्ररथम्॥ नडः कूवरं रथावयवोऽस्य, नडकूवरः॥ केलयोर्जलभूम्योरास्ते के लसनमस्य वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कैलासः स्फटिकं, तस्यायं स्फाटिकोऽद्रिः ॥ अलत्यलका अल भूषणे क्षिपकादित्वादित्वाभावः। पुष्पमिव पुष्पकम्, इवे प्रतिकृतौ कन् ॥ किञ्चिन्नरोऽश्वमुखत्वात् किन्नरः, कुत्सितो नरो वा, किं क्षेप इति समासः। मयते मयुः। नियतं धीयते निधिः, किः। शेते शेवं स्थाप्यधनं धीयतेऽस्मिन् शेवधिः। ना पुंलिङ्ग इति काकाक्षिवत्। उक्तञ्च-"महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥" इति श्रीभट्टक्षीरस्वाम्युत्प्रेक्षितेऽमरकोषोद्घाट(द्घट्ट,ख)ने स्वर्वर्गः ॥ ६८-६९

अस्येति प्रत्येकमन्वीयते। उद्यान्त्यस्मिन्नित्युद्यानं, चित्ररथेन निवृत्तमित्यणि चैत्ररथमेकम् ॥ पुत्रस्तु नलकूवरः नलः कूवरो युगन्धरोऽस्य नलकूवरः। पुत्रस्तु नलकूवर इति शब्दार्णवादयोऽपि। कू पुत्रौ तु नलवराविति त्रिकाण्डशेषे द्वयमिति च नाम मूलं लगवेष्यम्। एकम् ॥ कैलास इत्यादि। केलीनां समूहः कैलं अण्, तेनास्यतेऽत्र कैलासः, आस उपवेशने, हलश्चेत्यधिकरणे घञ्। यद्वा केलिः प्रयोजनमस्य कैलः, आस्यतेऽत्रेत्यासः कैलश्चासावासश्चेति कृष्णसर्पवन्नित्यसमासः। कं जलमिला भूमिः केलयोर्जलभूम्योरास्ते, के जले लासो लसनमस्येति वा केलासः स्फटिकस्तस्यायं कैलासोऽद्रिरिति तु स्वामी। एकम् ॥ अलति भूषयति अलका अलं भूषणपर्याप्तिवारणेषु क्वुन्, शिल्पिसंज्ञयोरपूर्वस्यापीति क्वुन् (उ. २. ३२.), न यासयोरिति योगविभागात् प्रत्ययस्थात् कादिति नेत्वं क्षिपकादित्वान्नेत्वमिति तु स्वामी, बाहुलकान्नेत्वमिति तु कौमुदी। एकम् ॥ विमानमिति। पुष्प विकसने क्वुन् पुष्पकं पुष्पमिव पुष्पकं, इवे प्रतिकृतौ कन्निति तु स्वामी। विमानं तु पुष्पकोऽस्त्री नगरी त्वलका प्रभेति तु शब्दार्णवात् पुंस्त्वमपि। एकम् ॥ स्यादिति। किञ्चिन्नरोऽश्वमुखत्वात् कुत्सितो नरो वा किन्नर इति किं क्षेप इति समासः। एवं किंपुरुषोऽपि, कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात् कस्यचिच्चाश्वमुखनरशरीरत्वादिति कौमुदी। तुरङ्गस्येव वदनमस्येति तुरङ्गवदनः। मयत इति मयुः, डुमिञ्प्रक्षेपणे, भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उरिति (१. ७) उः मीनाति-मिनोतिदीङां ल्यपि चेत्यात्वं (६. १. ५०.) बहुलवचनान्न भवतीत्युणादिवृत्तिः। केचित्तु पृथक् पृथगिदं नामचतुष्टयं मन्यन्ते, तदयुक्तमन्यत्रापि सर्वत्र पर्यायदर्शनात्। चत्वारि किन्नरस्य ॥ निधिरिति। नियतं धीयते निधिः, धाञः किः शेवृ षेवृ गेवृ ग्लेवृ पेवृ (प्लेवृ मेवृ म्लेवृ, ग) सेवने। तत्र तालव्यादेर्गुरोश्च हल इत्यप्रत्यये शेवा धीयतेऽत्रेति किः, बाहुलकादापो ह्रस्वत्वं शेवधिस्तालव्यादिः। शे कल्याणेऽवधिः शेवधिरिति तु राजदेवः। शेफःश्येतौ शरभः शरावशफशूर्पशेवधिश्यामा इति तालव्यादावूष्मविवेकात् केचित्तु शेवृधातोः किरित्याहुः। अतएव धातोः पचाद्यचि शेवः, शेवान् दधातीति शेवधिः बाहुलकात् कर्तरि किरिति तु सर्वानन्दः। शेव्यते शेवं स्थाप्यधनं धीयतेऽत्रेति तु स्वामी। द्व सामान्येन निधेः ॥ शेष इति। पद्मशङ्खादयो नव निधेर्भेदाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उक्तश्च "पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ। मुकुन्दकुन्दली(नी)लाश्च खर्वश्च निधयो नवेति शब्दार्णवादयः। पुराणान्तराश्रयात् मार्कण्डेयपुराणे तु खर्वं (घ) इति हित्वाऽष्टावेवोक्ताः। निधिविशेषाणां पृथक् पृथक्। स्वर्गवर्गविवरणम् ॥ ६८-६९

(नलकूबरः) दीर्घोकारमध्यः वर्ग्यबः परमते (दन्त्य) वः नलकूबरसमानग्रीवाविति भागवते यदा तु लक्षणया उभयपरं तदा दस्राविितिवत् अतएव भागवते नलकूबरसादनमिति द्वयोर्नलकूबरपदेन संबोध्यम्।.....केचित्तु पृथङ्नामचतुष्कं मन्यन्ते, तन्न, किन्नरोऽश्वमुखो मयुरिति अन्यत्रापि पर्यायदर्शनात्, च.

जानकीराघवेऽपि 'लक्ष्मीसमृद्धिसम्पन्नः क्रीडायांश्च सपुष्पकः। श्रीतो लोहितपत्रस्त्वामशोकोऽसौ हरिष्यति'। पक्षे लोहितपा राक्षसाः तान् त्रायते इति लोहितपत्रो रावणः। पुष्पकोऽस्त्री विमानं स्यादिति हारावली। अतएव 'आगतो रामभद्रेण ध्यातमात्रः स पुष्पक' इति रामायणम्।......किमनेन गृहीतेन वा किन्नरयुगलेन प्रयोजनमिदमपसृतमश्वमुखद्वयमिति कादम्बर्यां सामान्येन प्रयोगः, माघे तु भेदोऽपि दृश्यते (विम्बौष्ठं बहु मनुते तुरङ्गवक्त्रः चुम्बन्तं मुखमिह किन्नरप्रियायाः॥ (४. ३८.)।......तालव्यादिः शेवधिः' स व्यासं धाम्नि सव्यासं मानशेवधिमानशे इति कप्फणाभ्युदययमकात्। स कप्फणः प्रसेनजितमानशे मान शेवधिं व्यासं विख्यातं सव्यान् अस्यतीति कर्मणयण्। सेवधिर्दन्त्यादिरपीति साञ्जः, ज.

'दन्त्यादिः सेवधिः प्रोक्तस्तालव्यादिश्च शेवधिरिति साञ्जदास इति माधव्यादौ', थ.

(निधिभेदः) हारावल्यां तु कुन्देत्यत्र नन्दवर्चेत्यत्र सर्वं पठन्ति, त. (पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च वर (र्च ?) श्च निधयो नव इति हारावली, म.)

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।
नभोऽन्तरि(री)क्षं गगनमनन्तं सुरवर्त्म खम्॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी॥ १
(इति व्योमवर्गः)।

न भ्राजतेऽभ्रम्। व्ययति व्योम ज्वरत्वरश्रिव्येति (६. ४. २०.) उत्वम्। पुष्कं वारि राति पुष्करम्। अम्बते शब्दायतेऽम्बरम्। न बभस्ति (भनक्ति, क) भाति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नभः। अन्तः ऋक्षाण्यत्र अन्तरिक्षं पृषोदरादित्वादित्वम्, द्यावा पृथिव्योरन्तरीक्ष्यते वा, छान्दसमित्वं वा। गच्छन्त्यनेन गगनं, नास्त्यन्तोऽस्यानन्तम्। खन्यते खम्॥ वियच्छति विरमति वियन्। विष्णोः पदं क्रमोऽत्र विष्णुपदम्। आकाशन्ते सूर्यादयोऽत्राकाशः, न काशते वा छान्दसो दीर्घः। विजहाति सर्वं विहायः। तारापथो मेघाध्वा च। महाविलं देश्याम्॥ १ इति व्योमवर्गः।

द्यो इति। द्योदिवौ पूर्वमुक्तौ। अभ्रति स्थर्यं गच्छति नित्यद्रव्यत्वात् अच्, अभ्रम्। न बिभर्ति किञ्चिदित्यभ्रं, मूलविभुजादित्वादिति तु कौमुदी। आपो भ्रस्यन्त्यस्मादित्यन्येभ्योपीति डः अब्भ्रं बकारसंयुक्तमित्येके, न भ्राजत इत्यभ्रं अन्येभ्योऽपीति ड इति तु स्वामी। व्ययति संवृणोति शून्यत्वाज्जगदिति व्योम व्ये ञो नामन्सामन्सो (सी, ङः)मन्हेमन्व्योमन्रोमन्लोमन्वेमन्वर्त्मन् पाम (प्म, ङः) न् इति (४. १५०) निपातितम्। पुष्यतीति पुष पुष्टौ, पुषः किदिति (४. ४०.) करच् (न) कित्वश्च पुष्करम्। पुष्कं वारि रातीति तु स्वामी। अम्बते शब्दायते अम्बरं, अबि रबि लबि शब्दे, ऋच्छेररन्निति (३. १३१.) बाहुलकादरन्। नभ इति नह बन्धने नहेर्दिवि भश्चेत्यसुन् (४. २१०.) भश्चान्तादेशः। न बभस्ति न भाति वा नभ इति तु स्वामी। अत्यविचमीत्यसचि नभसमदन्तश्चास्ति (३. ११७.)। अन्तरीक्ष्यते जगदस्मिन्निति अन्तरीक्षं ईक्ष दर्शने घञ्, वेदे तु छान्दसं ह्रस्वत्वमिति वर्णदेशना। अन्तःऋक्षाणि नक्षत्राण्यस्येति पृषोदरादित्वादित्वं, द्यावापृथिव्योरन्तरीक्ष्यत इति वेति तु स्वामी। गच्छन्त्यनेनेति गमेर्गश्चेति किच्च युच्गश्चान्तादेशः (२. ७७) गगनम्। नित्यत्वादविद्यमानोऽन्तो विनाशोऽस्येति अनन्तम्। देवा न भूमिस्पृशोऽन्तरीक्षगास्तेन सुरवर्त्म नान्तम्। खमिति शून्यत्वात् खातमिव खं डित्खनेर्मुट्चोदात्त (५. २०.) इत्यच्, डित्त्वात् टिलोपः, मुडागमस्त्वागमानित्यत्वान्न भवति। खन्यते खमिति तु स्वामी। वियच्छति न विरमति वियत्, वित्पूर्वात् यमेरन्येभ्योपीति क्विप्। क्वौ च गमादोनामनुनासिकलोपो भवतीति वक्तव्यमित्यनुनासिकलोपः तुक्। विष्णोः परमास्पदं विष्णुपदम्। विष्णोः पदं क्रमोऽत्रेति तु स्वामो। आ समन्तात् काशते सूर्यादयोऽत्रेत्याकाशः, काशृ दीप्तौ हलश्चेति घञ्। न काशते छान्दसो दीर्घ इति तु कलिङ्गः। काशाकाशकुशाङ्कुशमिति तालव्यान्ते चन्द्रगोमी। विजहाति सर्वं विहायः विपूर्वात् जहातेर्बाहुलकादसुन्। वा पुंस्याकाशविहायसी इति सम्बन्धः। षोडशाकाशस्य॥ (व्योमवर्गविवरणम्, ग.)

नभशब्दोऽप्यस्ति, 'नभश्च नभसा सह' इति शब्दार्णवात् (शब्दभेदात् ?) अतएव नभश्च नभस्यश्चेति श्रुतिः। नभसं खं मेघवर्त्म विहायसमिति निगम इति सिंहादौ वादिनी (=य)। (गगन) दन्त्यो नः विविततगगना नेति हरिप्रबोधयमकादेः। (विष्णुपदं)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाक्यं च दृश्यते विष्णोः पदं प्रथममग्रकरैर्व्यनक्तीति मुरारिः (=म), पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणमिति महिम्नः स्तवे। विष्णुधामादिशब्दोऽपि आकाशवाचक इति काव्यप्रकाशः। अभिज्ञाने तु मध्यमं धाम विष्णोरिति प्रयुक्तम्।......विहायशब्दोऽदन्तोऽपि विहायश्च विहायसा इति शब्दार्णवे (शब्दभेदे ?) द्विरूपः। विहायस इत्यदन्तोऽपि विहायसगतिरिति दर्शनात्, च।

गगने फाल्गुने फेने वानीरे नरवाहने। आचार्यान्युन्नये मूढो मूर्धन्यं णत्वमिच्छति' इति नकारभेदः। वस्तुतस्तु मूर्धन्यान्तमपि 'प्रचण्डतरदोर्दण्डशालिवीरतनूक्षतः। सर्वदा गगणोत्क्रान्तिक्षमो रविरिवापरः' इत्याश्चर्यमञ्जरीश्लेषात्। पक्षे अगगणस्य। खगगणोगगणोपरि राजते' इति यमकाच्च।......विहायसं स्याद् गगनं तथाद्युर्तिरिति हलायुधः, ज.

'वीद्यमाणाद्यु नक्षत्रे'रिति प्रयोगदर्शनात् द्यु नपुंसकं प्रकृत्यन्तरमिति वदति मधुमाधवीकारः, तन्न दिव उदित्यनेनैव सिद्धेः, त.

नभोऽदन्तः पुमान्, नभमस्त्री नभं व्योमेति कोषान्तरमिति केचित्, थ.

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः।
प्राच्यवा(पा)चीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः।
उत्तरा दिगुदीची स्याद्दिश्यन्तु त्रिषु दिग्भवे॥ २

दिशत्यवकाशं दिक्, ऋत्विग्दधृक्स्रग्दिगुष्णिगिति (३. २. ५६.) साधुः। कं स्कुभ्नाति विस्तारयति ककुप्। काशते काष्ठा। अश्नुते आशा। हरन्त्यनया हरित्॥ यथासंख्येन प्राची पूर्वा अवाची दक्षिणा प्रतीची पश्चिमा, सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः। प्राक् मध्ये पश्चाच्चार्कोऽञ्चत्यस्यां, अवो मध्यार्थे। अपाचीति कात्यः, जपादित्वात् पक्षे वत्वञ्च। भवार्थे प्राचीनाद्याः। उत्तरत्यतिशयेनोच्चैर्वा, उत्तरा, उत्तरमञ्चत्यर्कोऽस्यामुदीची॥ दिगादिभ्यो यत्॥ २

दिशस्त्विति॥ दिशन्ति तामिति दिशत्यवकाशं वा ददातीति ऋत्विगादिना कर्मणि क्विन्, कर्तरि तु क्विप् चेत्यनेन क्विप्टापश्चापि हलन्तेभ्य इति दिशाऽपि, "दिक्तु स्त्रियां दिशा दान्तो ककुब्देववधूः पविरि'ति (सविदिति, घ) शब्दार्णवः। कं वातं स्कुभ्नाति विस्तारयति स्कुन्भु इति सौत्रो धातुः क्विप् पृषोदरादित्वात् सलोपः। ककुब्भान्ता। केनादित्येन कुत्सितानि भानि नक्षत्राण्यत्रेति त्वन्य। ककुभापीति कश्चित्। काशते काष्ठा, काश्टृ दीप्तौ हनिकुषिनीरमिकाशिभ्यः क्थन् (२ २.), व्रश्चादिना षत्वं टाप्। आ समन्तादश्नुते व्याप्नोतीति आशा अशू व्याप्तौ अच्। हरति नयत्यनया हरित् हरतेर्दृहिरुहियुषिभ्य इतिरितीतिः (उ. १. ९६.)। ता इत्यनेन स्त्रीत्वं व्यनक्ति। दिशां बहुत्वेन बहुवचनम्। दिगेका विभ्वीति औपाधिकन्तु प्राचीत्वादीति वैशेषिकाः

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्च सामान्येन दिशाम् ॥ प्राचीत्यादि ॥ प्रथमं प्रागञ्चति उदेति सूर्योऽस्यामिति प्राची प्रशब्दोऽत्र प्राथम्ये । मध्योऽह्नोऽञ्चत्यस्यामर्क इत्यपाची, अपशब्दोऽयमपदिशवन्मध्यवाची । अवाचीत्यपपाठ एव । अवपूर्वोऽञ्चतिरधोमुखीभावे वर्तते । वक्ष्यति च स्यादवाङप्यधोमुख इति । 'अवाङ्मुखस्योपरि पुष्पवृष्टि'रिति रघुः । तेनावाचीत्यधोदिश्येव वर्तत इति तु कौमुदीकारादयः । अवो मध्यार्थः. अवा (पा ?) चीत्यपि क्वापीति तु स्वामी । प्रति पश्चाद्दिनान्ते अञ्चत्यर्कोऽस्यामिति प्रतीची, सर्वत्र ऋत्विगादिना किन्, अञ्चतेश्चोपसंख्यानमिति क्विप् (न्) । प्रतीचीयत्र अच इत्यकारलोपः चाविति दीर्घः (६. ३. १३८.), पूर्वदक्षिणपश्चिमा इति सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः, पूर्वदक्षिणपश्चिमाणां यथाक्रमेणैकैकम् ॥ उत्तरेत्यादि ॥ उत्तरति अत्रेत्युत्तरा । उत्क्रान्तो दृष्टिपथमतीतः सूर्यः अञ्चत्यस्याम् इत्युदीची उद ईदिति अञ्चतेरकारस्य ईकारः । एकमुत्तरस्या दिशः ॥ दिश्यमिति । दिशिभवं दिश्यं दिगादित्वाद्यत् । दिग्भववस्तुन एकम् ॥ इन्द्र इत्यादि ॥ २

ककुभाऽपि 'भूमिपुत्रादयः सर्वे यस्यामस्तमिते रवौ । दृश्यन्ते ककुभायां तु तत्रानिष्टं विनिर्दिशेत्' इति काश्यपः ।······प्रत्याशाकाष्ठयोराशेति तालव्यान्ते रुद्रः, 'गृहीतगोसहस्रोऽपि प्रसारितकरः पुरः । द्विजातिरिव मार्तण्डो दक्षिणाशां न मुञ्चति' इति प्रयोगः, ज.

जपादित्वात् वत्वेऽवाचीत्यपि पाठः न पुनरवपूर्वाञ्चते रूपं, तस्याधोमुखवाचित्वादिति गोवर्धनः, त.

इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ ३

विदिगपि प्रसिद्धा दिक् ॥ रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः । बुधो बृहस्पतिश्चैव दिशामीशास्तथा ग्रहाः ॥ ३

अत्र विदिगिति प्रसिद्धा दिगुच्यते । इन्द्रो वह्निरित्यादिना ऐन्द्रादिपदानां इन्द्रादीनाञ्च प्राचीपत्यादिवाचकत्वसूचनायाभिधानान्नाप्रस्तुतत्वोक्तिरिति कौमुदी । इन्द्रादयोऽष्टौ प्रत्येकं पूर्वादिदिशां स्वामिनः ॥ ऐरावतादि ॥ ३

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ ४

दिशां धारका गजा दिग्गजाः क्रमात् । ऐरावतः पुण्डरीक कुमुदोऽञ्जनवामना इति भागुरिः क्रमं व्यत्यस्तवान् । मालापि ऐरावतः सुप्रतीक इति । पुण्डरीकादिवर्णाकृतिभ्यां संज्ञा एताः । शोभनानि प्रतीकान्यङ्गान्यस्य सुप्रतीकः ॥ करिण्योऽभ्रमुः कपिला पिङ्गलानुपमाः क्रमात् । ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐरावतः पूर्वमुक्त एव। पुण्डरीकवर्णयोगात् पुण्डरीकः, अर्शआद्यच्। खर्वत्वाद्वामनः। कौ मोदत इति कुमुदः मूलविभुजेति कः, कुमुदं रक्तोत्पलं तत्तुल्यवर्णत्वाद्वा कुमुदः। कुमुदं कैरवे रक्तपद्मे स्त्रीति मेदिनी। अञ्जनवर्णत्वादञ्जनः। पुष्पमिव दन्ता अस्य पुष्पदन्तः। सार्वभौम इति तत्र विदित इति चेत्यण् अनुशतिकादीनां चेत्युभयपदवृद्धिः। शोभनं प्रतीकोऽङ्गमस्येति सुप्रतीकः। दिशां धारका गजा दिग्गजाः। इन्द्रादीनां दिशां गजानां अष्टानां पूर्ववत् क्रमेणैकैकम्। क्वचित् करिण्योऽभ्रमुरित्यपि पाठो दृश्यते, तद्धि वृत्तिरियम्। अभ्र आकाश एव माति महाकायत्वात् नान्यत्र ग्रहादौ अभ्रमुः। मा माने मितद्र्वादित्वात्कुः। अथवा भ्राम्यतीति भ्रमुः, भृमृशीतृचरीत्यादिना उप्रत्ययः, न भ्रमुरभ्रमुः मन्थरगामिनीत्यर्थः। कपिलपिङ्गलवर्णत्वात् कपिलापिङ्गले। श्रेष्ठत्वाद्वा नास्त्युपमा अस्या अनुपमा। ताम्रौ कर्णावस्यास्ताम्रकर्णी पाककर्णेत्यादिना ङीष्। शुभ्रौ शोभनौ दन्तावस्याः शुभ्रदन्ती, नासिकोदरौष्ठेत्यादिना ङीष्। अङ्गति गच्छति अङ्गना। अञ्जनवर्णत्वेनाञ्जना अस्या अस्तीति मतौ च बह्वच इत्यादिना दीर्घः अञ्जनावती। क्रमेणैरावतादीनां हस्तिनीनामेकैकम्॥ ४

अङ्गदः कपिभेदे स्यात्केयूरेऽङ्गदमिष्यते। सौम्यदिग्घस्तिकुम्भि (ग्दन्तिदन्ति, ज.) न्यामङ्गदा समुदाहृतेति वाचस्पतिः, च.

अञ्जनवर्णयोगादञ्जनावती संज्ञायामनजिरादीत्यादिना दीर्घ इति श्रीपतिः, ज.

क्लीबेऽ(बा)व्ययन्त्वपदिशं दिशोर्मध्ये विदिक्स्त्रियाम्।
अभ्यन्तरं त्वन्तरालं चक्रवाल(ड)न्तु मण्डलम्॥ ५

दिशोरिदमपदिशम्, विभक्तार्थेऽव्ययीभावः, अव्ययीभावे शरत्प्रभृतिभ्यः समासान्तः, अव्ययोभावश्चेति नपुंसकाव्ययत्वे। विशिष्टा दिक् विदिक् उभयव्यपदेशात् यदाहुः यान्यासामन्तरालानि विदिशः प्रदिशश्च ताः। अन्तरमवकाशम् आलात्यन्तरालम्। चक्राकारेण वलते चक्रवालम्, वाडते वा, वाडृ आप्लाव्ये। मण्डते मण्डलं, सूत्रद्वये दिशामित्यनुवर्तयन्ति प्रसङ्गात् सामान्येनेति सभ्यः॥ ५

क्लीबाव्ययमिति। कर्मधारयः क्लीबेत्यव्ययीभावत्वप्रदर्शनपरं, तच्च नाव्ययोभावादिति(२ ४. ८४.)सूत्रे कार्यप्रदर्शनार्थं तदप्यन्यतः सुखज्ञापनार्थं रूपव्यक्तीनां कोषकारानभिधेयत्वात्। अव्ययानामनेकार्थत्वादपशब्दोऽधिकरणप्रधानोऽव्ययवाची। अव्ययं विभक्तीत्यादिनाव्ययमितियोगविभागात् समासः। अव्ययीभावे शरत्प्रभृतिभ्य इत्यच् समासान्तः। अव्ययीभावस्येति क्लीबत्वादव्ययीभावत्वेऽपदिशम्। दिग्भ्यां विनिर्गता विदिक् शान्ता। प्रदिक्च। तथा चामरमाला—“क्लीवे दिगन्तरालानि प्रदिशो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदिशस्तथे"ति। द्वे अग्न्यादिकोणस्य॥ अभ्यन्तरमिति। अन्तरं मध्यावकाशः, अभिगतमन्तरं अभ्यन्तरम्। अन्तरं लातीति अन्तरालं कप्रत्ययः, अन्येषामपीति दीर्घः। द्वे मध्यमात्रस्य॥ चक्रेण चक्राकारेण वलते, वल वल्ल सम्बरणेऽच् पृषोदरादिः चक्रवालम्। भावे घञि वालः चक्रस्येव वालः सम्बरणमस्येति वा। चक्रकारेण वाडते वेति चक्रवाडं, वाडृ आप्लाव्येऽच्। कौमुदीकारादयस्तु डान्तमेव पठित्वा डलयोरेकत्र स्मरणात् लान्तमपीत्याहुः। मण्डयतीति मण्डलं वृषादित्वात् कलच्, मण्डं भूषां लातीति वा, मण्डते मण्डलमिति वा। केचित्तूभयत्रैव दिशामित्यनुवर्तयन्ति, तदप्रमाणं सामान्येनैव सर्वत्र दर्शनात्। द्वे मण्डलाकारेण परिणतस्य समूहमात्रस्य॥ अभ्रमित्यादि॥ ५

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः।
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत्॥ ६
घनजीमूतमुदिरजलमुग्धूमयोनयः।
कादम्बिनो मेघमाला, त्रिषु मेघभवेऽभ्रियम्॥ ७

अभ्रत्यापो राति वा अभ्रं अभ्र गत्यर्थः। न भ्रश्यन्त्यापोऽस्मादित्येके, यदुक्तम् न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः। मेहति सिञ्चति मेघः न्यङ्क्वादित्वाद्धः। स्तनेश्चौरादिकात् स्तनिहृषिपुषिगदिमदिघुषिगडिमण्डिजनिनण्डिभ्यो णेरित्नुच् (३. २९.)। वलाकाभिर्हीयते वलाहकः वारिवाहको वा॥ हन्यते वायुनाघनः, मूर्तौ घन इति साधुः। जीवनस्य जलस्य मूतः पुटबन्धो जीमूतः। मोदन्तेऽनेन मुदिरः। धूमो योनिरस्य धूमयोनिः॥ कमाददते कादम्बा मेघास्ते सन्त्यस्यां कादम्बिनी, कदम्बे विकाशो वास्त्यस्याम्। मेघिका देश्याम्॥ समुद्राभ्राद्घः, छान्दसत्वमतन्त्रम्॥ ६-७

अभ्रति गच्छतीत्युपाध्यायसर्वस्वादिः। अतएव माघे घनमदभ्रमराजीति यमकितम्। अपो बिभर्तीति मूलविभुजादित्वात् के बकारवदिति तु वैयाकरणाः। न भ्रश्यन्त्यापोऽस्मादिति पौराणिकाः। तदुक्तं—"न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यत" इति। मेहति सिञ्चति, मिह सेचनेऽच्, न्यङ्क्वादित्वात्कुत्वं मेघः। वारि वहतीति कर्मण्यण् वारिवाहः। स्तन गदी देवशब्दे चुरादावदन्तः। अतःस्तनिहृषिगदिमदिभ्यो णेरित्नुच् अयामन्तेत्ययादेशः स्तनयित्नुः। वारिवाहो वलाहकः पृषोदरादिः। वलादाह्रियते कमनेन बलाहकः पृषोदरादिः, वलाकाभिर्हीयत इति वा। जलस्य धारा धरतीति धाराधरः अच्। एवं जलधरः। तडित्वान् मतुबन्तः झय इति वत्वम्। वारि ददातीति वारिदः कः। अम्बूनि बिभर्ति अम्बुभृत्। हन्ति सन्तापमिति घनः, हन्यते वायुना घन इति तु स्वामी। मूर्तौ घन इति बाहुल्यात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्तरि हन्तेरप् कुत्वञ्च। जीवनं जलं मूतं मूङ् बन्धने, पृषोदरादिः। जीवनं मुञ्चति पृषोदरादिः। जीवनस्य मूतः पुटबन्ध इति तु स्वामी। मोदन्तेऽनेन मोदयति प्रजा इति वा मुदिरः, इषिमुदिमदीत्यादिना किरच्। जलं मुञ्चतीति क्विप् जलमुक् चान्तः। धूमो योनिः कारणमस्य धूमयोनिः। यद्यपि शब्दार्णवे "मेघास्तु त्रिविधास्तत्र वह्निजा धूमयोनयः। निश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः। यज्ञजास्तु घना घोराः पुष्करावर्तकादय" इति तथाप्यन्यत्राभेदोऽपि दृश्यते इतीहापि तथा। पञ्चदश मेघस्य॥ कादम्बिनीति। कादम्बाः पक्षिणो वलाकावत् मेघमनुधावन्ति तद्योगात् ज्योत्स्नादित्वादणि(?) ङीपि कादम्बिनी, कदम्बस्य विकाशः समुदयः सोऽस्यास्तीति कार्यत्वेनेति तु स्वामी। द्वे मेघपंक्तेः॥ त्रिष्विति। अभ्रियं भवार्थे समुद्राभ्राद्घः छान्दसत्वमतन्त्रमिति स्वामो। एकम्॥ ६-७

स्तनितं गर्जितं मेघनिर्घोषे रसितादि च। (रसितं ध्वनितं तथा, ङ)
शम्पा(म्बा)शतह्रदाह्रादिन्यरावत्यः क्षणप्रभा॥ ८
तडित् सौदाम(मि)नी विद्युच्चञ्चला चपलापि च (चपला अपि, क)
स्फू(स्फु)र्जथुर्वज्रनिष्पेषे(निर्घोषे) मेघज्योतिरिरंमदः॥ ९

आदिशब्दात् ध्वनितगर्जादि। शं पिबति शम्पा, शम्बेति प्राच्याः शम्बति नायनं तेज इति च व्याख्यन्। शतह्रदोऽर्चिर्विद्यतेऽस्याः शतह्रदावाडवज्योतिष्ट्वात्। ऐरावतोऽभ्रगो नागस्तस्य स्त्री ऐरावती। क्षणप्रभाऽचिरद्युतिः॥ ताडयति तडित्, ताडेर्णिलुक्। सुदाम्न अद्रिण एकदिक् सौदामनी, तेनैकदिगित्यण्। विद्योतते विद्युत्। चटुला देश्याम्॥ स्फूर्जनं स्फूर्जथुः, ट्वितोऽथुच्। निःपेषः सङ्घट्टोत्थः शब्दः, अशन्याघात इत्येके। एतेन वज्राशन्योस्तडिद्भेव(भेद, ख) त्वं मन्यते। इरयाऽम्भसा माद्यति इरंमदः, उग्रंपश्येरंमदेति साधुः। (ममैव जन्मान्तरयोगकाले विपाकविस्फूर्जथुर्न प्रसह्य इति रघुः। अन्योन्यसङ्घट्टमेघान्निःसृत्य यज्ज्योतिर्वृक्षादौ पतति स इरंमदः, क)॥ ८-९

स्तनितमिति स्तन गदी देवशब्दे भावे क्तः स्तनितम्। एवं गर्जितम्। रसतेः शब्दार्थात् रसितम्। आदिना ध्वनिह्रादरसादिग्रहः। चत्वारि मेघगर्जनस्य॥ शम्पेति॥ भीषणतया शं कल्याणं पवति कप्रत्यये शम्पा। शतं ह्रादा अस्या इति शतह्रदा, पृषोदरादित्वात् ह्रस्वत्वं, शतं ह्रदा अर्चींषि विद्यन्ते अस्या इति तु स्वामी। ह्रादिनीत्यावश्यके णिनिः, इरावतो मेघस्येयमित्यण् ऐरावती। ऐरावतोऽभ्रगो नागस्तस्य स्त्री ऐरावतीति स्वामी। मेघानां राजा ऐरावतस्तेनैकदिगित्यणि ऐरावतीत्यन्यः। क्षणं प्रभा अस्या इति क्षणप्रभा। ताडयति इति तड आघाते ताडेर्णिलुक्चेति (१. १००) इति णिलुक्च तडित्। श्वेतद्विपः सुदामेति त्रिकाण्डशेषे ऐरावत-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पर्यायौ, तेनकदिगित्यण्, अन्निति प्रकृतिभावाट्टिलोपाल्लोपौ न भवत इति न्यासः सौदामनी। सुदाम्नाऽद्रिणा एकदिगिति तु स्वामी। सुदाम्नो त्वशनिर्विद्युदिति स्वकोषे सौदाम्नीत्यसाधुरिति हड्डचन्द्रः। सौदामिनीत्यप (पि, ङ) पाठः। तथा च हरिप्रबोधे –"खेऽभ्रं जगाम काञ्चनसरसमसौदामनी लताधामास्तम्। कुवलयमयमिव सरजः सरसमसौ दामनीलताधामास्त"मिति यमकात्। विद्योतते द्युतेर्भ्राजभासेति क्विप्, विद्युत्तान्ता। चञ्चतेर्घञ्, चञ्चस्तं लातीति चञ्चला। चुप मन्दायां गतौ चुपेरच्चोपधाया इति कलच्चपला। दश विद्युतः॥ स्फूर्जथुरिति। टुञो स्फुर्जा वज्र-निष्पेषे निष्पेषः संघट्टोत्थशब्दः अशन्याघात इत्येके। निष्पेषश्चूर्णनं साटोपध्वनिश्च इह तु ध्वनिरभिप्रेतः। यथा भट्टिः—"श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनी"। "ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्य" इति रघुरुपचारात्। अतएव विपूर्वोऽपि स्फूर्जथुरत्रेति तु कौमुदी। ट्वितोऽथुच्हलि चेति दीर्घः। केचित्तु दीर्घत्वं नेच्छन्ति, तेषां सिपि धातोः रुर्वेत्यतो(८. २. ७४.)वाग्रहणानुवृत्तौ व्यवस्थितविभाषा-विज्ञानान्न भवतीति मैत्रेयः। पिषॣ संचूर्णने घञ् निष्पेषो द्विमूर्द्धन्यः। वज्र-निपातजनितशब्दस्यैकम्॥ मेघेति॥ अन्योन्यसंघट्टने मेघान्निसृत्य वृक्षादौ ज्योतिः पतति स मेघज्योतिः इरंमदः इरया जलेन माद्यति दीप्यते, मेघाग्निर्हि जलेनैव दीप्यते। उग्रंपश्येरंमदेति निपातनादिरंमदः। मेघेत्युपलक्षणं, तेन वाडवोऽपीरंमदः, सोऽपि हीरयः जलेन माद्यतीति तु कौमुदी। मेघाग्न्यादिरिरंमद इति शब्दार्णवः। द्वे वज्राग्नेः॥ इन्द्रेति॥ ८-९

"मेघस्योपरि यो मेघः स च ऐरावतः स्मृत" इत्यपरे।......"सोदाम्नी त्वशनि-र्विद्युत्" इति त्रिकाण्डशेषे यत्पठितं तदसाध्विति हड्डः। छन्दोऽनुरोधात्स्वरव्युत्केन (व्युत्क्रमेण ?) निर्दिष्टः। अतएव—'गेये केन विनीतौ वाम्' (रघु, १५ ६९.) इत्यत्र युलोपेन निर्देश इति सुभूतिः। द्विरूपकोषे सुदाम्नीत्यपि दृश्यते। शब्दार्णवे (शब्दभेदे ?) तु "सौदामनी च सौदाम्नी सौदामिन्यपि दृश्यते" इत्याह, च.

इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् (ऋजुरोहितम्)।
वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ॥ १०

धारासम्पात आसारः शीकरोऽम्बुकणाः सृताः (स्मृताः)।
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम्॥ ११

मेघप्रतिफलिता हि सूर्यरश्मयो धनुराकारेण दृश्यन्ते॥ तदेवेन्द्रधनुरुत्पाते ऋज्ववक्रं रोहितं रोहः सञ्जातोऽस्येति लोहित्वाद्वा, ऋत्यक इति प्रकृतिभावः॥ ऋज्विधौ भयादीनामुपसंख्यानं (३. ३. ५६. १.) नपुंसके क्तादिनिवृत्त्यर्थम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्विघाते वर्षस्य विघाते निरोधे अवे ग्रहो वर्षप्रतिबन्ध इति घञ्, (पक्षे ग्रहवृदृ इत्यच्, क)॥ बद्धधाराणां सन्ततं पतनं धारासम्पातः। आसरणमासारः, सृ स्थिरे भाव इति घञ्॥ शीकते सिञ्चति शीकरः। सृता वातेरिताः, यत्कात्यः "आसारो वेगवद्वर्षं वातास्तं वारि शीकरः॥ कृणोति हिनस्ति कीर्यते वा करका। क्षिपकादिः। कमण्डलौ च करक इति पुंस्यपि वक्ष्यति॥ अह्नोऽहर्निशोपलक्षणम्। अह्नि मेघेन च्छन्नमाच्छादनमिति व्यधिकरणे सप्तम्यौ वा, यद्वागुरिः "दुर्दिनं स्व(ह्य, ख)न्धकारेऽब्दैः।" वार्दलं देश्याम्॥ १०-११

इन्द्रस्यायुधमिति षष्ठीसमासः। एवं शक्रधनुरित्यपि। "रविकिरणा बहुवर्णा वातेनान्दोलिता नभसि साभ्रे। शक्रायुधसंस्थाना दृश्यन्ते यत् तदिन्द्रधनुरिति" साहसाङ्कः। द्वे इन्द्रधनुषः॥ तदेवेति॥ तदिन्द्रधनुरुत्पातादिना ऋजु अवक्रं सत् रोहितं स्यात्। रोहणं रोहः स संजातोऽस्येति तारकादित्वादितच्, रुहेः कृष्यादिभ्य इतजितोतचि वा, लोहितवर्णत्वाद्वा रोहितं, ऋत्यक इति प्रकृतिभावः। एकं ऋजोरिन्द्रधनुषः॥ वृष्टिरित्यादि॥ वृषु वृषु मृषु सेचने, स्त्रियां क्तिन् वृष्टिः। वर्षमिति अज्विधौ भयादीनामुपसंख्यानं नपुंसके भावे क्तादिनिवृत्त्यर्थमित्यच्। वृषो वर्षणादिति भाष्यप्रयोगात् वर्षणमपि। अतएव "अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति वर्षण' मिति शब्दार्णवः। द्वे वृष्टेः॥ तद्विघात इति॥ अवे ग्रहो वर्षप्रतिबन्ध इति पक्षे घञ् अवग्राहः पक्षे ग्रहवृदृ इत्यप् अवग्रहः। द्वे ग्रहादिदोषेण वृष्टिविघातस्य॥ धारेति॥ धाराणां सम्भूय पतनमासारः ऋसृ गतौ घञ्। द्वे महावृष्टेः॥ शीकर इति॥ शीकते सिञ्चति शीकरं तालव्यादिः, शश्वच्छीकरपांशव इति तालव्यप्रकरणे ऊष्मविवेकात्, शीकृ सेचने ऋच्छेररन्निति बाहुलकादरन्। वाताहतजलकणस्यैकम्॥ वर्षेति॥ कृणोति कृञ् हिंसायां कार्यते वा कृञादिभ्यः संज्ञायां वुन्, क्षिपकादिपाठादित्वाभावः। कमण्डलौ च करक इति चकारात् वर्षोपलेऽपि पुंस्त्वं दर्शयिष्यति। अतएव वर्षोपलेऽपि करका करकोऽपि च दृश्यत इति व्याडिः (रुद्रः, घ)। द्वे मेघभवशिलायाः॥ मेघेति। मेघच्छन्ने मेघान्धकारिते अह्नीति अहर्निशोपलक्षणं त्र्यहादिवत् रात्रावपि दुर्दिनम्। अतएव मेघान्धकारमात्रे रत्नकोषः दुर्दिनं जलदध्वान्तमिति। "यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः। अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिका" इति कुमारे रात्रावपि दुर्दिनप्रयोगः॥ यन्नेत्रयोर्दुर्दिनमित्यत्र त्वसम्भवस्वार्थाविनाभूतं पयःप्रवाहं लक्षयन्नश्रुवाहं लक्षयतीति श्रृङ्गारप्रकाशः। एवं लक्षितलक्षणया "अकरोत् पृथिवीरुहानपि स्तुतशाखारसबाष्पदुर्दिना"निति रघुः। वार्दलं दुर्दिने मेघे इति मेदिनिः। दुर्निन्दितं दिनं दुर्दिनमिति मेघान्धकारितदिनरात्र्योरेकम्॥ अन्तर्धेति। १०-११

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वासुकिफणामणिगणज्योतिर्वल्मीकरन्ध्राज्जिःसृत्य समेघे नभसि शक्रधनुराकारमापद्यते इत्यागमः।... ..."वज्रमिन्द्रधनुर्ज्ञेयं ऋजुरोहितमिष्यते" इत्यमरमाला। शक्रचापे मत्स्यभेदे रोहितो लोहितेऽपि च, इति रत्नदर्शनात्पर्यायचतुष्क इति कश्चित्। (शीकर) दन्त्यादिरपि कश्चित्।......घनान्धकारे वृष्टौ च दुर्दिनं कवयो विदुरिति साञ्जः, च.

कर्षवर्षवषामिषमिति नपुंसके चन्द्रगोमी।......शीकरस्तालव्यादिः 'उच्चलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षित इति सरस्वतीकण्ठाभरणे छानुप्रासात्, ज. छरधनुरित्यादि च, तथा च विक्रमोर्वश्यां 'छरधनुरिदं दूराकृष्टं न नाम शरासनमि'ति, त.

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्।
अपिधानतिरोधानपिधानच्छा(च्छ)दनानि च॥ १२

अन्तर्धानमन्तर्धा, अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वात् आतश्चोपसर्गे इत्यङ्। उपसर्गे घोः किः। वष्टि भागुरिरल्लोपमिति पक्षे पिधानम्। तिरोऽन्तर्धाविति गतित्वात् समासः॥ १२

अन्तर्धानमन्तर्धा (१.४.६५.१.) अन्तःशब्दस्याङ्किविधिणत्वेत्युपगत्वात् धाञ आतश्चोपसर्गे इत्यङ्टाप्। एवं व्यवधापि। अन्तर्धिरिति किः। वृञ् आच्छादने चुरादिः एयन्ताल्ल्युट् अपवारणम्। अन्तरपरिग्रह इति गतित्वे कुगतीत्यादिना समासः। अपवारणादिपञ्चके भावे ल्युट्॥ तिरोधानमिति तिरोऽन्तर्धाविति गतित्वे कुगतीति समासः। वष्टि भागुरिरित्यादिनाऽकारलोपे पिधानम्। छदनमिति छादेर्घ इति (६.४ ९६) योगविभागाद्ध्रस्वत्वम्। अष्टावन्तर्धानस्य॥ हिमांशुरिति॥ १२

चुरादीनोऽनित्यत्वात्छदनं पक्षे छादनमपीति साञ्जः, च.

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः।
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः॥ १३
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः॥ १४

आह्लादनाचन्द्रश्चासौ मिमीते कालं मस्यति परिणमते वा माश्चासौ चन्द्रमाः। मा अप्युच्यते सत्यभामाभामेतिवत्। उन्दते (?) इन्दुः उन्देरिच्चादेः। विधयन्त्येनं सुराः विधुः, धेट् पाने। शुभ्रांशुः सितकरः। ओषधीरीष्टे आप्यायकत्वात् ओषधीशः। अद्भ्यो जातोऽब्जः। जीवयति जैवातृकः, जीवेरातृकन्वृद्धिश्च। सूतेऽमृतं सोमः, सूयते वा, नवो नवो भवति जायमान इति श्रुतेः। ग्लायति क्षीयते ग्लौः, ग्लानुदिभ्यां डौः (२. ६४.)। सोमो राजा द्विजातीनाम्। क्षपां करोत्युद्योतयतीति क्षपाकरः। सुधामूर्तिरात्रेयो रोहिणीशश्च अमृतदीधितिः, समुद्रनवनीतं देश्याम्॥ १३-१४

Funding by IKS-MoE

हिमाः शीतला अंशवोऽस्यति हिमांशुः। चन्द्रं कर्पूरं सादृश्येन माति तुलयति चन्द्रमा', ह्लादनं माति वा चन्दे मो डिच्चेत्यसुन् (उ. ४. २२७.) चन्द्रमाः। बाहुलकात् केवलादप्यसुनि माः। अतएव माःशब्दोऽपीह चन्द्रे च सम्मतो बहुदृश्वनामित्युत्पलिनी॥ कालं मिमीते परिमाति वा माः। माश्चासौ चन्द्रश्चेति चन्द्रमा इति तु स्वामी। चन्दति आह्लादयतीति चदि आह्लादने स्फायितञ्चीत्यादिना रक् चन्द्रः। अचि रेफशून्योऽपि "हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिरिति शब्दार्णवात्। उन्दति (?) उन्दी क्लेदने उन्देरिच्चादेरिति उः आदेश्च इकारः इन्दुः। कुमुदानां बान्धवः कुमुदबान्धवः। विधुः प्रागुक्तः यद् वा विघन्त्येनं सुरा इति विधुः, पृभिदिव्यधीत्यादिना (१. २४.) बहुलवचनात् कुः। सुधा अमृतयुक्ता अंशवोऽस्येति सुधांशुरित्युपचारादिति सर्वानन्दः। एवं शुभ्रांशुः। ओषधीनामीशः आप्यायकत्वात्। निशायाः पतिर्निशापतिः। समुद्रोत्थत्वात् अब्जो जातोऽब्जः, पञ्चम्यामजाताविति डः। जीवयत्याप्यायनादिति जैवातृकः, जीवेरातुरित्यनुवृत्तौ आतृकन् वृद्धिश्चेति। सूयते जायते नवो नवो भवति जायमान इति श्रुतेः। सूयते यज्ञाङ्गं स्नानं वा करोति सूतेऽमृतं वा सोमः, षुञ् अभिषवे षू प्रेरणे वा, अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् (१. १३९.)। सा (सी), ङ मन्सीमन् इत्यादौ (४. १५०.) सीमा नान्तोऽपि। ग्लायति क्षीयते ग्लौः ग्लै हर्षक्षये ग्लानुदिभ्यां डौः। मृगाकारा भूच्छायाऽङ्के क्रोडेऽस्येति मृगाङ्कः। मृगोऽङ्कश्चिह्नमस्येति वा। कला निधीयतेऽत्रेति कलानिधिः, कर्मण्यधिकरणे चेति किः। द्विजानां ब्राह्मणानां राजा द्विजराजः। तथा च "नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः। सोमं राज्ये ददौ ब्रह्मा यज्ञानां तपसामपी"त्यागमः। भूच्छायायाः शशाकारायाः धरः शशधरः अच्। नक्षत्राणामीशो नक्षत्रेशः। क्षपां रात्रिं करोति द्योतयति धातूनामनेकार्थत्वात् क्षपाकरः। कृञो हेत्वित्यादिना टच्। विंशतिश्चन्द्रस्य॥ कलेति। १३-१४.

शश्वत्शशाङ्कशिशिरांशवपि शूकशिम्बिस्तालव्यशद्वययुताः कथिता कियन्त इति शभेदः, ज.

कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु।
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके॥ १५

चन्द्रस्येति शेषः। षड्भिरधिका दश षोडश, षष उत्वं दतृदशधासूत्तरपदादेःष्टुत्वञ्च, (६. ३. ७६.) षोडशानां पूरणः संख्याया पूरणे (५. २. ४८.) डट्। कलयति सङ्ग्रसति कला। बिम्बयति भाति बिम्बमाभोगः, सौत्रोऽयम्।

भिद्यते स्म भित्तं शकले साधुः। शक्यते भेत्तुं शकलं शकलो वा। खण्ड्यते खण्डं खण्डो वा। खण्डलं भागच्छेदौ च। ऋघ्नोत्यर्धो भागो निर्देशात् पुंसि, वाच्यलिङ्ग इत्येके, यट्टीका खण्डमात्रवृत्तितायामभिधेयलिङ्ग इति। समप्रविभागे त्वर्धं नपुंसकम् (का. २. २. २.)। दलं नेमोऽपि ॥ १५

चन्द्रस्य षोडशो भागः कला, कल संख्याने च। अत्र षोडशभाग, इति पूरणप्रत्ययान्तनिर्देशादेकादिभागस्य कलेति नामापि सिध्यति, दृश्यते च तत्रापि कलानिर्देश इति। सादृश्यलक्षणाश्रीयते तद् यथा स्वर्वैद्यौ द्वावप्येकाकारत्वात् नासत्यौ दस्रौ चोच्येते। तथाऽत्राप्येकाकारत्वादेकादिभागोऽपीति कलेत्युच्यत इति मन्तव्यम्। चन्द्रस्य षौडशभागस्यैकम्॥ बिम्ब इति॥ बेति शोभते इति बी गतिप्रजनादौ उल्वादयश्चेति वन्नुमागमह्रस्वत्वानि बिम्बः। बिम्ब्यति भाति इति तु स्वामी। मण्डलमुक्तं स्त्रियां मण्डली गौरादित्वाद् ङीषि। द्वे रविचन्द्रमण्डलस्य॥ भित्तमिति॥ भित्तं शकलमिति निपातनान्निष्ठानत्वाभावः भित्तम्। शक्यते हन्तुं शक्लृ शक्तौ शकिशम्योर्निदिति कलच् शकलम्। "शूरः समर्थे शकलश्च खण्डे, इति तालव्यादौ शभेदात्तालव्यादिः। खण्ड खण्डि भेदे भावे घञ् खण्डं अवदारणे अतो ञमन्ताड्ड इति (१. ११३.) खण्डमिति वा। शकलखण्डाभ्यां वा पुंसीति सम्बन्धः, रूपभेदात्क्लीवत्वम्। अर्धशब्दः पुंलिङ्ग एव खण्डे वर्तते, पुंस्त्वञ्च अर्धशब्दस्य बाहुल्ये शब्दान्तरसामानाधिकरण्ये तु तल्लिङ्गतापि यथार्धा शाटी अर्धं वस्त्रमिति। एतच्च अर्धं नपुंसकमित्यत्र रक्षितेनोक्तं जसि अर्धाः अर्धे वा प्रथमचरमेति विकल्पितः सर्वनामत्वात्। चत्वारि खण्डमात्रस्य अर्धमिति॥ समभागेऽर्धं अर्धशब्दो नपुंसकमेव समप्रविभागे वर्तते नान्यलिङ्ग। इति भागवृत्त्यादिः॥ ऋध्नोति सम्बध्नाति समुदायोऽनेनेत्यर्धम् ऋधु वृद्धौ, करणे हलश्चेति घञ्। तुल्यस्य खण्डद्वयस्य मध्ये एकखण्डस्यैकम्॥ चन्द्रिकेति॥ १५

(शकल) विशकलाऽशकलापवर्तां ततिरिति कप्फणायमकात् तालव्यादिः, च······ एवं चार्धश्चासौ जरती चेति त्रिलोचनलिखितं चिन्त्यम्, च.

चन्द्रिका कौमुदी ज्योत्स्ना, प्रसादस्तु प्रसन्नता।
कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम्॥
सुषमा परमा शोभा, शोभा कान्तिर्द्युतिश्छविः॥ १६

चन्द्रोऽस्त्यस्यां चन्द्रिका। कुमुदानामियं विकाशहेतुत्वात् कौमुदी। ज्योतिरस्त्यस्यां ज्योत्स्ना, ज्योत्स्नातमिस्रेति साधुः। प्रसादो नैर्मल्यम्। कल्यते लक्ष्यतेऽनेन कलङ्कः। अकि लक्षणे। लाछि लक्षणे। चहयति चिह्नं, चह कल्कने।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लाञ्छनसाहचर्याच्चिह्नादि क्लीबे। अभिज्ञानञ्च॥ प्रकृष्टा कान्तिः सुषमा सुष्ठु समेति सुष(षा)मादित्वात् षत्वम्। काम्यते कान्तिः। छ्यति छिनत्त्यसारं छविः॥ १६

चन्द्रोऽस्यामस्तीत्यत इनिठनाविति ठन्। चन्दं कायति प्रतिपादयति वा चन्द्रिका। चन्द्रमाचष्टे णिचि ण्वुल्वा। चन्द्रिमापि—"चन्द्रिका चन्द्रिमा चार्वी, (चन्द्रा इति, ङ) शब्दार्णवात्। प्रियत्वेन कुमुदस्येयमिति कौमुदी, तस्येदमित्यण्। ज्योतिरस्यामस्तीति ज्योत्स्ना, ज्योत्स्नातमिस्रेत्यादिना निपातिता। त्रयं ज्योत्स्नायाः॥ प्रसादस्त्विति। षद्लृ विसरणे घञ् प्रसादः। क्तान्तात् तलि प्रसन्नता। यस्य कस्यचित् प्रसन्नतादिषु यद्यपि वर्तते तथापि चन्द्रे निर्ज्ञातत्वादत्र निबद्धा इति तु कौमुदी। द्वयं नैर्मल्यस्य॥ कलङ्केति॥ कम् आत्मानं रङ्कयति हीनं करोति कर्मण्यण् कलङ्कः, कल्यते लक्ष्यतेऽनेन कलङ्क इति तु स्वामी। अङ्क्यते लक्ष्यतेऽनेनेति अङ्कः, अकि लक्षणे, हलश्चेति घञ्। लछ लाछि लक्षणे ल्युट् लाञ्छनम्॥ चहयति चिह्नं चह कल्कने। लक्षदर्शनाङ्कयोरन्येभ्योऽपि दृश्यत इति मनिन्, लक्ष्म नान्तम्। लक्षणं लक्षेरट् चेति (उ. ३. ७.) नः, निर्मकारमिति सुभूतिः। रभसस्तु मकारमध्यं पठति—"ज्योतिष्मत्याञ्च सारस्यां क्लीवं तु नामचिह्नयोः। स्याद् यद्वे लक्ष्मणः पुंसि सौमित्रे श्रीमति त्रिष्वि"ति॥ लक्ष्म्या अच्चेति पठ्यते (५. २. १००.) पामादित्वान्नः, ईकारस्यात्वं लक्ष्मणम्। षट् चिह्नस्य॥ सुषमेति। शोभनं समं सर्वमनयेति सुविनिर्दुर्भ्यः सुपिसूतिसमा इति षत्वं सुषमा (८. ३. ८८.)। परमा श्रेष्ठा। एकमुत्कृष्टशोभायाः॥ शोभेति॥ शोभन्तेऽनया शोभा शुभ शुन्भ शोभार्थाविति निर्देशात् गुरोश्च हल इत्यकार इत्यन्ये। तत्र किं शोभ उत शोभेति सन्देहाच्छोभेति दुर्ज्ञानमिति गुरोश्च हल इति चकारादप्रत्यय इति तु वयम्। काम्यते इति कान्तिः, स्त्रियां क्तिन्, अनुनासिकस्येत्यादिना दीर्घः॥ द्योतन्तेऽनया द्युतिरिति, द्युत दीप्तौ, इगुपधत्वात्किः, ङीषि द्युती चेति कौमुदी। छिनत्ति सत्त्वत्र(असार, ङ) मिति छविः, छो छेदने, कृविघृष्विच्छविस्थविकिकीदिविरिति(उ. ४. ५६.) ह्रस्वत्वञ्च निपातितम्। साहचर्यात् छविश्च स्त्रियाम्। चत्वारि शोभामात्रस्य॥ अवश्याय इति॥ १६

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्।
प्रालेयं मि(म)हिका चाथ हिमानी हिमसंहतिः॥ १७
शीतं गुणे तद्वदर्थाः सुशी(षी)मः शिशिरो जडः।
तुषारः शीतलः शीतो हिमः सप्ताऽन्यलिङ्गकाः॥ १८

अवश्यायतेऽवश्यायः, श्याऽऽद्व्यधेति णः (३. २. १४१.)। निह्रियते नीहारः। तुष्यन्त्यनेन तुषारः। तोहति अर्दयति तुहिनं, तुहिरर्दने। हिनोति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्धतेऽनेन जलं हिमम्। प्रलयादागतं प्रालेयं, केकयमित्त्रयुप्रलयानां यादेरियः(७. ३. २.)। मेहति मिहिका नीहारः। नीहाराख्या त्वन्या धूममहिषी धूमिका च देश्याम्॥ हिमारण्ययोमहत्वे ङीषानुक्च॥ गुण जाड्य शीतं क्लीबे श्यैङो भावे क्तः, द्रवमूर्तिस्पर्शयोः श्य इति सम्प्रसारणं, सम्प्रसारणस्येति दीर्घः। तद्वदर्थाः शीतवत्-पर्याया अभिधेयलिङ्गाः। सुष्ठु श्यायते सुशीमः। शिनोत्यर्थं श्यायते वा शिशिरः। जलति जडः, जल जाड्ये। शीतं लाति शीतलः। हिमादेरर्शआदित्वादच्॥ १७-१८

अवश्यायते शैत्यमापद्यते संहतो वा भवतीत्यवश्यायः, श्यैङ् गतौ श्याद्व्यधेत्यादिना णः। निह्रियते नीहारः अध्यायन्यायेत्यत्र चकाराद् घञ्, उपसर्गस्येति वा दीर्घः। तोषयतीति तुषेरन्तर्भावितण्यर्थात् कमेः किदुच्चोपधायाः(३. १३८) इत्यनुवृत्तौ तुषारादयश्चेत्यारन् किच्च तुषारः। तोहत्यर्दयति तुहिर् दुहिर् अर्दने वेपितुज्योर्ह्रस्वश्चेति (२. ५२.) इनन्। हिनोति वर्धते हिनोतेर्मन्(क्?)हिमं, हन्तीति हन्तेर्हिश्चेति मक्धातोश्च ह्यादेशे वा हिमम्। प्रलीयन्ते पदार्था अत्रेति प्रलयो हिमालयः। अस्मादागतं प्रालेयं अत आगत इत्यण् केकयेत्यादिना यादेरियः। मह्यते मह पूजायां क्वुन्, शिल्पिसंज्ञयोरिति क्वुन्टाबादिर्महिको, मिह सेचने मिहिकेति तु स्वामी। सप्त हिमस्य॥ अथेति। हिमानां संहतिर्हिमानी इन्द्रवरुणेत्यादिना हिमारण्ययोर्महत्वे ङीषानुकौ। द्वे हिमसमूहस्य॥ शीतमित्यादि। गुणे स्पर्शविषये शीतमिति क्लीवं रूपभेदात्, तथा च देवदत्तस्य शीतं वर्तत इति प्रयोगः। तदुक्तं—"उपैत्यन्यत् जहात्यन्यत् दृष्टो द्रव्यान्तरेष्वपि। वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृत" इति। शीतमिति श्यैङ् गतौ भावे क्तः, द्रवमूर्तिस्पर्शयोः श्य इति सम्प्रसारणं, सम्प्रसारणाच्चेति परपूर्वत्वं, हलश्चेति दीर्घः। श्योऽस्पर्शनिषेधान्न नत्वम्॥ तद्वेति। तद्वान् शीतगुणवान् अर्थो येषां ते तद्वदर्थाः सुषीमादयः सप्तान्यलिङ्गका वाच्यलिङ्गा इत्यर्थः, यथा सुषीमो वायुः सुषीमं जलं सुषीमा भूमिरिति। सुषीम इति सुषामादिषु चेति षत्वम्। स्वामी तु सुष्ठु श्यायते सुशीमा इति व्युत्पत्त्या तालव्यमध्यमाह, तदुक्तं—"सुषीमश्च सुषेणश्च सुषन्धिः सर्षपोऽपि चेति दन्त्यमूर्द्धन्य ऊष्मविवेकात्। शिशिर इति। अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिरा इति (१. ५४.) शश प्लुतगताविति अतः किरच् उपधाया इत्वञ्च निपात्यते। शश्वत्शशाङ्कशिशिराः शिशुशूकशिम्बी तालव्यशद्वययुताः कथिताः कियन्त इति शभेदः। शिनोत्यर्थं श्यायते वाऽनेनेति शिशिर इति तु स्वामी। जलति घनीभवति जल धान्येऽच्, तद्योगाज्जडः डलयोरेकत्व स्मरणम्। शीतं गुणोऽस्यास्तीति सिध्मादित्वात् लच्, शीतं लातीति वा शीतलम्। शीत इति गत्यर्थेत्यादिना कर्तरि क्तः, अर्शआद्यच् वा। सप्त शीतलस्य॥ चन्द्रप्रसङ्गान्तर्गतमुक्त्वा प्रकृतमाह ध्रुव इति। १७-१८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"कुज्झटिर्धूममहिषो हिमकूटं कुहेलिका।"......शुक्लमधुरशीता एव रूपरसस्पर्शा इति भाष्यदर्शनात् अविशेष्य एव क्लीबत्वं (—इति काश्यपेन पुंस्त्वमपि प्रयुक्तं, ज.) ......शीतार्दितो हैमगृहे निवास इति श्लेषः (दरिद्राष्टक)। शीता सीता च जानक्या-मिति द्विरूपः, च.

ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसम्भवः।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी॥ १९

चन्द्रप्रसङ्गागतमुक्त्वा प्रकृतमाह। ध्रुवति ध्रुवः, कः। उत्तानपादस्य ऋषित्वाद् ऋष्यन्धकेत्यणि प्राप्ते बाह्वादित्वादिञ्॥ अगं स्त्यायति स्तम्भितवान् अगस्त्यः॥ मित्रावरुणयोरपत्यं मैत्रावरुणिः, ऋषिसमुदायस्यानृषित्वादिञ्, देवताद्वन्द्वे चानङ्॥ पतिशुश्रूषालोपेष्वमुद्रा, न मुदं राति लोपामुद्रा। समानो धर्मोऽस्त्यस्याः सधर्मिणी पत्नी॥ १९

स्थिरत्वात्, ध्रुवः ध्रु गतिस्थैर्ययोरच्, कुटादित्वात् ङित्त्वम्, इगुपधत्वात् को वा। ध्रु स्थैर्ये स्रुवः क इति(१. ६१.)बाहुलकादतोऽपि के ध्रुव इति तु कौमुदी। उत्तानपादस्यापत्यम् औत्तानपादिः, ऋषित्वादृष्यन्धकवृष्णीत्यणि प्राप्ते बाह्वादित्वादिञ्। द्वे ध्रुवस्य॥ अगस्त्य इति। अगं विन्ध्यं त्यक्तवान् अगस्त्यः अन्येभ्योपीति डः, पारस्करादेराकृतिगणत्वात् सुट् विन्ध्याख्यमगं स्त्यायति संहतं करोतीति वा अगस्त्य इति तु स्वामी। यावदहं नायामि तावत्त्वया न वर्धितव्यमिति अगं विन्ध्याख्यं शब्दितवान् स्तम्भितवात्। गोवर्धनस्तु अगमस्यतीत्यगस्तिः वसेस्तिरिति बाहुलकादस्य-तेरपीति (४. १७९.) शकन्ध्वादिरित्याह। तथा च शब्दार्णवः—"अथागस्त्यः कुम्भयोनिरगस्तिः कलसीसुत" इति। अगस्तिनाध्यासितविन्ध्यशृङ्गमिति भट्टिः। कुम्भः सम्भव उत्पत्तिस्थानमस्य कुम्भसम्भवः। मित्रावरुणौ देवर्षी देवताद्वन्द्वे चेत्यानङ् ऋषिसमुदायस्यानृषित्वात्तस्यापत्यमिति अत इञ्। यद्यपि मित्रस्योर्वशीदर्शनाद्रेतश्च्युतं तत्तेन ह्रिया कुम्भे निहितं तत्रायं जातः अतएव कुम्भसम्भवः प्रसिद्धः। तथापि सहचाराभेदाध्यवसायादुभयतेजोजत्वाच्चोभयापत्यव्यपदेशे मैत्रावरुणिः। अतएवाभेद-विवक्षायां वारुणिरपि। तथा च भारते—"अद्यापि दक्षिणाशाया वारुणिर्न निवर्तत" इति। तथा च व्याडिः—"मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणिरिति।" अणपि दृश्यते—"और्वशेयागस्त्यमैत्रावरुणास्त्वाग्निमारुता" इति नामनिधाने। त्रीण्यगस्त्यस्य॥ अस्येति। अस्यैवागस्त्यस्य लोपयति योषितां रूपाभिमानमिति अचि टापि लोपा। मुद्रयति सुष्ठु सृष्टिमिति मुद्रा ततः कर्मधारयः। पतिशुश्रूषालोपेषु अमुद्रा न मुदं रातीति लोपामुद्रा पृषोदरादिरिति तु स्वामी। समानो धर्मोऽस्यामिति सधर्मिणी पत्नी। अन्ययोगव्यवच्छेदकोऽत्रैवकारः। एकमगस्त्यपत्न्याः॥ नक्षत्रमिति॥ १९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मन" इति बृहद्धारावली, च, ज, य.

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्।
दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी॥ २०

राधा विशाखा, पुष्ये तु सिध्यतिष्यौ, श्रविष्ठया।
समा धनिष्ठा, स्युः प्रोष्ठपदा भ(भा)द्र पदास्त्रियः (श्चये, ङ)॥ २१

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी।
इन्वका (इल्वला)स्तच्छिरोदेशे तारका निवसन्ति याः॥ २२

न क्षरति नक्षत्रं 'क्षर गतिहिंसनयोः' नभ्राण्नपादिति नञ् प्रकृत्या। ऋषति गच्छति ऋक्षणोति तमो वा ऋक्षम्। भा विद्यतेऽस्य भम्। तरन्ति अनया तारा। स्वार्थे कन्, तारका ज्योतिषीतीत्वाभावः। क्लीबेऽपि यच्छाश्वतः नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च। लक्ष्यञ्च—"द्वित्रैर्व्योम्नि पुराणमौक्तिकघनच्छायः स्थितं तारकः।" अवतेरुडुः उड(डु, क)गतौ॥ दाक्षायण्योऽश्विनीत्यादिताराः सप्तविंशतिर्भानि, दक्षस्यापत्यं दाक्षायणी, अत इञ् अनन्तरापत्येऽपि द्वैपायनवत्, यञिञोश्चेति फक् (४. १. १०१.), यद्वा इतो मनुष्यजातेरित्यत्रेञ उपसंख्यानात् ङीष्, कौरव्यमाण्डु-काभ्याञ्चेति (४. १. १९.) चकारादासुरायणीवत् ष्फः तद्धितः॥ अश्वान् युंक्तेऽश्वयुक् अश्वकर्मण्याम्नानात्॥ राध्नोति कार्यं राधा। विशाखति व्याप्नोति विशाखा, शाखृ व्याप्तौ॥ पुष्यसिध्यौ नक्षत्रे साधू। पुष्णात्यर्थान्पुष्यः। सिध्यन्त्यनेनार्थाः सिध्यः। त्विषति तिष्यः, त्विष दीप्तौ, अघ्न्यादिः॥ श्रूयते शुभकर्मणि श्रविष्ठा। दधन्ति धनं करोति धनिष्ठा। श्रविधनिभ्यामिष्ठन्॥ प्रोष्ठौ सारौ पदावस्याः प्रोष्ठपदा—अर्थगहणात् भद्रपदा सुप्रभातसुखेति साधू। फल्गुनीप्रोष्ठपदानाञ्च नक्षत्र इति (१. २. ६०.) वा बहुत्वम्॥ मृगस्येव शिरः शीर्षमस्य खे ताराकानां तथावस्था-नात्, शीर्षं प्रकृत्यन्तरम्। अग्रे हायनोऽस्य आग्रहायणी, मार्गशीर्षादारभ्य संवत्सर-प्रवृत्तेः, आग्रहायण्यश्वत्थाट्ठगिति(४. २ २२.) निर्देशादण्॥ इन्वका इति पञ्चताराः, इन्वन्ति प्रीणयन्ति इन्वकाः, मरुतो देवता इन्वका नक्षत्रमिति श्रुतेः। इल्वलास्तारका इल्वलोऽसुर इति उणादौ श्रीभोजदेवो व्याकरोत्॥ २०-२२

न क्षीयते नक्षत्रं क्षि क्षये न क्षदतीति नक्षत्रं क्षद गतिहिंसयोः सर्वधातुभ्यः ष्ट्रन्, नभ्राण्नपादिति नञः प्रकृतिभावः। नक्षधातोः अमिनक्षिकलिभ्योऽत्र (न्, उ. ३. १०५) इत्यत्रप्रत्यये नक्षत्रमित्यन्यः। ऋषति गच्छति ऋषी गतौ ऋषिवृषिमृषि-(दि, ङ)भ्यः किदिति (? ३. ६६. ,सः, षढोः कःसीति कत्वं षत्वं ऋक्षम्। भातीति भं, पूर्ववड्डः। तरन्त्यनया तारा भिदादिपाठादङ् गुणः दीर्घो निपातनात्। तारकेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्तरि ण्वुल् तारका ज्योतिषीत्वाभावः। अपिशब्देन तारकाणि वा स्त्रियाम्। अस्त्रीत्वेऽपि रूपभेदनिश्चितक्लीबलिङ्गस्योडुशब्दस्य साहचर्यात् क्लीबत्वमेव। "कनीनिकायां नक्षत्रे तारकं तारकापि चेति।" अत एव कोषान्तरम्—"नक्षत्रे नेत्रमध्ये च तारकं तारकाऽपि च।" इति शाश्वतः। तारश्च "नक्षत्रे नेत्रमध्ये च तारा स्यात् तार इत्यपि" इति व्याडिः। द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकैरिति च। अन्तिकं व्रजति तारकराजे इति भारविश्च। उड्विति डीङ् विहायसा गतौ उत्पूर्वात् बहुलवचनाड्डुः, अवतेरुडुः उड्डु(च डुङ्, गघङ)गताविति तु स्वामी। ईङ्यते मृगय्वादयश्चेति (१. ३८) ईङेरुः, आदेश्च उत्वं ह्रस्वादिः, प्रसभमुडुगणोऽसौ दर्शनीयोप्यपास्त इति माघप्रयोगात्। षट् तारकायाः॥ दाक्षायण्य इति। दक्षस्यापत्यं दाक्षिः, आसुरेरुपसंख्यानमित्यत्र केचिदासुरिदाक्ष्याविति दाक्षायणीति पारायणम्। उपाध्यायसर्वस्वेऽप्येतदेवोद्धृ(दाह्व, ङ)तम्। कलिङ्गादयस्तु तददर्शनात् नडादिभ्यः फगित्याकुलितवन्तः गोत्रत्वाभावान्नडादावाकृतिगणेऽस्यातपाठाच्च। सर्वानन्दस्तु दक्षप्रजापतेरपत्यानि दाक्षायण्यः गोत्रत्वमुपचर्य गोत्रे कुञ्जादिभ्यश्च्फञिति (४. १. ९८.) जातेरस्त्रीविषयादयोपधादिति ङीषित्याह। दक्षस्यापत्यं दाक्षायणी इत्यन्यः, अत इञ् अनन्तरापत्येऽपि द्वैपायनवत् यञिञोश्चेति फगिति तु स्वामी। स्त्रियामासुरिदाक्षिभ्यां ष्फ इत्युपसंख्यायते दाक्षायणी श्रीरिव निर्बभासे इति नन्दीति स्वामी (नन्दिस्वामी, घ)। दक्षमयते ल्युः, प्रज्ञाद्यणि दाक्षायणीत्यन्यः। ताश्चाश्विनी, भरणी, कृत्तिकाः षट् अतएव नित्यबहुवचनान्ताः, रोहिणी, मृगशिरः (राः, ङ), आर्द्रा, पुनर्वसू द्वौ, पुष्यः, अश्लेषः (षा, ङ), मघाः स्त्रियामिति नित्यबहुवचनान्ताः, पूर्वफल्गुनी (न्यौ, ङ), उत्तरफल्गुनी (न्यौ, ङ) द्वे, पाणिवत् कार्यकारित्वात् हस्तः, देवपथादिभ्यश्चेति (५. ३. १००.) कनो लुक्, ज्योतिषे तु स्त्रियामपि दृश्यते अन्याश्च व्यभिचारलिङ्गवचना दृश्यन्ते, चित्रा स्वाती च स्त्रीपुंसयोः अज्यतिभ्यामितोण् (४. १३०.), स्त्रीत्वे ङीषपि, विशाखे द्वे, अनुराधा ज्येष्ठा मूलः, पूर्वाषाढा, उत्तराषाढा श्रवणा, धनिष्ठा, शतभिषग् जान्ता, पूर्वभाद्रपदे द्वे उत्तरभाद्रपदे च द्वे, रेवतीति अश्विन्याद्याः सप्तविंशतिस्तारा दाक्षायण्य उच्यन्ते। एताः प्रसिद्धपर्यायांस्त्यक्त्वा निबध्नाति॥ अश्वयुगिति॥ अश्वं युनक्ति बध्नाति रूपेणाश्वयुक् जान्तः। ऋत्विगित्यादिना क्विन्। अश्वरूपयोगादश्विनी इनि ङीप् अश्वकर्मण्यश्विन्याश्चादानात्। द्वे अश्विनीनक्षत्रस्य॥ राधेति॥ राध्नोति कार्यमनया राधा, राध षाध संसिद्धौ, गुरोश्च हल इत्यकारप्रत्ययः। विशाखति व्याप्नोति विशाखा शाखृ व्याप्तौ अच्, तालव्यादिः। विशाखे द्वे, अतएव द्वित्वमुचितं विशाखे इति। तथा च रामायणम्—"पत्न्योर्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः। विशाखयोर्मध्यगतः संपूर्ण इव चन्द्रमा" इति। एकत्वं प्रमादादिति कौमुदी। नक्षत्राभेदविवक्षायां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वेकवचनमिति सुभूतिः। एकतारापेक्षयैकवचनमिति श्रीभोजः। छान्दसा अपि भाषायां प्रयुज्यन्त इति विशाखयोश्च (१. २. ६२.) इत्येकत्वादिति सर्वानन्दः। मारुतोऽथ विशाखयोरिति (खयेति, ङ) वाचस्पतिः। द्वे विशाखायाः॥ पुष्य इति पुष्यन्ति सिध्यन्त्यर्था अस्मिन्निति पुष्णाति साधयति कर्माणि वा पुष्यः सिद्ध्यः पुष्यसिध्यौ नक्षत्र इति क्यपि निपातितः। तुष्यन्त्यस्मिन् तिष्यः इति तुष तुष्टौ अघ्न्यादयश्चेति यक् (४. १११०) उपधाया इत्वञ्च तिष्यः। त्रीणि पुष्यस्य॥ श्रविष्ठेति श्रूयते शुभकर्मण्यतिशयेनेति श्रविष्ठा शृणोते ऋदोरबिति अप्, मतुप इष्ठन्विन्मतोर्लुगिति मतुपो लुक्। एवं धान्ये पचाद्यजन्तान्मतुबादिना धनिष्ठा। द्वे धनिष्ठायाः॥ स्युरिति। प्रोष्ठो गौः भद्रो गौः। तत्पदमिव पदमासामिति प्रोष्ठपदा भद्रपदाः। अतएवायं शब्दो ह्रस्वादिरिति वर्णविवेकः, ग्रहपतिरिव भद्रपदानुगत इति (आश्चर्यमञ्जरी, च, ज,) श्लेषश्च। तथा च पूर्वभद्रपदे द्वे उत्तरभद्रपदे च द्वे इति फल्गुनीप्रोष्ठपदानाञ्चेत्यत्रोक्तम्। किंच चान्द्रं सूत्रं—"जातेः प्रोष्ठः पदात् परस्य जे(टे, ङ)"रिति तस्मात् दीर्घादिपाठः प्रमाद इति तु कौमुदी। "भाद्रपदासु भयं सलिलोत्थ"मिति तु ज्योतिषे कुलेखकदोषात्। पूर्वे प्रोष्ठपदे द्वे उत्तरे भद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम्। केचित्तु भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गो भद्रपद इत्याहुः, यत् तु कदा पूर्वे प्रोष्ठपदे कदा पूर्वे भद्रपदे इति तत्तारकयोर्द्वित्वादुपपद्यते। सुप्रातःसुश्वसुदिवेत्यादौ (५. ४. १२०.) प्रोष्ठपदा भद्रपदाश्च निपातिताः। प्रोष्ठौ सारौ पदावस्याः प्रोष्ठपदा अर्थग्रहणात् भद्रपदा सुप्रातेति साधुः॥ फल्गुनीप्रोष्ठपदानाञ्चेति बहुत्वम्। भद्रपदौ भद्रपदश्च भद्रपदाश्चेति तु स्वामी। तत्र भद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते, तिरोहितावयवभेदपक्ष एकवचनम्। प्रोष्ठपदाशब्दस्तु त्यक्तावयवभेदं समुदायमाचष्टे, एतत्पक्षे बहुवचनमिति मैत्रेयः। द्वे पूर्वभद्रपदोत्तरभद्रपदानाम्॥ मृगेति। आकृत्या मृगस्येव शीर्षमस्य मृगशीर्षम्। मृग इव शिरोऽस्य मृगशिरः। रूपभेदात् क्लीबत्वम्। "सौम्या मृगशिरा (राः, घ ;-रसः, चज) स्युर्मृगशिराः (शीर्षाः, यज) इल्वलाः शिरस्तारा" इति स्त्रीकाण्डे, बोपालिते तु स्त्रीत्वम्। सौम्या मृगशिराऽपि (अपि, घ)। प्रतीकलक्षणया मृगश्च। मृगशीर्षे हस्तिजातौ मृगः पशुकुरङ्गयोरिति व्याडिः। अग्रे हायनमस्या आग्रहायणी मार्गशीर्षादारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यणि पूर्वपदादिति णत्वम्। यद्वा आग्रहायण्यश्वत्थाट्ठगिति निर्देशात् स्वार्थे अण्, गौरादिङीष्, अणन्तादेव ङिपि सिद्धे गौरादिषु पाठोऽस्य पुंवद्भावनिषेधार्थः। तेनाग्रहायणीभार्य इति सिध्यति। त्रीणि मृगशिरसः॥ इल्वला इति। इल्वला सान्यसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्या इति (उ. ४. १०७) इल प्रक्षेपणे (स्वप्ने, ङ) वलच्प्रत्ययो गुणाभावश्च निपात्यते। इन्वन्ति प्रीणयन्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मरुतो देवता इन्वका नक्षत्रमिति श्रुतेरिति तु स्वामी। एकं मृगशिरसः शिरोदेशस्थानां पञ्चस्वल्पतारकाणाम्॥ बृहस्पतिरिति॥ २०-२

आर्द्रं च केचित्। मूलं त्रिलिङ्गं अस्त्रीति केचित्। शतभिषा च। (प्रोष्ठपद) ओष्ठौत्वोरिति विकल्पात् ओकार औकाराविति नृसिंहः। मृगशिरा स्त्रियामिति रभसः, मृगशिरा न पुंसि स्यादिति स्मृतेः च.

'नक्षत्रताराग्रहसङ्कुलाऽपि', इति रघुप्रयोगस्तु यस्य चन्द्रमसा योगस्तन्नक्षत्रमुदाहृतमिति भेदादुपपादनीयम्। "चित्रा तु त्वाष्ट्रोऽथ स्वातिर्मारुतोऽथ विशाखया। समा राधेन्द्राग्निदेवानुराधा मैत्रदेवते"ति वाचस्पतिः, ज.

उडुशब्दस्य स्त्रीत्वमुक्तं ज्योतिषे निर्वेधाभिरुडुभिर्मृगीदृशां पाणिपीडनविधिर्विशिष्यते इति।

आर्द्रश्च नवम्यामार्द्रभे दिवेति, देवीपुराणात्। पुनर्वसुः पुंसि 'पुनर्वसौ कृतो विप्र इति स्मृतेः। पुष्या पुष्यश्च। अश्लेषा अश्लेषश्च। मघा मघश्च। हस्ता हस्तश्च। चित्रा चित्रश्च। स्वातिः स्वाती च, त.

बृहस्पतिः सुराचार्यो गीष्पति (गीःपति, गीपति) र्धिषणो गुरुः।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः॥ २३

तद्बृहतोः करपत्योश्चोरदेवतयोरिति सुट्तलोपौ। गोर्पतिः गीष्पतिः अहरादीनां पत्यादिषु इति रेफपक्षे कस्कादिदर्शनात् षत्वम्। धिषणाऽस्यास्तीति धिषणः। गृणाति उपदिशति गुरुः, कृग्रोरुच्च। जीवत्यनेन मृतसञ्जीवनीज्ञत्वाज्जीवः। अङ्गिरसोऽपत्यत्वात् आङ्गिरसः। चित्रशिखण्डिजः सप्तर्षिजः, समुदायेषु हि वृत्ताः शब्दा इति। वाचस्पतिः अलुकि षष्ठ्याः, पतिपुत्रेति सत्वम्॥ २३

बृहतां देवानां गुरुत्वात् पतिः बृहस्पतिः, तद्बृहतोः करपत्योश्चौरदेवतयोरिति तलोपसुटौ। बृहतां पतिरित्यलुकि। सुराणां देवानामाचार्यः। गिरां पतिर्गीर्पतिः, अहरादीनां पत्यादिषूभयथोपसंख्यानमिति रेफः, रेफाभावपक्षे विसर्जनीयोपध्मानीयौ गीःपतिः। गीष्पतिरित्यसाधुरिति केचित्, कस्कादित्वात् साधुरिति चान्द्राः। क्षीरस्वाम्यपि। प्रशस्तधिषणायोगात् धिषणः अर्शआदिभ्य अच्, धृषेर्धिष च संज्ञायामिति क्युः, धिषण इति तु कौमुदी। गृणात्युपदिशति गुरुः गॄ शब्दे, कृग्रोरुच्चेति कुः उच्चान्तादेशः, उरण् (१. १. ५१.) रपर इति रत्वम्। असुरैर्हतानपि मन्त्रादिना जीवयतीति जीवः। तथा च रामायणे—"तानात्तान्नष्टसंज्ञांश्च आहतासून् बृहस्पतिः। दिव्याभिर्मन्त्रयुक्ताभिरोषधीभिरजीवयदि"ति। अगि गतौ अङ्गिरा इत्यसुन्प्रत्यये इर् भावे च (इरागमश्च, ङः) निपातितः। अपत्ये ऋष्यन्धकेत्यादिना अण्, अङ्गिरसोऽपत्यं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आङ्गिरसः, बहुत्वे लुक् अङ्गिरसोऽपि। अभेदोपचारादङ्गिराश्च यथा भृगुश्चाङ्गिराश्च, भव(चर, ङ)तीति भार्गवे आङ्गिरसे साधुत्वमिति रन्तिदेवः। दिवस्पतिवद्वाचस्पतिः। ऋषयः सप्त धीमद्भिः स्मृताश्चित्रशिखण्डिन इति हारावली। अङ्गिरा एव चित्रशिखण्डो, ततो जातश्चित्रशिखण्डिजः। सप्तर्षिजोऽपि समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति कृत्वा। नव बृहस्पतेः॥ शुक्र इति॥ २३

बृहतां पतिरिति वाक्यं च। शिष्याय बृहतां पत्युरिति (माघ) प्रयोगात्, वर्ग्यो बः, च. 'गोतश्चायमर्थोऽङ्गिरसा' इति मालत्यां बृहस्पतौ प्रयोगः, ज, य.

'जीवोऽङ्गिराः सुरगुरुर्वचसां पतीज्या'विति दीपिका, थ.

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः॥ २४

शुक्रो रुद्रस्य शुक्रद्वारेण निर्गतत्वात्। कवेरपत्यं काव्यः, कुर्वादिभ्यो ण्यः, कविस्त्वभेदात् यथा जमदग्निर्वै पञ्चममवदानमवाद्यत्, चातुर्वर्ण्यात् ष्यञित्येके। वष्टीत्युशनाः, ऋदुशन इति सावनङ्। भृगोरपत्यं भार्गवः॥ अङ्गानीर्यति पीनत्वादङ्गारकः, आरस्तु भीमवत्। कोर्जायते कुजः। भूमेरपत्यं भौमः, शिवादित्वादण्। वक्रोपि॥ २४

शोचति सदा दैत्यानां नाशेनेति शुचेर्ऋज्रेन्द्रेत्यादिना रन्, शुक्रः। रुद्रस्य शुक्रद्वारेण निर्गतत्वात् शुक्र इति तु स्वामी। दैत्यानां गुरुर्दैत्यगुरुः। कविरेव काव्यः चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। कवेरपत्यं काव्यः, कुर्वादिभ्यो ण्य इति तु स्वामी। वष्टीत्युशना, वश कान्तौ, वशेः कनसिरिति कनसिः (४. २३८.), ग्रह्यादिसूत्रेण संप्रसारणं, ऋदुशन इत्यादिनानङ् उशना, सम्बोधने उशनसस्त्रैरूप्यं सान्तं तथा नान्तमथाप्यदन्तमिति विशेषः। भृगोरपत्यं भार्गवः, बहुत्वे लुकि भृगवः। कौतीति कु शब्दे अच इ कविः, कविस्त्वभेदादिति तु स्वामी। षट् शुक्रस्य। अङ्गारक इति। अङ्गति, अगि गत्यर्थः मन्दारवदारन् अङ्गारः, अङ्गार इव अङ्गारकः कन्। अङ्गानीर्यति पीनत्वादिति तु स्वामी। कुः पृथिवी ततो जातः कुजः। भौम इति शिवाद्यण्। लोहितवर्णान्यङ्गान्यस्य लोहिताङ्गः। मह्याः सुतो महीसुतः। पञ्च मङ्गलस्य॥ रौहिणेय इति॥ २४

लोहितोऽपि 'लोहितेनाधरेण' इति वासवदत्ता। 'लोहिते मरणं विद्यात्' इति ज्योतिषे, च.

'देवासुराणामाचार्यं शुक्रं कविसुतं ग्रह'मिति वाचस्पतिः, ज.

रौहिणेयो बुधः सौम्यः, समौ सौरिशनैश्चरौ।
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः॥ २५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रोहिण्या अपत्यम्। सोमः पितापि देवतास्येति सोमाड्ड्यण्। ज्ञश्चान्द्रमसायनिश्च। सुरस्यापत्यं सौरिः, सौरस्तु तस्येदमित्यणि। शनिमन्दौ पङ्गुकालौ छायापुत्रोऽसितश्च सः॥ तमस्कारित्वात्तमः, सान्तत्वात् क्लीबे। रहयति मुक्त्वा चन्द्रार्कौ राहुः। स्वर्भाति स्वर्भानुः, पूर्वपदात् संज्ञायां न णत्वम्। सिंहिकाया अपत्यं सैंहिकेयः। विधुं तुदति विधुन्तुदः, विध्वरुषोस्तुद इति खश्। अभ्रपिशाचो ग्रहकल्लोलश्च देश्याम्॥ केतुः शिखीति वाच्यम्॥ २५

रोहिण्या अपत्यं रौहिणेयः स्त्रीभ्यो ढक्। बुध्यते बुधः, इगुपधत्वात्कः। सोमः पितृत्वाद्देवताऽस्य सोमाड्ड्यण् सौम्यः, गर्गादित्वादपत्ये यञिति श्रीधरोऽमूलः गर्गादावस्यापाठात्। त्रीणि बुधस्य॥ समाविति। सूरस्य सूर्यस्यापत्यं सौरिर्दन्त्यादिः, सौरस्तु तस्येदमणीति स्वामी। पङ्गुत्वात् शनैश्चरति अचि शनैश्चरः। प्रतीकलक्षणया शनैरपि "शनैः शनैश्चरो मन्द" इति वाचस्पतिः। (छायासुतो नीलवासाः, ज) शनिसौरिशनैश्चरा इति रभसात् शनिरपि। द्वे शनेः॥ तमस्त्विति। ताम्यतीति तमु काङ्क्षायां सर्वधातुभ्योऽसुन् तमः सान्तं क्लीबे। तमस्कारित्वात्तम इति तु स्वामी। वदयति नानार्थे राहौ ध्वान्ते गुणे तम इति। तमांसि गुणतिमिरसैंहिकेया इति त्रिकाण्डशेषः। स्वर्भानुस्तु तमा (मो, ग) राहुरिति पुंस्काण्डे रत्नकोषामरमालयोः पुंलिङ्गोऽपि। रहयति सूर्याचन्द्रमसोः शौर्यं रहयति, गृहीत्वा त्यजति चन्द्रार्काविति वा राहुः, रह त्यागे, रहश्चेत्युण्। स्वराकाशे भाति स्वर्भानुरिति क्षुभ्नादित्वात् पूर्वपदादिति न णत्वम्। सिंहिकाया अपत्यं सैंहिकेयः। विधुं तुदतीति विध्वरुषोस्तुद इति खश् नुम्विधुन्तुदः। पञ्च राहोः॥ सप्तर्षय इति॥ २५

(शनि) ज्योतिषे अशनिश्चेति नृसिंहः।······'तमेन च तमः प्रोक्तम्' इति दर्शनाददन्तमपीति केचित् तदमूलम्, च।

'निशेशशनिशीनाश' इति कप्फणाभ्युदये द्व्यक्षरयमकात्शनिस्तालव्यः। चन्द्रवच्च शनैश्चरवच्च शीनाशः प्रसेनजिदित्यर्थः, ज.

'तमांसि गुणतिमिरसैंहिकेयाः स्युः' इति नाममाला, म. (इति त्रिकाण्डं, च).

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।
राशीनामुदयो लग्नं ते तु मेषवृषादयः॥ २६

सप्त ते ऋषयः, दिक्संख्ये संज्ञायामिति द्विगुः। मुखशब्दात् क्रत्वङ्गिरोवशिष्ठपुलस्त्यपुलहाः। चित्राः शिखण्डश्चूडाऽस्त्येषाम्। सप्तर्षिरित्येकत्वं रूढेः॥ मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके। तुलाथ वृश्चिको धन्वी मकरः कुम्भमीनकौ॥ २६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मरीच्यत्रिमुखाः सप्तर्षयः प्रत्येकं चित्रशिखण्डिन उच्यन्ते, 'सप्तर्षय इति दिक्संख्ये संज्ञायामिति समासः। मुखशब्द आद्यर्थे (प्राथम्ये, ग)। मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिन इति। चित्रो विचित्रः शिखण्डश्चूडाविशेषोऽस्त्येषामिति चित्रशिखण्डिनः। सप्तर्षीणामेकम्॥ राशीति॥ राति फलमिति राशिः, राशयो ह्यहोरात्रमध्ये द्वादशोदयन्ते। लगति साध्ये निजे लग्नं ओलजी ओलस्जी व्रीडे क्तः, श्वीदितो निष्ठायामितीण्निषेधः, ओदितश्चेति निष्ठानत्वं णत्वस्यासिद्धत्वात्, चोः कुरिति कुत्वम्। एकं राश्युदयस्य॥ राशय एव के इत्याहुः॥ ते त्विति॥ ते राशयो मेषवृषावादौ येषां ते तथा॥ सूरेति॥ २६

वशशब्दादिष्ठन् इति भारतानुसारी साङ्गः। वशेषु तिष्ठतीत्यन्ये। वसूनां श्रेष्ठ इति दन्त्यमध्य इत्यन्ये। अतएव दन्त्यमध्ये गदसिंहः 'वसिष्ठधूसरबिस—' च.

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः।
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः॥ २७

सुवति सूरः। सूयते सूर्यः, राजसूयसूर्येति साधुः। इयर्त्यर्यमा। अदितेरपत्यम्। द्वादश आत्मानो रूपाण्यस्य। दिवा दिनं करोति दिवाकरः, दिवा विभा प्रभेति टः। भास्कराहस्करो कस्कादित्वात्। ब्रधते (वर्धते ?) ब्रध्नः। भासः सन्त्यस्य भास्वान्। विवस्तेजोऽस्यास्तीति विवस्वान्, तसौ मत्वर्थ इति भसंज्ञायां पदकार्यं रुत्वं नास्ति। हरितो नीला अश्वा अस्य॥ २७

सूते प्रेरयति अन्धकारं सूरः, सू प्रेरणे सुसूधाञ्गृधिभ्यः क्रन् (२ २४.)। सूरो दन्त्यादिः, वारुणीवारुणीभूतसौरभा सौरभास्पदमिति दण्डियमकात्। शुसिचि- मीञां दीर्घश्चेति (२. २५.) क्रनि शूरस्तालव्यादिश्चेति तु कलिङ्गः। सूरति सूरः शूरश्चेति स्वाम्यपि तालव्यादिः। सुभटे शूरः सूर्ये च दन्त्योऽपीत्यूष्मविवेकश्च। कुमुदाकरा इत्रासोढशूरभास इति वासवदत्ताश्लेषादपि तालव्यत्वमायाति। सरति सुवति प्रेरयति कर्मणे लोकानिति तत्रोदिते लोकानां कर्मनिवृत्तेरिति वा सूर्यः राजसूयसूर्यमृषोद्येत्यादिना निपातितः। इयर्त्यर्यमा नान्तः श्वन्नुक्षन्पूषन्प्लीहन्निति (१. १६५.) निपातितः। अदितेरपत्यमादित्यः। द्वादशमूर्तित्वात् द्वादशात्मा। दिवा दिनं करोति दिवाकरः दिवाकरादिपञ्चसु दिवाविभेत्यादिना टः। भास्करान्तेत्य- स्मादेव (३. २. २१) निर्देशात्सत्वे भास्करः। अतः कृकमीत्यादिना सत्वे अहस्करः। भास्कराहस्करौ कस्कादित्वात् सत्वे इति तु भट्टस्वामी। तिमिरं बध्नातीति ब्रध्नः, बन्धेर्ब्रधिबुधी चेति नक्(३. ५.)ब्रध्नो रेफवान्, रुद्रभेदमूलयोस्तूकारवान्। भासः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्त्यस्य भास्वान् मतुप्, मादुपधायाश्चेत्यादिना वत्वम्। विवस्ते विविधप्रकारेणाच्छादयति, वस आच्छादने विपूर्वात् क्विपि विवो रश्मिस्तद्योगात् विवस्वान् पूर्ववन्मतुवादि। वौ वसिरतिक्रमे विवासोऽस्तीति पृषोदरादित्वाद्विवस्वान् रात्र्याद्यतिक्रमवानित्यर्थ इति तु कौमुदी। सप्ताश्वा अस्य सप्ताश्वः। हरितो नीला अश्वा अस्य हरिदश्वः। उष्णा रश्मयोऽस्य उष्णरश्मिः॥ २७

'नित्यमुदयवानपि शूरोऽप्येकचक्रवर्त्यपि तरणिरिवे'त्याश्चर्यमञ्जरी, च.

'अमङ्गलानां मङ्गल्यं कौशिकानामिवासताम्। तेजो दधाना शूरश्रीर्दृष्टिरोधाय कल्पते इति कप्फणाभ्युदये, ज.

विकर्तनार्कमार्त(र्ता)ण्डमि(म)हिरारुणपूषणः।
द्युमणिस्तरणिर्मित्र(त्त्र)श्चित्रभानुर्विरोचनः॥ २८

विकृन्तत्यात्मानं विकर्तनः, भ्रमेण तेजशातनात्। अर्कयति तपत्यर्कः, अर्च्यते वा। मृतण्डस्यापत्यं मार्तण्डः, मृताण्डमजायतेति मार्ताण्डो वा। मेहति मिहिरः, आदित्याज्जायते वृष्टिरिति स्मृतिः। अरुणोऽस्त्यस्यारुणः, वर्णेन वा। पूषति पर्वते पूषा इन्हन्पूषार्यम्णां शौ सौ च (६. ४. १२.) नियमाद्दीर्घाभावः। दिवि मणिरिव द्युमणिः। अतएवाम्बरमणिः गगनमाणिक्यादयोपि। तरन्त्यनेन तमस्तरणिः। मेद्यति मित्रः। विरोचते विरोचनः, अनुदात्तेतश्चेति युच्॥ २८

स्वदुहितुरिच्छायै विश्वकर्मणा कुन्दे धृत्वा विकर्तित इति विकर्तनः। कृती छेदने विपूर्वः, कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। दैवैरर्च्यचित इत्यर्कः घञ्। चजोरित्यादिना कुत्वम्। कृदाधारार्चिकलिभ्यः के(कनि, घ) (३. ४३.) अर्क इति तु कौमुदी। "अण्डे द्विधाकृते चार्त दृष्ट्वा पितरमब्रवीत्। आर्तस्त्वं भव माण्डेति मार्त (र्ता, म) ण्डस्तेन स स्मृत" इति। मृतण्ड (स्याण्ड, ङ) स्यापत्यं मार्त (र्ता, ङ)ण्ड इति तु स्वामी। वेदे तु मार्ता(र्त, ग)ण्ड इत्येव पाठात्। आर्तस्त्वं मा भवाण्डेति तं माता प्रत्युवाच हेति व्युत्पत्त्या मार्ताण्डो दीर्घमध्य इति श्रीनारायणसर्वज्ञचरणाः। "अथ मार्तण्डमार्ताण्डाविति" नामनिधाने गतानुगतिकत्वादित्याहुः। शब्दार्णवेऽपि मार्क(र्ता, ङ)ण्डोऽपि। मेहति सिञ्चति मेघरूपत्वात् मिहिरः। "आदित्याज्जायते वृष्टिरि"ति श्रुतेः। तथा च साम्बपुराणं—"मिहेति सेचने धातुर्मेहनान्मिहिरः स्मृत" इति॥ इषिरवन्मिहिरः। (उ. १. ५२.)। हड्डचन्द्रस्त्वत्र महिं पठित्वा महिर इति पठन् मिहेरपारायणीयतया मिहिरोऽसाधुरित्याह। वयं तु त्रिकाण्डशेषे महिरमिहिरपी(गा, घ. ङ)थाः कालकृत् पद्मपाणिरिति दर्शनात् क्षीरस्वाम्यादिभिर्मिहिर इत्येव व्युत्पादनाच्च महिर इत्यपीत्याचक्ष्महे। ऋच्छतीत्यरुणः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्तेश्चेत्युनन्। अरुणोऽस्त्यस्येत्यरुण इति स्वामी। वर्षेण लोकान् पुष्णाति पूषा, श्वन्-उक्षन्-पूषन्नित्यादिसूत्रे निपातितः। द्विवचनादौ इन्हनेति सौ चेति नियमाद्दीर्घाभावः। दिवो मणिरिव द्युमणिः, दिवि मणिरिति तु स्वामी। तरन्त्यनेन संसारं तरणिः तरतेरर्तीत्यादिना अनिः। मेद्यति ञिमिदा स्नेहने अमिचिमिदिशसिभ्यः क्त्रः (४. १६३.) द्वितकारः मित्त्रः। चित्रभानुः क्षुभ्नादित्वान्न णत्वं चित्रभानुविभावसू अग्निपर्याये व्युत्पादितौ। विशेषेण रोचते रुच दीप्तौ अनुदात्तेतश्चेति युच् विरोचनः॥ २८

यद् विश्वमम्बरमणेर्यदपां प्रसूतिरिति प्रयोगः, ज.

विभावसुर्ग्रहपतिस्त्विषाम्पतिरहर्पतिः।
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः॥ २९

विभा दीप्तिर्वसु धनमस्य विभावसुः। अह्नः पतिरहर्पतिः, अहरादीनां पत्यादिष्विति रेफः। भाति भानुः। हन्ति तमो हंसः। सूयते सविता। रूयते स्तूयते रविः। कर्मसाक्षी जगच्चक्षुरंशुमाली त्रयीतनुः। प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः॥ पद्मिनीकान्तो धामनिधिश्च शूरोंशुसत्तमः (?, सन्नुत्तमः, कख)॥ २९

त्विषां पतिरिति दिवस्पतिवदलुकीति कलिङ्गः। वाक्यमेव प्रचुरप्रयोगित्वान्नामवन्निबद्धमिति तु श्रीधरः। पत्युस्त्विषामिह महौषधयः कलत्रस्थानमिति माघः। गीर्पतिवदहर्पतिः। भातीति भानुः, दाभाभ्यां नुः। हन्ति तमो गच्छति वा हंसः वृद्वदिहनिकमीत्यादिना सः (३. ६२.)। तपतीति तपनः ल्युः, बहुलमन्यत्रापीति युजिति सर्वधरः। तापयतेस्तापनोऽपि। हेलिर्हंसः सहस्रांसुस्तापनो रविरिति संसारावर्तात्। सूते सविता, तृजन्तः। रूयते शब्दायते स्तूयते रविः, अच इः। सप्तत्रिंशत् सूर्यस्य॥ माठर इति॥ २९

'नृसविता सवितानमिवाकरोत्' इति रघुयमकात् दन्त्यौ सवौ, च.

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः।
सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः।
परिवेषस्तु परिधिरुपसूर्यकमण्डले॥ ३०

मठरस्यापत्यं माठरः। दण्डोऽस्यास्ति दण्डः। इन्द्रादयोऽष्ट नामान्तरेणार्कपरिचारकाः यत् सौरतन्त्रे—"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः। वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामनश्च सः॥ यमोऽपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया।" एवमन्ये पाकाद्याः (यांवाद्याः, ख) परितः पार्श्वे वर्तन्ते पारिपार्श्विकाः परिमुखञ्चेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चकाराट्ठक् ॥ सूतः सारथिः । ऋष्यन्धकेत्यण्, काश्यप इति सभ्यः पाठः, बाह्वादित्वाद्वा ॥ परितो व्याप्यतेऽनेन परिवेषः । परितो धीयते परिधिः । 'समीपे सूर्यस्य प्रतिकृतिरुपसूर्यकं सूर्यमण्डलञ्च ॥ ३०

सूर्यः कारुणिकः अतो देवानां यथेष्टवरमाददात्विति धिया अष्टादश चन्द्रादयो विघ्नदेवता नामान्तरेण स्थापिताः । तथा चागमः—"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः । वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः । यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञया । पूर्वद्वारे गुहहरौ क्रमात् कल्माषपक्षिणौ । राहुखरौ गजश्रोषौ क्रमेण परिकीर्तितौ", इत्यादि । अत्र प्राधान्यात् तु त्रय एवोक्ताः । परिपार्श्वं वर्तत इति परिमुखञ्चेति चकारात् ठक्, कौमुदीकारोप्याह पारिपार्श्विका इति बहुवचनादित्यादिबहुवचनान्ता गणस्य सूचका इत्यन्येऽपि ग्राह्याः । ते च "राहुः श्रोषः खरः पक्षी द्वारिकोजात्त(टान्ध, ङ)कारकः । पिङ्गो ग(ऽग्र, ग)जश्चपुरुषः प्राप्तः पात्रप्रतापकौ । आश्विनेयौ तथा दण्डी कुल्माषः पार्श्वगा रवे"रिति ॥ मठति वसति सूर्यसमीप इति मठ मद निवासयोः, अम्बरवदरन् बाहुलकाद्दीर्घः माठरः । मठरस्यापत्यं माठर इति तु स्वामी । पिङ्गलवर्णत्वात् पिङ्गलः । दण्डकारित्वाद्दण्डः, दण्डोऽस्यास्तीति दण्ड इति तु स्वामी । सूर्यपार्श्वस्थानां क्रमेणैकैकं त्रयाणाम् ॥ सूरेति ॥ सूरस्य सूतः सारथिः । अरुणवर्णत्वादरुणः । अविद्यमानावूरू अस्य अनूरुः । काश्यपिरिति बाह्वादित्वादिञ् । गरुडाग्रजो व्यक्त एव । पञ्च सूर्यसारथेः ॥ परिवेषेति । परितो विष्यते व्याप्यतेऽनेन परिवेषः घञ् अज् वा । तथा च—"पुंलिङ्गः परिवेषः स्यात् परिधौ परिवेषणे", इति मूर्धन्यान्ते रुद्रः । वेष्टने परिवेशः स्याद्भानोः परिधिमण्डल इति तालव्यान्ते रभसः । एवं च विशतिवेवेष्ट्योर्घञिति कौमुदी । परितो धीयते परिधिः, कर्तरि किरिति तु सर्वानन्दः । उपसूर्यकमण्डले द्वे नाम्नी, तथा च—"परिधिर्यज्ञियतरोः शाखायामुपसूर्यक" इति नानार्थे वक्ष्यते । "मण्डलं परिवेशश्च परिधिश्चोपसूर्यकमिति" त्रिकाण्डे भागुरिः । सूर्यमुपगतमुपसूर्यकं प्रादिसमासः स्वार्थे कन् । मण्डलं पूर्वमुक्तम् । "संमूर्छिता रवेरिन्दोश्च किरणाः । पवनेन मण्डलीभूतास्तन्वभ्रे व्योम्नि परिवेश" इति वराहः । चत्वारि चन्द्रसूर्ययोरुत्पातादिरश्मिमण्डलस्य ॥ किरण इति ३०

"वातैरेवाकुलीभूताः सूर्याचन्द्रमसोः कराः । मालाभा व्योम्नि तन्वभ्रे परिवेशाः प्रकीर्तिता" इति साहसाङ्कः, च, ज, य.

किरणोस्रमयूखांशुगभस्तिघृणिपृश्न (वृष्ण, घृष्ण, रश्म, ह)यः ।
भानुः करो मरीचिः स्त्री पुंसि वा (पुंसयोः, ङ) दीधितिः स्त्रियाम् ॥ ३१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्युः प्रभारुग्रुचित्विड्भाभाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ ३२

कीर्यते किरणः। वसन्त्यस्मिन् रसा उस्रः। मिनोति क्षिपति तमो मयूखः। अश्नुतेऽंशुः। गां बभस्ति दीपयति गभस्तिः पृषोदरादिः। जिघर्ति घृणिः। पिपर्ति स्पृशति वा क्ष्मां पृश्निः। भुवं वृष्ट्यै पर्षति सिञ्चति वृ(पृ ?)ष्णिरित्येके। कीर्यते करः। म्रियतेऽस्मिंस्तमो मरीचिः। दीधीते दीप्यते दीधितिः। प्रभादीनामादित्यरश्मित्वाभावात् पृथक् पाठः। द्युतिच्छव्योरिन्दुप्रस्तावोक्तेः पुनरिहोपादानं सामान्यार्थम्। दीप्त्यातपादयो ह्यसाधारणा अपि कविभिः साधारणीकृताः यथा मुखदीप्तिः चन्द्रातपः॥ रोचनं रुक्। भाभासो धातुभेदात्। शोचिर्नैर्मल्यार्थोऽत्र॥ ३१-३२॥

कीर्यतेऽसौ किरतेः कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युरिति क्युः (२. ८१.) किरणः। वसन्ति रसा अस्मिन् उस्रः, वसेः स्फायितञ्चीत्यादिना रक्संप्रसारणं न रपर इत्यादिना प्रतिषेधाद् बाहुलकाद् वा शासिवसीति न षत्वम्। मापयन् प्रमाणयन् गगनं ओखति गच्छति मयूखः, मा माने उखण(न)खेतिदण्डको गत्यर्थः अच् पृषोदरादिः। (वस्तुतस्तु मिमीते मयूखः, माङ ऊखो मय च, ५. २५ इत्यूखप्रत्ययः मयादेशश्च, ग) अम्यते अंशुः, अम गत्यादौ मृगय्वादयश्चेति कुः। शुक्शतालव्यः अथोद्वबन्धु(बबन्धु, म)श्च भयंकरे करे महौषधीरुष्णकरांशुभे शुभ इति जानकीहरणे यमकात्। गगने भसति (?) दीप्यते भस भर्त्सनदीप्त्योः, वसेस्तिरिति बाहुलकात् तिप्रत्ययः। पृषोदरादित्वाद्गगनभागलोपे गभस्तिः। जिघर्ति जलमिति घृ क्षरणदीप्त्योरित्यतो घृणिपृश्निपार्ष्णिचूर्णिभूर्णि इति (४. ५२.) निपातितः। धृष्णोति प्रगल्भते ञिधृषाधातोः वृषि(घृ, घ)धृषिभ्यां किदिति(४. ४९.)निः किच्च धृष्णिः। भानुः सूर्य एवोक्तः। कीर्यते करः, ऋदोरप्। म्रियते तमोऽस्मिन् म्रियन्ते क्षुद्रजन्तवोऽनेन वा मृङ् प्राणत्यागे मृकणिभ्यामीचिः मरीचिः (४. ७०.)। स्त्रीपुंसयोरिति सम्बन्धः। दीधीते दीप्यते दीधीङ् दीप्तिदेवनयोः क्तिन् दीधितिः, तितुत्रेष्वग्रहादीनामिति इण्निषेधाभावादिट्, यीवर्णयोर्दीधीवेव्योरिति ईकारलोपः। कौमुदीकारस्त्वाह गभस्तिः स्त्रियामपीति। जातावेक एव। यद्यपि दीधितिमेकामुक्त्वा रश्म्यभिधानं पुंस्येवेति वररुचिस्तथापि मरीचिः स्त्रीपुंसयोरितीह वामनादय आश्रिता इति स्त्रियामिति काकाक्षिगोलकन्यायेन दीधितिरित्यत्रान्वीयते। एकादश चन्द्रसूर्यरश्मेः॥ स्युरिति॥ प्रभादयः स्त्रियां स्युरिति सम्बन्धः। स्त्रियामित्यस्य पूर्वत्रैव सम्बन्धः रूपभेदादेव स्त्रीत्यन्ये। प्रकर्षेण भात्यनया प्रभा, आतश्चोपसर्ग इत्यङ्। रुक्त्विट्भासः सम्पदादिक्विबन्ताः। भास् सान्ता स्त्री सौधजालप्रविष्टैर्भाद्भि(ङ, भि, ग)र्भानोरिति तु वेणीसंहारे भावे क्त हेतौ तृतीयायां वैयधिकरण्येन योज्यम्। एवमन्यत्रापि योज्यम्। अन्यस्त्वतएव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुंस्त्वमेवेच्छति। रुचिः इगुपधत्वात् किन्। छविद्युती शोभापर्याये साधिते। दीप्तिरिति क्तिन्नाबादिभ्य इति वक्तव्यमिति क्तिन्। रोचिरिति अर्चिरुचिशुचिसृपिच्छादिभ्य इसिः। ओषधीशरुचिहारकत्वेन शुच्यते ओषधीभिरनेन पूर्ववदिसिः शोचिः। एकादश सामान्येन प्रभायाः॥ प्रकाश इति। प्रकाशद्योतौ घञन्तौ। आतपोऽजन्तः। त्रीणि रौद्रस्येति कोक्टः॥ अत्र कौमुद्यान्त्वयं विवेकः किरणाद्येकादशकं चन्द्रसूर्यरश्मौ प्रभाद्यकादशं सामान्येन दीप्तौ, प्रकाशादित्रिकमुद्भूतरूपानुद्भूतस्पर्शे। मणिकिरण इत्यादौ तु शब्दान्तरसन्निधिशक्तेः(सन्निवेशोक्त, ङ)सामान्यावगतिः। यद्यपि शब्दार्णवे दीधितिरा-लोकपर्यायस्तथापि दीधितिमेकामुक्त्वा रश्म्यभिधानन्तु पुंस्येवेति वररुचिवचना-न्मयूखेऽप्यस्ति सेहोपात्तेत्यदोषः। किरणादयः शोचिरन्ता रश्माविति तु सर्वानन्दादीनां प्रमादः। इहैव नानार्थे मयूखस्त्विट्करज्वालास्विति तन्त्रान्तरे च "अंशुः प्रभाकिरणयो-रि"त्युभयोपादानानर्थक्यापत्तेः। शब्दार्णवे च "द्वयोर्मरीचिः किरणो भानुरुस्रः करः पद" मित्यनन्तरं "प्रभा तु रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तय" इति तु शब्देन व्यवच्छेदाच्च। अतएवेह नानार्थे अभिष्वङ्गे स्पृहायाञ्च प्रभायां च रुचिः स्त्रियामित्यार्षं पाठं हित्वा गभस्तौ रुचिः स्त्रियामिति पाठान्तरं कलिङ्गादिजनितकुवासनैः कृतमुपेक्षणीयम्, उपमानाद्वा गमयितव्यम्। रुचिर्दीप्तौ च शोभायामभिष्वङ्गाभिलाषयोरिति पुराणाः। एवञ्चान्यत्राप्यधुनातनकोषे यत्र क्वचिद् यथाऽव्यवस्थापितव्युत्क्रमः सूक्ष्मेक्षिकाभवद्भ्रम-विजृम्भितत्वाद्धेय एव, अनाकरस्यानादेयत्वात्। यदाह साहसाङ्कः—"तस्मादाकरमादाय व्यवहर्तव्यमुत्तमैः। मार्गमुत्सृज्य चक्षुष्मान् को गच्छति दुरध्वने"ति। केचित् तु किरणाश्रिता प्रभेति पृथगुपादानमित्याहुः। प्रभादीनामादित्यरश्मित्वाभावात् पृथक् पाठः द्युतिच्छव्योरिन्दुप्रभायामित्युक्ते पुनरिहोपादानं सामान्यार्थं दीप्त्यादयोऽप्यसाधारणा अपि कविभिः साधारणीकृताः यथा मुखदीप्तिः चन्द्रातप इति स्वामी॥ कोष्णमिति॥ ३१-३२

भा दीप्तौ अन्येभ्योऽपीति क्विप् रामदासेन शुभंयाशब्दवदस्य रूपमुक्तम्। घञर्थे क इति व्युत्पत्तौ श्रद्धाशब्दवत्, एतएव वृन्दावने "अथ स वलक्षो भानां पतिरिव कर्ताऽखिल-क्षोभाणा" मिति। "भासो ना भासि गृध्रे च गोष्ठे च वनकुक्कुटे" इति रभसः। (प्रकाश) दन्त्योऽपीति केचित् धातुभेदात्, च.

जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टैर्भाभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धा इति वेणीसंहारे भाःशब्दः पुंलिङ्गोऽपि, म. (=च, ज).

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति।
तिग्मं तीक्ष्णं खरं तद्वत्, मृगतृष्णा मरीचिका॥
इति व्योमदिग्वर्गः, ख (गौं, क)॥ ३३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कवञ्चोष्ण (६. ३. १०७.) इति का-कव-कत्समुदायात् तद्रूप्यम्। एषां धर्ममात्रे क्लीबत्वं धर्मिवृत्तित्वेऽभिधेयलिङ्गत्वम्। तेजनात् तिग्मतीक्ष्णौ। खं राति खरति वा खरम्। तद्वदिति धर्मे क्लीबत्वं, धर्मिणि त्रिष्विति दिश्यते। अत्युष्णार्थञ्चैतत् यदाहुः "तिग्मं तीक्ष्णं कदुष्णं स्यात्।" अत्र तूपचारात् तीक्ष्णोऽसिः॥ मृगाणां तृष्णाऽस्यां मरीचिप्रतिकृतिः मरीचिका। ग्रीष्मे सिकतास्वर्ककराः प्रतिफलिताः जलत्वेनाभान्ति अतएव मरीचिकोच्यते॥ इति व्योमदिग्वर्गः, ख(गौं, क)॥ ३३॥

ईषदुष्णमित्यर्थे कोष्णं कदुष्णं इति कवं चोष्ण इति कोः का-कव-कदादेशाः। मन्दोष्णमिति कर्मधारयः। एते गुणे क्लीबलिङ्गाः, गुणवति द्रव्ये वर्तमानास्त्रिलिङ्गाः। चत्वारीषदुष्णस्य॥ तिग्ममिति॥ तेजयति तिग्मं तिज निशाने युजिरुचितिजां कुश्चेति (१. १४५.) मक् कवर्गश्चान्तादेशः। एवं तिजेर्दीर्घश्चेति क्स्नप्रत्ययः (३. १८.) दीर्घत्वं कुत्वञ्च तीक्ष्णम्। खमिन्द्रियं राति खरं रा ला दाने कः। खड खडि भेदे, पृषोदरादित्वात् डस्य रः, खरमित्यन्यः। तद्वदिति। यथा कोष्णादयो गुणे क्लीबलिङ्गाः तद्वति तु त्रिलिङ्गास्तथा तिग्मादयोऽपीत्यर्थः अन्यत्रोपचारात् तीक्ष्णोऽसिः। तीण्युष्णस्य॥ मृगेति॥ जलाभासत्वात् मृगाणां तृष्णास्त्यस्यां अर्शआद्यचि मृगतृष्णा। मरीचिरिव मरीचिका, इवे प्रतिकृतौ कन्। ग्रीष्मे मरुदेशे सिकतादावर्ककराः प्रतिफलिता दूरस्थानां जलत्वेनाभासन्ते तद्वाचि मृगतृष्णादिद्वयम्॥ इति दिग्वर्गविवरणम्॥ ३३

मृगतृषा च—"जगन्मृगतृषातुल्यमिति" कामन्दकीयप्रयोगात्, त.

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः।
प्रतिपद् द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः॥ १

कलयति कालयति वा सर्वं कालः। दिश्यते स्म दिष्टः। न ईहतेऽत्र अनेहा, असुन्, ऋदुशनस्पुरुदंशोऽनेहसाञ्चेति सावनङ्। समेति समयः। पक्षस्य मूलं प्रारम्भदिनं पक्षतिः। प्रतिपद्यते उपक्रम्यतेऽनया प्रतिपत्॥ सा प्रतिपत् आद्या यासां तन्यते तिथिः, स्त्रीपुंलिङ्गः॥ १

कल्यते कल संख्याने शब्दे च कर्मणि घञ् कालः, कालयति सर्वमिति ण्यन्तात् पचाद्यचि तु स्वामी। दिश्यते स्म दिश अतिसर्जने क्तः षत्वष्टुत्वे दिष्टः। नाहन्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नागच्छतीति नञ्याहन एह चत्यसुन्प्रत्ययः (४. २२३) आहनस्थाने एहादेशः, तस्मान्नुडचीति नुट्, ऋदुशन इत्यादिना सावनङ् अनेहा सान्तः अनेहसौ अनेहस इति। समेत्यनेनेति संपूर्वादिण अच् समयः। चत्वारि क्षणादिकालस्य॥ अथेति। पक्षस्य मूलं पक्षात् तिः पक्षतिः। ङीषि पक्षती च। प्रतिपद्यतेऽस्यां चन्द्रस्य क्षय उदयो वेति प्रतिपद् दान्ता सम्पदादित्वात् क्विप्, प्रतिपद्यते उपक्रम्यते मासादिरनयेति तु स्वामी। द्वे प्रतिपत्तिथेः॥ तदाद्या इति॥ अत सातत्यगमने ऋतन्यञ्जीत्यादिना (४. २)इथिन्, पृषोदरादित्वादकारलोपः। कल्पते तिथिस्तेनैवार्थेन इति तु सोमनन्दी। द्वयोरिति श्रुतत्वात्तिथिशब्द एव। एकं सामान्येन तिथेः॥ घस्र इत्यादि॥ १

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।
प्रत्यूषोऽहर्मुखं का(क)ल्यमुषःप्रत्युषसी अपि॥ २
प्रभातञ्च, दिनान्ते तु सायं (यः), सन्ध्या पितृप्रसूः।
प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यमथ शर्वरी॥ ३
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।
विभावरीतमस्विन्यौ रजनी यामिनी तमी॥ ४

घसति तमो घस्यतेऽस्मिन वा घस्रः। द्यति तमो दिनम्। न जहाति कालमहः, नञि जहातेरिति कनिन्। दीव्यति दिवसम्। वसन्त्यस्मिन् वासरम्॥ प्रत्यूषति निशां प्रतिरुजति, प्रतिगता उषा वा तदा प्रत्यूषः। काले साधु काल्यम्। शाश्वतः कल्यमप्याह "कल्यं प्रभातं सज्जञ्च कल्यो नीरोगदक्षयोः।" उ(ओ)-षत्यर्ककरैरुषः, कसुन्। एवं प्रत्युषः। भातुं प्रवृत्तं प्रभातम्, आदिकर्मणि क्तः। विभातं, व्युष्टञ्च। गोसर्गो देश्यः। प्रातः प्रगेऽव्ययम्॥ सायमव्ययम्। सायाह्ना-दिदर्शनात् श्याऽद्व्यधेति णान्तोपि, स्यति दिनं सायः, सायमोऽह्ने मलोपश्चेति भाष्यं त्वनिष्टनिवृत्त्यर्थम्॥ संध्यायन्त्यस्यां संधीयते अहोरात्रौ वा सन्ध्या। पितॄन् प्रसूते पितृप्रसूः, ब्रह्मणो ह्येषा पितृप्रसवित्री तनुः॥ प्रारम्भोऽपरं मध्यं वा अह्नः राजाहः-सखिभ्यष्टच्, अह्नोऽह्न एतेभ्यः (५. ४. ८८.)। तिस्रः सन्ध्याः समाहृताः त्रिसन्ध्यं, वाबन्त इति पक्षे स्त्रीत्वं नेष्टं यन्माला त्रिसन्ध्यं तु नपुंसकम्॥ शृणाति चेष्टाः शर्वरी। निश्यति तनूकरोति चेष्टाः निशा, आतश्चोपसर्गे इति कः। निशीथोऽस्त्यस्यां निशीथिनी महानिशाख्या। राति सुखं रात्रिः। आद्यन्तयोरर्धयोर्दिनव्यवहारात् त्रियामा। क्षणमवसरं ददाति क्षणदा विश्रान्तिप्रदेत्यर्थः। क्षप्यते क्षपा, भिदाद्यङ्। विभातीति विभावरी, वनो र चेति (४. १. ७.)ङीप् रश्च। रञ्जयति तमसा रजनी। यामाः सन्त्यस्यां यामिनी। ताम्यन्त्यस्यां तमी। हारा महादेवरता तमात इति तमापि। वासतेयी मालायाम्॥ २-४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसति अत्ति अन्धकारं घस्रः, घस्लृ अदने, स्फायितञ्चीत्यादिना रक्। दीङ् क्षये इणिसञ्जिदीङुष्यविभ्यो नक् (३. २.), बाहुलकात् नकि ह्रस्वः दिनम्। द्यति तमो निर्व्यापारस्थितिं वा द्यतेः किनन् दिनमिति स्मृतिः (स्वामी ?)। न जहाति कालं नञि जहातेरिति कनिन्, अहन्निति नकारस्य रुत्वम् अहः। दीव्यति दिवादिभ्यः किदित्यसच् किच्च दिवसः। वासयति वसेर्ण्यन्तात् अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चिदिति (उ. ३. १३२.) अरप्रत्ययः, वासरो दन्त्यमध्यः, (विबोधयामास समन्ततस्ततो,) रविर्मनाग्दर्शितवासरः सर इति जानकीहरणं, बद्धो वासरसङ्ग इति भट्टिभाषासमावेशश्च। क्वचिदुणादिवृत्तौ वाशीति वाशृ शब्द इति पठ्यते, अतो वाशर इति तालव्यमध्यमाहुस्तदनार्षम्। पञ्च वासरस्य॥ प्रत्यूष इति। प्रत्यूषति रुजति रात्रिं प्रत्यूषः, ऊष रुजायामित्यत इगुपधत्वात् के दीर्घमध्यः अदन्तः "प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषाय" इति माघात्। अह्नो मुखं प्रारम्भः अहर्मुखम्। कलयति चेष्टा अन्नादयश्चेति कलेर्यक्, कल्यम्। ओषत्यन्धकारमिति उष दाहे, उषः किदित्यसिः उषः। एवं प्रत्युषः, प्रतिरन्योपसर्गनिवृत्तये। उषःप्रत्युषसी सह्रस्वे सान्ते, "उषसि सयावकसव्यलक्ष्म (पाद) लेखे"ति भारविः, "अविगतरतशोभैः प्रत्युषःप्रोषितश्रीरि"ति माघः। भातं प्रवृत्तं प्रभातं आदिकर्मणि क्तः। प्रपूर्वाद्भातेर्बाहुलकात् तनिति तु सर्वधरः। षट् प्रभातस्य॥ दिनान्तेति। स्यति दिनं सायः श्याद्व्यधेत्यादिना णोऽदन्तः। कर्मणि घञि तु साय इति कौमुदी। मान्ताव्ययं त्वव्ययवर्गे वक्ष्यति, अतः सायमितीह प्रामादिकम्। एकं दिनान्तस्य॥ सन्ध्येति॥ सम्यक् ध्यायन्ति तस्यां, ध्यै चिन्तायां अधिकरणे आतश्चेत्यङ् सन्ध्या। पितॄन् प्रसूते सत्सूद्विषेति क्विप् "सन्ध्या पितृप्रसूः सन्धा" इति शब्दार्णवे निर्यकारोऽपि, "सन्धोच्छलित" इति वासवदत्तायमके। द्वे सन्ध्यामात्रस्य॥ प्राह्णेति। अहरवयवे अहःशब्दो ग्रामो दग्ध इत्यादिवत्। प्रथमञ्च तत् अहश्चेति प्राह्णः, राजाहःसखिभ्यष्टच्, अह्नोऽह्न इत्यह्नादेशः, रात्राह्नाहाः पुंसीति पुंस्त्वम्। अह्नोऽपरं अपराह्णः पूर्वापरेत्येकदेशिसमासः। अह्नोऽदन्तादिति द्वयोरपि णत्वम्। अह्नो मध्यं मध्याह्नः, संख्याविसायपूर्वस्येति ज्ञापकात् समासः, विशेषणसमासो वा। एतास्तिस्रः सन्ध्याः समाहृतास्त्रिसन्ध्यम्, आवन्तो वेति क्लीबत्वं, गोस्त्रियोरिति ह्रस्वत्वं, पक्षे त्रिसन्ध्या (न्वी, च-ज)। एकं दिनस्याद्यन्तमध्यानाम्॥ अथेति। शृणाति चेष्टाः, शॄ हिंसायां कॄगॄशॄवृञ्चतिभ्यः ष्वरच् (२. १२३) शर्वरी तालव्यादिः। पृषोदरादित्वाद्दीर्घादिरपि "शवरी शार्वरी शर्ये(म्ये, म)ति (—क्षयिणी क्षणदा क्षपा, च) शब्दार्णवः। निशानं निशा सर्वव्यापाराणां तनूकरणं निपूर्वात् शो तनूकरणे इत्यत आतश्चेति भावे अङ् तद्योगादर्शआद्यच्, निशा तालव्यान्ता। पृषोदरादित्वाद् हलन्ताऽपि गुणसन्धी च पुंसि निट् श्यामा तुङ्गी तमा तमीति नामनिधानम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निशीथोऽस्त्यस्यां निशीथिनी सतालव्या, शपथनिशीथकृशानुकिशोरा इति शभेदात् (ऊष्मविवेकात्, ङ)। राति सुखं रा दाने राशदिभ्यां त्रिः (त्रिप्, ४. ६७) कृदिकारादिति ङीषि रात्री रात्रिस्तमस्विनीति शब्दार्णवः। आद्यन्तयोरर्धयामयोश्चेष्टा-कालत्वेन दिनप्रायत्वाद्दिनवद्व्यवहाराच्च त्रियामा। क्षणमव्यापारसुखं ददाति क्षणदा, क्षणमवसरं ददातीति तु स्वामी। क्षपयति चेष्टाः क्षपा, अच्। वृञ् आच्छादने इत्यतः पचाद्यजन्तात् पिप्पल्यादयश्चेति चकारात् ङीष् वरी। प्रभेतिवत् विभा। विभाया वरी आच्छादिका विभावरी। नक्षत्रादिभिर्विशेषेण भातीत्यातो मनिन्क-निब्वनिपश्चेति क्वनिबन्ता वनो र चेति ङीप्, विभावरीति तु स्वामी। तमोयोगात् तमस्विनी अस्मायेत्यादिना विनि ङीप् (तमोऽस्त्यस्या इति मतुपि तमस्वती, घ)। रज्यन्ति रागिणोऽत्र रञ्जयति तमसा वा रजनी, कृदिकारादिति ङीष्। अतो रजनिरपि, क्षिपः किच्चेति (२. १०८.) चकारादनिः, कित्वान्नलोपः। कार्यानर्हत्वेन निन्दिता यामाः सन्त्यस्यां निन्दायामिनिः यामिनी। ताम्यन्त्यस्यां ताम्यतेरिन् तमिः, ङीषि तमी, पचाद्यचि टापा तमा इत्यपि। तथा च विदग्धमुखमण्डनं—'हारा महादेवरता तमात' इति। तमीत्यमूलं तमेत्येव पाठ इति तु जातोक्ता(दुक्ता, घ)दयः। तदयुक्तं, "स तमीं तमोभिरभिगम्य ततामि"ति माघदर्शनात् नामनिधाने द्वयोरुपादानात् पाठद्वयमेव न्याय्यमिति कौमुदी। वयन्तु क्षीरस्वामिसर्वधरादिभिस्तु तमीतीकारान्तः पाठ एव स्वीकृत इति तमीतीकारान्त एव मूलपाठ इत्याचक्ष्महे। द्वादश रात्रिमात्रस्य ॥ तमिस्रेति ॥ २-४

......दिवसमानसमानमिति कप्फणायमकात्।......वास्रोऽप्यत्र "वास्रो वासरो कृमिवत् क्रिमि" रिति द्विरूपात् (शब्दभेद, २७.)। 'उषसि जनसमक्ष लक्षितायाः सखीभीरिति, लङ्केश्वरः। उषशब्दोऽदन्तोऽपि 'प्राबोधिकः प्रतिसर उषप्रत्यूषसी उष' इति शब्दार्णवात्। यथा शब्दार्णवः 'दिनान्ते पुंसि सायः स्यात् सायाह्ने सायमव्यय' मिति। एकं दिनान्ते शेषे द्वे सन्ध्यायामिति रायः। सायाह्न इत्येके, विकाले इति साञ्जः। चतुष्कं एकपर्यायमिति सुभूतिः। तत्र (षष्ठ्यां बिल्वतरौ) बोधं सायं सन्ध्याछ कारये'दिति द्वयोरुपादानात्। 'सन्ध्या पितृप्रसूः सन्धा द्विजनेत्री प्रतिप्रसूरिति शब्दार्णवात्। सन्धिश्च 'सन्धिः प्रोक्ता तथा सन्ध्ये'ति द्विरूपात्।......तमा च, तथा च रभसः—'तमा घृताची स(रा, त)त्रिः स्याद् वाछरा यामिनी तमी'ति, च.

'वाशरो वासरोऽपि चे'ति द्विरूपकोषः। .....'चन्द्रेणेव सकलङ्केन ग्रहणेन शर्वरीति-हारिणे'ति वासवदत्ताश्लेषात् तालव्यः। पक्षे शर्वर्या ईतिहारिणेत्यर्थः, ज.

उषः स्त्रियां च, यथोत्तरचरिते 'जगद्वन्द्यां देवीमुषसमिव वन्दे भगवती'मिति। ......'सायमण्डनमभित्वरयन्त्य' इति भारविः। क्षिप प्रेरणे क्षिपेति सर्वस्वम्, त. (क्षपा इति मपुस्तके).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तमिस्रा तामसी रात्रिः, ज्यौत्स्नी चन्द्रिकयान्विता ।
आगामिवर्तमानाहर्यु(यु)क्तायां निशि पक्षिणी ॥ ५

तमोऽस्त्यस्यां तमिस्रा, ज्योत्स्नातमिस्रेति साधुः ॥ ज्यौत्स्नी तामसीत्यण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् । शाश्वतस्तु ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभेति, रात्रिः काकाक्षिवत् । पूर्वापराह्णयोः पक्षयोरिव मध्ये वर्तमानत्वात् वर्तमानहो यदीया निशा निशामध्येऽपि दिवसः पक्षिणीत्याहुः ॥ ५

तमोबहुला रात्रिस्तमिस्रा तमांस्यत्र सन्तीति ज्योत्स्नातमिस्रेत्यादिना निपातिता । तामसी ज्योत्स्नादित्वान्मत्वर्थीयोऽण् । द्वे नाम्नी तमोबहुलाया रात्रेः ॥ तमिस्रा तु दर्शरात्रिर्ज्यौत्स्नी स्यात् पूर्णिमानिशेति शब्दार्णवदर्शनात्तामसीरात्रिमात्रेऽपीति कौमुदी ॥ ज्यौत्स्नीति ॥ रात्रिरिति काकाक्षिगोलकन्यायेनेहाप्यन्वीयते । चन्द्रिकया ज्योत्स्नया युक्ता रात्रिर्ज्यौत्स्नी, पूर्ववदण् । एकं ज्योत्स्नायुक्ताया रात्रेः ॥ आगामीति ॥ पूर्वापरदिनयोः पक्षयोरिव मध्ये वर्तमानत्वात् पक्षावत्र स्तः पक्षिणी, अत इनिः । निशेत्युपलक्षणं, तेनागामिवर्तमाननिशायुक्ते दिनेऽपि पक्षिणी । अहर्युक्तायामिति सरेफपाठे आगामिवर्तमानाभ्यां अहोभ्यां युक्तं योगोऽस्या इति बहुव्रीहौ टजभावः, तद्विधौ तत्पुरुषनिवृत्तेः समासान्तविधेरनित्यत्वाद्वा । एकं दिनद्वयमध्यवर्तिन्या रात्रेः ॥ गणरात्रमिति ॥ ५

गणरात्रं निशा बह्वः प्रदोषो रजनीमुखम् ।
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ॥ ६

गणानां रात्रीणां समाहारः अहःसर्वैकदेशेति (५. ४. ८७.) संख्यात्वादच् समासान्तः, रात्राह्नाहाः पुंसीति असमाहारे हि पुंस्त्वम्, यन्माला "गणरात्रं नपुंसकम्" ॥ प्रारब्धा दोषा यस्मिन्, समावित्येव ॥ अर्धं रात्रेः अर्धरात्रः, अर्धं नपुंसकमिति तत्पुरुषः । नियतं शेरतेऽस्मिन् निशीथः । अतएव कात्यः "निशीथं सुप्तजनमाह ॥" याति यामः । प्रह्रियतेऽस्मिन् प्रहरः, पुंसि संज्ञायां घः ॥ ६

इह गणशब्द एकवचनान्तो बहुत्वसंख्यावचन इति बहुगणेत्यत्र (१. १. २३.) इन्दुमित्रो रात्रीणां गणो गणरात्रं, राजदन्तादित्वात् परनिपातः, बहुगणेति संख्यात्वेऽहः-सर्वैकदेशेत्यादिना अच् । क्लीबत्वमत्र प्रमादः, रात्राह्नाहाः पुंसीति पुंस्त्वप्राप्तेरित्येके । प्राप्तमपि पुंस्त्वं लोकाश्रयत्वान्न भवतीति सर्वानन्दः । तत् कुशकाशावलम्बादसारं भवति नपुंसकयोगः संख्यापूर्वस्य रात्रिशब्दस्येति वररुचिवचनाद् गणशब्दस्य च संख्यात्वात् क्लीबत्वस्य सम्भवात् तथा च नपुंसकेऽयमेव वक्ष्यति रात्रं प्राक्संख्ययान्वित-मिति कौमुदी । अन्येऽप्याहुः गणानां रात्रीणां समाहार इति । द्विगौ कृते समासा-वयवाः समासान्ता इत्यकारान्तोत्तरपदत्वाभावादकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(२. ४. १७ १.) इति स्त्रीत्वाभावे नपुंसकमिति क्लीबत्वं प्राप्तं बाधित्वाऽनेन पुंस्त्वे प्राप्ते पात्रादित्वात् क्लीबत्वमिति। एकम्॥ प्रदोष इति। दुष वैकृत्येऽच्टाप् प्रारम्भो दोषाया प्रदोषः प्रादिसमासः। प्रारम्भो दोषाया यत्रेत्येकविभक्तिश्चेत्युपसर्जनत्वे गोस्त्रियोरित्यादिना ह्रस्वत्वम्। ननु च दोषाशब्दोऽयमव्ययं तथाचाव्ययवर्गे वक्ष्यति "नक्तं दोषा च रजनाविति" तत् कथमस्त्रीप्रत्ययान्तत्वे ह्रस्वत्वम्। सत्यं टावन्तोऽपि दोषाशब्दोऽस्ति, तथा च भट्टिः—"ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते" इति। द्वे रजनीमुखस्य॥ अर्धेति। अर्धं रात्रेः अर्धरात्रम्। निशेरतेऽस्मिन् शेतेः निशीथगोपीथावस(ग ?)था इति (२ ६.)थकि निशीथ इति निपातितम्। सिंहावलोकितन्यायेन समावित्यनुवर्त्योन्वयः। द्वे रात्रिमध्यस्य॥ द्वाविति। यातीति यामः यातेर्मगिति मक्। यद्वा यच्छत्युपरमति रात्रिरहश्चानेनेति, यम उपरमे, घञ्। प्रपूर्वात् हरतेः प्रह्रियते ढक्कादिरस्मिन् प्रहरः, पुंसीति घः। द्वे प्रहरस्य॥ स पर्वेति॥ ६

प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते' इति स्मृतिः। अत्र घटिका षट्क्षणाः—'घटिका षट्क्षणाः प्रोक्ता मुहूर्तोऽपि च सा मते'ति वोपालितः, ज.

स पर्व सन्धिः (पर्वसन्धिः) प्रतिपत्पञ्चदश्योर्यदन्तरम्।
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा॥ ७

स सन्धिः पर्वेति सम्बन्धः, दुर्गोऽपि प्रतिपत्पञ्चदश्योस्तु सन्धिः पर्व प्रदिक् ककुप्। प्राच्यास्तु पर्वसन्ध्याख्यमाख्यन्। रूपभेदात् क्लीबे पक्षान्त इति यागकाल-संज्ञा॥ पूर्णो माश्चन्द्रः पूर्णमाः, तत्र भवा पौर्णमासी, पूर्णो मासो वर्तते वाऽस्यां पूर्णमासादण्। पूरणं पूर्णिः, ल्वादिभ्यः क्तिन्निष्ठावदिति नत्वं, पूर्णिं मिमीते पूर्णिमा, कः॥ ७

प्रतिपत्पञ्चदश्योर्मध्यं पर्वसन्धिः। पञ्चदशानां पूरणी तस्य पूरणे डडिति डटि पञ्चदशीति। द्वयोरपि पूर्णिमामावस्ययोर्ग्रहणमुक्तम्। तिथिसन्धिकालस्यैकम्॥ पक्षान्ताविति। द्वे पञ्चदश्यौ पूर्णिमामासावस्ये पक्षस्यान्तौ पक्षान्तौ। एकम्॥ पौर्णमासीति। मीयते तिथीनां क्षयो वृद्धिश्चानेन मातेरौणादिकोऽसिप्रत्ययः, माश्चन्द्रः सम्पूर्णो यस्यां सा पौर्णमासी तिथिः, साऽस्मिन् पौर्णमासीति निपातनादण्। अथवा पूर्णो माः पूर्णमास्तस्येयं तिथिः तत्र भव इत्यण्, पौर्णमासी। यद्वा पूर्णो मासो वर्ततेऽस्यां पूर्णमासादण् पौर्णमासी। पूर्णिमेति पूरी आप्यायने भावे क्तः भाववचना-न्तादिमन् वक्तव्य इतीमनि टाप्। पूरणं पूर्णिः ल्वादिभ्यः क्तिन्निष्ठावदिति क्तिनि नत्वे च पूर्णिं मिमीते पूर्णिमा आत इति क इति तु स्वामी। द्वे॥ कलेति॥ ७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पर्वणः सन्धिः पर्वसन्धिरिति श्रीधररायो 'सैंहिकेयो यदा राहुर्ग्रसते पर्वसन्धिषु' इति यमवचनं च। 'पित्र्या तु पूर्णिमा चान्द्री पूर्णि(र्ण, त)मासी च पूर्णमा। अनन्ता पौर्णमासी च चन्द्रमातानिरञ्जने'ति वाचस्पतिः, च.

पर्वेति च तथा च रत्नकोषः—'दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रस्तरयोरपि। पर्वशब्दोऽपि विषुवत्प्रभृतिष्वपि दृश्यते'। 'पूर्णमासी पूर्णमी (मा) च पौर्णमासी च पूर्णिमे'ति हड्डः, त.

कलाहीने साऽनुमतिः पूर्णे राका निशाकरे।
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसङ्गमः ॥ ८

सा पूर्णिया कलाहीने निशाकरे अनुमन्यतेऽनुमतिः ॥ पूर्णे सुखं राति राका। अमा सह वसतोऽस्यां चन्द्रार्कौ अमावस्यदन्यतरस्यामिति ण्यति पक्षे वृद्ध्यभावो निपात्यते। दृश्यते याज्ञिकैर्दर्शः, (न) दृश्यते चन्द्रोऽस्मिन् वा, विपरीतलक्षणया ॥ ८

सा पूर्णिमा उदयकाले प्रतिपद्योगात् कलाहीने चन्द्रेऽनुमन्यत इति क्तिनि अनुमतिः। एकम् ॥ पूर्ण इति। सेत्येव। पौर्णमासी पूर्णे चन्द्रे राका स्यात्, राति शुभमिति रा दाने कृदाधेति कः (३. ४०. वर्तिभ्यः, घङ)टाप् बाहुलकात्केऽण इति न ह्रस्वः। एकम् ॥ अमावस्येति ॥ "अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता। तत्र सोमो वसत्यस्याममावस्या ततः स्मृतेति ॥ यद्वा अमा सह वसतोऽस्यां चन्द्रार्काविति अमावस्यदन्यतरस्यामिति (३. १. १२२.)ण्यत्यमावास्या, पक्षे वृद्ध्यभावो निपातनादमावस्या। दर्शोऽमाऽमावसी चेति रभसः। अप्यमावस्यमावासी चामामस्य- प्यमामसीति शब्दार्णवे चानेकरूपता। दृश्यते याज्ञिकैर्दर्शः पुंसि घः, यद्वा न दृश्यते चन्द्रोऽत्र मङ्गलवदुदर्शे एव दर्शः। दृश्येते लक्ष्येते चन्द्रार्कावत्रेति दर्श इत्यन्यः। सूर्येन्दोः सङ्गमोऽत्रेति व्यधिकरणे बहुव्रीहिः ॥ चत्वारि दर्शस्य ॥ सेति ॥ ८

कठशाखायां श्रुतिः "या पूर्वा पूर्णिमा साऽनुमतिः योत्तरा सा राका।" वशिष्ठस्तु 'राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिः स्मृतेत्याह। मात्स्ये "यस्मात् तामनुमन्यन्ते पितरो दैवतैः सह। तस्मादनुमतिर्नाम प्रथमा पूर्णिमा स्मृता ॥" अत्यर्थं राजते यस्मात् पौर्णमास्यां निशाकरः। रञ्जनाच्चैव चन्द्रस्य राकेति चरमं विदुः (= त), च.

सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला (?) कुहूः।
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ ९

सिनी सिता वाला कलाऽस्याम्। (?) विस्मापिकेत्यर्थः, कुं हन्ति तमसा वा। उपरज्यते छाद्यतेऽनेनोपरागः। ग्रहणं ग्रहः, ग्रहवृद्द इत्यप् (३. ३. ५८.) ॥ ९

सा अमावास्या चतुर्दशीयोगात् दृष्टचन्द्रा सती सिनीवाली। सह एन विष्णुना वर्तते सा लक्ष्मीः तद्योगात् गौरादित्वादिनिः सिनी चन्द्रकला वाली

Funding by IKS-MoE

अल्पाऽत्र गौरादिपाठात् ङीष्। सिनी वलति धारयतीति वा कर्मण्यणि सिनीवाली स्त्रियाः पुंवदिति न पुंस्त्वं संज्ञापूरण्योश्चेति निषेधात्। सिनी सिता वाला कला अस्त्यस्यामिति तु स्वामी। एकम्॥ सेति॥ उदयेऽमावस्यायोगान्नष्टचन्द्रकलाऽमावास्या कुहूः। कुहयति विस्मापयति तमसा कुह विस्मापने चुरादिः, ततः कृषि च (घङ)मि-तनि-धनि-सर्जि-खर्जिभ्य उरिति (१. ८२.) बाहुलकात् कुहेरपीति धातुप्रदीपः। मृगय्वादित्वात् कुहुरपि, तथा च 'धेनुरज्जुकुहुसरयुतनुकरेणवः स्त्रिया'मिति विन्ध्यवासी उदन्तात् पुंस्त्वे प्राप्तेऽपवादमाह। एकम्॥ उपराग इति। रञ्जेरुपपूर्वाभावे घञ्, घञि च भावकरणयोरिति नलोपः वृद्धिरुपरागः। उपरज्यतेऽनेनेत्युपराग इति तु स्वामी। ग्रहणं ग्रहः, ग्रहवृदृ (३. ३. ५८.) इत्यप्। द्वे राहुणा चन्द्रार्कग्रासस्य॥ ६

'श्वेता श्येनी सिनी तथे'ति व्याडिः, च.

'कुह्वामेव च पारणामिति प्रयोगः', त। रुद्रदासेन वधूशब्दवदस्य रूपमुदाहृतम्, ज.

सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः।
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ॥ १०

इन्दू राहुग्रस्तः सोपप्लवः उपरक्तः। एवं पूषापि। अग्निकृत उपसर्गः उप आसन्नमाहितमस्योपाहितः, धूमकेत्वाख्य उत्पात इत्येके॥ एकयोक्त्या अपृथक्वचनेन रोदसीवत् न तु पुष्पवानिन्दुः सूर्यो वोच्यते, पुष्पं विकाशः प्रकाश इत्यर्थः॥ १०

सोपप्लवेति। सोपप्लवः वोपसर्जनस्येति सभावः। (६. ३. ८८)। उपरक्तः कर्तरि क्तः, द्वे प्रत्येकं राहुग्रस्तचन्द्रार्कयोः॥ अग्नीति। अग्नेरुत्पातो वैकृत्यं उप आसन्नमाहितमर्पितं फलमस्येत्युपाहितः। द्वे आकाशादिष्वग्नेर्वैकृत्यस्य॥ एकयेति। एकयोक्त्याऽपृथग्वचनेन रोदसीतिवत् चन्द्रार्कौ पुष्पवन्तावित्युच्यते। एकैकाभिधाने एकवचनान्तोऽपि पुष्पवानिति, मतुबन्तश्चायमिति। केचित्तु रविशशिनौ पुष्पवन्ताख्या-विति नाममालायां प्राक्प्रत्यग्धरणीधरशिखरस्थितपुष्पवन्ताभ्यामिति आश्चर्यमञ्जर्यां चादन्तत्वे द्विवचनान्तत्वदर्शनात् नित्यद्विवचनान्तश्चायं मिलितयोरेवाभिधायकत्वात् तथैव सर्वत्र दर्शनाच्च। दिवाकरनिशाकराविति देवताद्वन्द्वे चेति नानङ्, तत्रानङ्कृतो द्वन्द्व इत्यतो द्वन्द्वग्रहणेऽनुवर्तमाने पुनर्द्वन्द्वग्रहणेन वेदलोकसहचरितद्वन्द्वग्रहणादस्य तु द्वन्द्वस्यातथात्वात् अतएव रविचन्द्रावपि नोपलक्षिताविति घटकर्परः। एकम्॥ अष्टेति॥ १०

भारते तु 'उल्कादिभिः पुष्पवतो (रुपचारेण चाग्नितः, ज.)'इत्युक्तं, तेन तान्त-मित्यपि, च। पुष्पवद्भ्यां स सूचित इति रामायणे च। जातौ स्वकिरणसञ्चयपटावृतौ वियति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुष्पवन्तौ सन्तौ। बाणासनौ च घनरवपटावृतौ वियति पुष्पवन्तौ सन्तौ' इति हरिप्रबोधयमकात्। बाणासनौ वृक्षौ—शरद्वर्णना, ज.

अष्टादश निमेषास्तु काष्ठा त्रिंशत् तु ताः कला।
तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम्॥ ११

निमेषोऽक्षिस्पन्दकालः। काशते काष्ठा॥ ताः काष्ठास्त्रिंशत्, कलयति कालं कला॥ तास्त्रिंशत्, क्षणनात् क्षणः, क्षण(नु?)हिंसायाम्॥ ते क्षणा द्वादश मुहुरियर्ति मुहूर्तं द्विघटिकम्॥ ११

पुंसो यावत्कालमकृत्रिमनेत्रविकाशानन्तरं पद्माकुञ्चनं जायते स निमेषः। तेऽष्टादश काष्ठा, सा च दिक्पर्याये साधिता। समूहवाचित्वात् काष्ठत्येकवचनम्, एवमन्यत्रापि बोद्धव्यं। एकमष्टादशनिमेषावच्छिन्नकालस्य॥ ताः काष्ठाः त्रिंशत् कला, कल संख्याने, कलयति कला अच् टाप्। एकम्॥ ताः कलास्त्रिंशत् क्षणः, क्षणु हिंसायाम् अच्, एकम्॥ ते तु क्षणा द्वादश मुहूर्तः, हुर्छा कौटिल्ये बाहुलकादञ्चिघृषीति क्तः (३. ८६) मुडागमः राल्लोप इति डकारलोपो हलि चेति दीर्घः। एकम्॥ ११

विष्णुपुराणहरिवंशादौ तु निमेषः पञ्चदशभिः तद्वत् त्रिंशत्तु ताः कला इत्यादि। सूर्यसिद्धान्ते तु सूक्ष्मसूच्या पुष्पपत्रतुल्यैकदलभेदनकालस्त्रुटिः, त्रुटिशतं लवः, तत्त्रिंशता निमेषः, तत्सप्तविंशतिर्गुरुः, तच्चतुष्कं काष्ठा दश निमेषैरित्याह। एवं च निमेषपदं नानार्थम्, च.

ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च।
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ॥ १२

ते मुहूर्ता अह्ना सहिता रात्रिरहोरात्रः, अहःसर्वैकदेशेत्यच्, द्वन्द्वे त्वहोरात्राविमौ पुण्यौ॥ तेऽहोरात्राः पञ्चदश, पचति भूतानीति पक्षः, पक्ष परिग्रहे वा॥ शुक्लो मासस्य पूर्वपक्षः, कृष्णस्त्वपरः, यतश्चैत्रसिताद्या मासाः॥ तौ पक्षौ माश्चन्द्रस्तस्यायं मास इति निर्वचनेन चान्द्रेण मानेनायम्। सौरसावननाक्षत्रमानैस्त्वन्यथा, मस्यति मिमीते वा॥ १२

ते मुहूर्तास्त्रिंशदहोरात्रः, अह्ना सहिता रात्रिरितिसमासः द्वन्द्वो वा, गणरात्रवदच् अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसंख्यानमिति रुः, अहोरात्राविमौ पुण्याविति स्वामी। एवं समाहारे क्लीवमप्यहोरात्रम्। वामनलिङ्गानुशासने द्विगुरपि पात्राद्यदन्त इति नपुंसकत्वेन द्विरात्रमित्युदाहृतमिति सुभूतिः। एकम्॥ ते पञ्चदशाहोरात्राः पक्षः, पचति भूतानि पचेः वृतृवदिहनिकमिकषिभ्यः स इति (उ. ३. ६२.) बाहुलकात् सः। क्षपति अच् पृषोदरादित्वात् वर्णविपर्यये पक्ष इत्यन्यः। एकम्॥ पक्षाविति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुक्लपक्षः पूर्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः क्रमेणैकैकम्। तौ पक्षौ मासः चन्द्रस्यायं मास एतच्चान्द्रेण मानेन। सोरादिमानैस्तु मस्यते परिमीयतेऽनेनासौ वा मसी परिमाणे, हलश्चेति घञ्। पृषोदरादित्वाद्धलन्तोप्ययम्। "तौ द्वौ वर्षांशकः श्रामो (मासा, च) वर्षाङ्गं मा अहर्गण" इति नामनिधानात्। एकम्॥ १२

'त्रिंशन्मुहूर्तं कथितमहोरात्रं (च) यामया' इति। समाहारेऽपि पुंसीति जिनेन्द्रः। संख्यापूर्वोऽपि पुंसि एकरात्र इत्यादीति जयादित्यः। मासदिवसशब्दौ पुंक्लीबयोरिति चन्द्रगोमी, च.

मासः सौरसावननाक्षत्र चान्द्रात्मकः, त.

द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः॥ १३

इयर्ति ऋतुः, माघाद्युपक्रमस्ततोऽयनारम्भात्॥ यदाह तै ऋतुभिस्त्रिभिरयतेऽर्कोऽनेनायनम् उत्तरा दक्षिणा च यार्कस्य गतिः॥ ते द्वेऽयने मिलिते वत्सरो वर्षम्॥ १३

द्वौ द्वौ माघादिमासौ ऋतुः, इयर्ति अर्तेश्चेति तुः, चकारेण कित्वाद्गुणाभावः। माघफाल्गुनौ शिशिरर्तुः। एवं द्वाभ्यामपरे पञ्च॥ ननु च "षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमादिति वक्ष्यति, तत्कथं द्वौ द्वौ माघादिमासौ ऋतुरुच्यते। सत्यम्, एतदयनप्रदर्शनार्थमुक्तम्। मार्गादिमासावित्युच्यमाने हेमन्तशिशिरवसन्तैस्त्रिभिरयनमुक्तं स्यात्, न च तैरयनं किन्तु शिशिरवसन्तग्रीष्मैः प्रावृट्शरद्धेमन्तैश्चेत्यतः प्रकृतोपयुक्तमिदमुक्तम्। वास्तवन्तु वक्ष्यते मार्गादीनां युगैरिति, अनुवादश्चायं न विधिरित्यतो वक्ष्यमाणेन सह न पौनरुक्तम्। एकम्॥ तैस्त्रिभिः ऋतुभिरेकमयनम् अयतेऽर्कोऽनेन इणगतौ ल्युट्। एकम्॥ अयन इति। द्वे अयने, के तेऽर्कस्योत्तरा गतिर्दक्षिणा च, उत्तरा गतिर्माघादारभ्याषाढपर्यन्तमुत्तरायणं, दक्षिणा गतिः श्रावणादारभ्य पौषं यावत् दक्षिणायणम्। अयनद्वयस्यैकम्॥ समेति। १३

अत एव 'मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने' इत्यादीति नरसिंहादयः, चः

समरात्रिन्दिवे (ने,ङः) काले विषुवद् विषुवञ्च तत्।
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः (स्त्रयः, द)॥ १४*

---

* अत्रानन्तरं 'पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा। नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे, इति लपुस्तकादिषु दृश्यते। 'श्लोकोऽयं क्वचित् पुस्तके' इति छभूतिरिति रामनाथः, च.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समौ रात्रिन्दिवौ यत्र, अचतुरादिना साधुः। विषु साम्येऽव्ययं, तद्विद्यतेऽस्य विषुवत्। वो मत्वर्थे॥ लिङ्गात्। विष्वगित्युत्तरपदलोपश्चाकृतसन्धेरिति हि विषुवशब्दो युक्तः॥ मृगशीर्षेण युक्ता मार्गशीर्षी पौर्णमास्यस्मिन् साऽस्मिन् पौर्णमासीति संज्ञायामित्यण्। सहोऽस्त्यस्मिन् सहाः, मत्वर्थे मासतन्वोरिति यत्, तस्य लुगकारेकाररेफाश्चेति पक्षे लुक्, पुंस्त्वं लोकात्, सहश्च सहस्यश्च हैमन्तिकावृतू इति छान्दसम्। एवं तपा नभाः भोमवत्। मृगत्वान्मार्गः। आग्रहायणी पौर्णमास्यस्मिन् आग्रहायणिकः आग्रहायण्यश्वत्थात् ठक्॥ १४

रात्रिन्दिवं अचतुरेत्यादिना साधु। समं रात्रिन्दिवं यत्र विषु साम्येऽव्ययं तद्विद्यतेऽस्य मतुप्, संज्ञायामिति वत्वं विषुवत्, विषुवमिति वप्रकरणेऽन्यत्रापीति वः। विषुवान् समरात्रिवासरः काल इति तु पुंस्काण्डे वोपालितः। विषुवो(णो, ङ)ऽप्यत्रेति लो(पा, ङ)मादिसूत्रे रक्षितः। द्वे विषुवस्य॥ (पुष्ययुक्तेति॥ सुबोधः, घ) ॥ मार्गेति। मृगशिरसा युक्ता पौर्णमासी, नक्षत्रेण युक्तः काल इत्यण्, अचि शीर्ष इति शीर्षादेशः। मार्गशीर्षी पौर्णमासी अस्मिन्निति साऽस्मिन् पौर्णमासीति संज्ञायामित्यण्, मार्गशीर्षो मासः। एवं पौषादिरपि। मार्गपौषयोः प्राणिनां बलमुपचीयते इति वैद्यकम्। ततः सहो बलमुपचितमस्मिन्नस्तीति सहाः सहःशब्दान्मत्वर्थे मासतन्वोरिति यत्, तस्य लुगकारेकाररेफाश्च वक्तव्या इति वा लुक्, अलुक्पक्षे तु सहस्यः स पौषे रूढः। "तत्र मार्गे सहः सहा" इति शब्दार्णवाददन्तोऽपि सहशब्दः, तथा च "सहस्य प्रथमे मासि वाहयेद्दोषसञ्चयमि"ति चरकम्। मृगशिरा (र, ङ) एव मृगः—"तथा मृगशिरा(र, ङ) मृग इति रुद्रकोषात्। तद्युक्ता पौर्णमासी मार्गी, ततः पूर्ववदणादि, मार्गः। आग्रहायणीयोगादाग्रहायणिकः, आग्रहायण्यश्वत्थात् ठक्। ज्योत्स्नादित्वादणि आग्रहायणोऽपीति पुरुषोत्तमः। चत्वारि मार्गमासस्य॥ पौष इति॥ १४

विपु पातीति वेति पवर्गाद्युपान्त्य इत्यपि सर्वस्वं (मपुस्तके त्विदं न दृश्यते —इति रक्षितः, य) तेन त्रिरूपम्। विषुशब्दस्य द्वैरूप्यात् तालव्यमपीति केचित्, च.

विष्णुमित्रास्तु 'विष्वचो विषु चे'ति वक्तव्यात् 'विषु' इत्यादेशः।·· ···जलविषुव-महाविषुवयोः, त.

'न सहसा सहसा कृतवेपथु'रिति माघः। अदन्तोऽपि 'अथ मार्गः सहः सहा' इति वाचस्पतिः। प्रयुक्तं च चरके—'शरदूर्जसहौ पुन'रिति, ज.

पौषे तैपसहस्यौ (तैषः सहस्यश्च, ङ) द्वौ तपा माघेऽथ फाल्गुने।
स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः॥ १५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राग्वदन्वयं, तथा च नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे इति क्वचित् पाठोऽस्ति। सहोऽस्यास्तीति सहस्यः, मत्वर्थे मासतन्वोर्यत्। एवं नभस्यतपस्यौ॥ तपोऽस्यास्तीति तपाः। विभाषा फाल्गुनीश्रावणी (श्रवणा)कार्तिकीचैत्रीभ्यष्ठक् (४. २. २३)॥ मधुर्वसन्तोऽस्यास्ति मधुः, मधोर्ञ चेति ञस्य वा लुक्॥ १५

पौषतैषौ पूर्ववत्, पुष्यतिष्ययोर्नक्षत्राणि यलोपो वक्तव्य इति यलोप इति तु विशेषः। सहस्य इति तत्र साधुरिति यत्। त्रीणि पौषस्य॥ तपतेरसिस्तपः, पुण्यमासत्वात्तपोऽत्रास्ति तपाः सान्तः सहोवत्साधनम्। मार्गवन्माघः। द्वे माघस्य॥ अथेति॥ फलेगुँक् चेत्युनन् (३. ५६.) फल्गुन्यौ ह्रस्वादी फल्गुन्योः काले जात इति फल्गुन्यषाढाभ्यां टाणाविति टप्रत्यये (४. ३. ३४. २.) फल्गुनोऽर्जुनेऽपि ह्रस्वादिरिति रूपरत्नाकरः। फल्गुनस्त्वर्जुने मासे नक्षत्रे फल्गुनी स्मृतेति (दन्त्यान्ते, ज) गोवर्धनानन्दः। कातन्त्रोणादौ तु पिशुनफाल्गुनाविति वृद्धिं निपात्य फाल्गुनोऽर्जुन उक्तः। फाल्गुनस्त्वर्जुने मासि फाल्गुनी चास्य पूर्णिमेति धरणिश्च। फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी। विभाषा फाल्गुनीत्यादिना (४. २. २३) ठगणौ, फाल्गुनिकः फाल्गुनः। तपसि साधुस्तपस्यः। त्रीणि फाल्गुनस्य॥ स्यादिति। चैत्रिकः फाल्गुनिकवत्। मन्यते सवत्र कामदेवोऽत्र मन ज्ञाने फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चेति (उ १ १८.) उः धश्चान्तादेशः मधुः। यद्वा मधुर्वसन्तोऽत्रास्तीति मत्वर्थे मधोर्ञ चेति ञस्य वा लुकि मधुः। त्रीणि चैत्रस्य॥ वैशाख इति॥ १५

"तपा माघे तपश्चापि" इति द्विरूपकोषः। तेनादन्तोपि तथा "तपश्च तपस्यश्च शैशिरावृतू। किन्तु नेदं सर्वसम्मतमिति वादिनी, च.

वैशाखे माधवो राधो ज्येष्ठे शुक्रः(कः, ङ)शुचिस्त्वयम्।
आषाढे श्रावणे तु(णस्तु, ङ)स्यान्नभाः श्रावणिकश्च सः॥ १६

राधया युक्ता पौर्णमास्यस्मिन् राधः॥ शुग्विद्यतेऽस्य शुक्रः, लुगकारेकाररेफाश्चेति रेफः॥ शुग्विद्यतेऽस्य शुचिः इकारः॥ न भासनं मेघाच्छन्नत्वादस्त्यस्य नभाः॥ १६

पुष्पगतं मध्वत्रास्ति मधोर्ञ चेति ञः माधवः। राधया युक्ता पौर्णमासी राधी ततः पूर्ववदणि राधः। त्रीणि वैशाखस्य॥ ज्यैष्ठ इति। ज्यैष्ठ इत्यण्द्वयेन पूर्ववत्। संज्ञापूर्वकत्वाद् वृद्ध्यभावे ज्येष्ठोऽपि "ज्येष्ठो मासि च वृद्धे च ज्येष्ठा च गृहगोधिका" इति त्रिकाण्डशेषः, "प्रणाशो मित्रस्य प्रसभमजनि ज्येष्ठविरह" इति कुमारदासद्व्यर्थसिद्धश्च। शुक्शोचनमस्त्यत्र शुक्रशब्दात् लुगकारेकाररेफाश्च वक्तव्या

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति शुक्रः। द्वे ज्यैष्ठस्य॥ शुचिस्त्विति। अग्नौ शुचिरुक्तः। अषाढा नक्षत्रं, ततः पूर्ववदण्द्वयेन आषाढः। अयमिति शुचेः पुंस्त्वार्थम्। नक्षत्रे अषाढेत्यव्युत्पन्नं मूर्धन्यवद्ध्रस्वादीति श्रविष्ठादिसूत्रे रक्षितः। यद्रोहिणीयोगफलं तदेव सूतेऽषाढासहिते च चन्द्र इति वराहः। मासे तु पृषोदरादित्वाद्द्वैरूप्यं, "स्यादाषाढे त्वषाढक" इति शब्दार्णवः। आशा दिशो ढौकत इति आशाढस्तालव्यवानपि जातक(जातोर्, ग)-वचनममूलकम्। द्वे आषाढस्य॥ श्रावणेति॥ शृणोतेर्बहुलमन्यत्रापीति युच् श्रवणा पूर्ववदणि श्रावणो मध्यवकारवान् "स्त्रीपुंसयोर्ऋक्षभेदे श्रवणं श्रुतिकर्णयो"रिति रभसात्। नभसो मेघाः सन्त्यत्र नभाः सहोवत्। "धनुर्धरे त्रिषु नभः क्लीबं व्योम्नि पुमान् घने। घ्राणश्रावणवर्षासु विसतन्तौ पतद्ग्रहः" इति मेदिनिः। न भासनं मेघाच्छन्नत्वादस्य नभा इति तु स्वामी। श्रावणिक इति विभाषा फाल्गुनी-त्यादिना ठक्। त्रीणि श्रावणस्य॥ स्युरिति॥ १६

आषाढस्तालव्य इति केचिदिति वर्णदेशना। "तालव्यो मूर्धन्योऽप्युक्तो मासस्य वाचकः शास्त्रे। व्रतिदण्डे मलयगिरावाषाढो मध्यमूर्धन्य" इति गदसिंहः, च.

ज्येष्ठामूलीयं च "ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वज' मिति शब्दार्णवः, ज., त.

स्युर्नभस्यप्रोष्ठपदभाद्रभाद्रपदाः समाः (श्च ये, ङ)।
स्यादाश्विन इषोप्याश्वयुजोपि स्यात् तु कार्त्तिके॥ १७

वाहुलोर्जौ कार्त्तिकिके हेमन्तः शिशिरोऽस्त्रियाम्।
वसन्ते(न्तः, ङ) पुष्पसमयः सुरभिः ग्रीष्म ऊष्म (उष्ण, च)कः॥ १८

निदाघ उष्णोपगम उष्ण उष्मागमस्तपः।
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम्॥ १९

भीमवद्भद्रयुक्ता भाद्री पौर्णमास्यस्मिन् भाद्रः॥ इष्यते इडन्नं विद्यतेऽस्य इषः अकारः॥ वहुलाभियुक्ता वाहुली पौर्णमास्यस्मिन् बाहुलः। ऊर्क् अन्नं बलं वाऽस्यास्ति ऊर्जः॥ हिमोऽन्तोऽस्य हेमन्तः, पृषोदरादिः। शिनोत्यर्थं शीतेन, शिञ् निशाने। वसन्त्यस्मिन् सुखं वस्ते भुवं वा, झच्। सुष्ठु रमते सुरभति वा सुरभिः। फल्गुर्देश्याम्॥ गिरन्त्यम्बु ग्रीष्मः। ऊष्मप्रतिकृतिरूष्मकः॥ निदह्यतेऽस्मिन् निदाघः, घञ् न्यङ्क्वादित्वात् कुत्वम्। उषत्युष्णः। तपति तपः, अच्, यल्लक्ष्यं—"तपेन वर्षाः शरदा हिमागमः।" प्रवर्षति प्रावृट्, नहि-वृति-वृषीति दीर्घः। भूम्नि बहुत्वे वर्षमस्त्यस्यां वर्षन्ति वा वर्षाः। शीर्यन्तेऽस्यां पाकेनौषधयः शरत्॥ १७-१९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तपस्यवत् नभस्यः। प्रोष्ठपदी पौर्णमासी ततः पूर्ववदण्। भीमभामेतिवत् एकदेशेन व्यवहारात् भाद्रया युक्ता भाद्री, ततः पूर्ववदणि भाद्रः। एवं भाद्रपदः। चत्वारि भाद्रपदस्य॥ स्यादिति। आश्विनः पूर्ववत्। इषि गतौ एषणं इट् यात्रा सात्र मासे जिगीषूणामस्ति अचि इषः समूर्धन्यः, ध्वनिमिषे निमिषेत्तणमग्रत इति माघयमकात्। अश्वयुगश्विनो। अत्राश्वयुजी पौर्णमासी। ततो मासे पूर्ववदण आश्वयुजः। पृषोदरादित्वाद्धस्वोऽपि। "आश्विनोऽश्वयुजश्चैष" इत्यमरमाला। त्रीण्याश्विनस्य॥ स्यादिति। कार्त्तिकः पूर्ववत्। बहुलाः कृत्तिकाः। पूर्ववदणि बाहुलः। ऊर्जमुत्साहमाहुरिति नाममाला। तदत्र मासे जिगीषतामस्ति अचि ऊर्जः। कार्त्तिकिकः श्रावणिकवत् ठक्। चत्वारि कार्त्तिकस्य॥ हेमन्त इति॥ हन्ति दुःखं हेमन्तः हन्तेर्मुट् हि चेति झच् हिरादेशो मुडागमश्च। हेमाऽपि यद्भाष्यं हेमन्तस्य तलोपवचनमनर्थकंहेम्नः प्रकृत्यन्तरस्य सत्त्वादिति। मार्गपौषाभ्यां हिमऋतुस्तस्यकम्॥ शिशिरो द्वितालव्यः प्रागुक्तः। एकं माघफाल्गुनाभ्यामृतोः॥ वसन्त इति। वसति कामोऽत्र वसन्तः तॄ(भू ?) वह्रीत्यादिना झच्(३. १२८.)। सुष्ठु रभन्ते रभसयुक्ता भवन्ति इति सुरभिः सुपूर्वाद्रभेः सर्वधातुभ्य इतीन्। त्रयं चैत्रवैशाखाभ्यामृतोर्वसन्तस्य॥ गिरति पीडयति प्राणिनः घर्मसीमग्रीष्मा इति औणादिकनिपातसूत्रेण गिरतेर्मक्प्रत्यये ग्रीआदेशः सुडागमश्च निपात्यते ग्रीष्मः। ऊष्मैवोष्मकः, उष दाहे बाहुलकान्मनिन् दीर्घश्च, युवादिपाठात् कन्। मकि अदन्तोऽपि—ऊष्मो घर्मेश्रुणि तथा जैष्ठे (ग्रीष्मे, ङ) तूष्मा स्त्रियां त्विषीति तार (वो, ङ) पालात्। नितान्तं दह्यतेऽत्र निपूर्वाद्दहेः हलश्चेति घञ् न्यङ्क्वादित्वात् कुत्वं निदाघः। उष्णानामुपगमोऽत्रेत्युष्णोपगमः। उषति उपदाहे इण्सिञ्जिदीङुष्यविभ्यो नक्(उ ३. २.) उष्णः। ऊष रुजायां मनिन् उष्मा तापनिदाघयोरिति नान्ते वोपालः (लितः, च)। ऊष्मागम इत्यन्योपसर्गनिवृत्त्यर्थम्। तपति तपः अचि अदन्तः "तपेन वर्षाः शरदा हिमागम" इति माघः। सप्त ग्रीष्मर्तोः, स च ज्यैष्ठाषाढाभ्याम्॥ स्त्रियामिति। प्रकृष्टं वर्षमत्र प्रावृट् षान्ता, पृषुवृषुमृषु सेचने, सम्पदादित्वात् क्विप्, नहिवृतीत्यादिना दीर्घः। वर्षणं वर्षं तदतिशयि अत्रास्ति, अचि टाप्, वर्षन्तीत्यत्र मेघा वा अच् टाप् वर्षाः भूम्नीति बहुत्वे। द्वयं वर्षाख्यर्तोः, स च श्रावणभाद्राभ्याम्॥ अथेत्यादि। शीर्यन्तेऽस्यां पाकेनौषधयः शृणाति हिनस्ति तापेन वा शृदृभसोऽदिः (१. १२८) शरदान्ता भागुरीयटापि शरदाऽपि। तथा च "शरद्भवेच्छरदया प्रावृट् प्रावृषया सहेति" विश्वः। एकमाश्विनकार्त्तिकाभ्यामृतोः॥ षडिति। १७-१९

ह्रस्वादिरपि उष्मशब्द इत्येके।......'तपःकृशा, इति भागवतात् (तपः) सान्तोऽपीति केचित्, च.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अश्वयुजोपि 'कर्त्तिकेऽश्वयुजे पौषे आषाढे श्रावणे बुधः। दृष्टो लोकभयाय स्यान्माधवशाखयोरपोति विष्णुधर्मोत्तरम् (=य)। आश्विनोऽश्वयुजश्चैष इति हड्डुः (इत्यमरमाला, थ)।......हेमन्तप्रसवो लोध्रः शैल्य (शेष, च) स्तु शिशिरोऽस्त्रियामिति रभसे (रत्नं, च) पर्यायान्तरम् , ज.

हेमनश्च तथाऽऽधुनिकककवेः रत्नगर्भसार्वभौमस्य "हैमनीषु रजनीषु शेरते यैरपूजि सुरजित्पदाम्बुजम् ।" य.

षडमी ऋतवः पुंसि मार्गादीनां युगः क्रमात् ।
संवत्सरो वत्सरोऽब्दः हायनोऽस्त्री(नः स्त्री)शरत् समाः ॥ २०

यत्कात्यः "आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः।" हेमन्ताद्धि वत्सरस्यारम्भः। ऋतुः पुंलिङ्गः॥ संवसन्ति ऋतवोऽत्र संवत्सरः। ऋतुपरिवर्तात्मा ह्यसौ, यद्वागुरिः—'सर्वर्तुपरिवर्तस्तु स्मृतः संवत्सरो बुधैः।' परिवत्सरोऽपि। इदावत्सर इद्वत्सर अनुवत्सरश्च ज्योतिषे। आप्यते अब्दः। जहाति ऋतून् हायनः, हश्च व्रीहिकालयोरिति ल्युट्। समन्ति समाः, सह मान्ति वर्तन्ते ऋतवो यासां वा स्त्री बहुत्वेऽयं यथा जीव्यात् सहस्रं समाः। समां समां विजायत (५ २. १२.) इत्येकत्वेऽपि दृश्यते ॥ २०

अमी हेमन्तादयो षट् मार्गादीनां मासानां द्वयेन द्वयेन ऋतवः पुंसि भवन्ति ऋ गतौ केत्वादय इति तुन् (उ, १. ७२)। हेमन्तादीनां षण्णामेव प्रत्येकमेकम् ॥ संवत्सर इति। संवसन्त्यृतवोऽत्र संपूर्वाद्वसेश्चेति सरन् (३ ७२.), सस्यार्धधातुक इति सस्य तकारः, वा पदान्तस्येति पक्षे सानुनासिको वकारः, पक्षेऽनुस्वारः सवँत्सरः संवत्सरः, अनुस्वारपक्षेऽपि वकारस्य दन्तौष्ठ्यत्वान्न मत्वम्। एवं वत्सरसंवत्सरानुवत्सरपरिवत्सरा इति शब्दार्णवः। आप्यतेऽसौ आप्लृ व्याप्तौ अब्दादयश्चेति (४. ६८.)दन्, ह्रस्वत्वञ्चाब्दः। जहात्यम्बूनि जिहीते वा हश्च व्रीहिकालयोरिति ल्युट्। हायनः अस्त्रीति सम्बन्धः। हायनः स्त्रीतिपाठे स्त्री शरदित्यन्वयः। प्रज्ञादित्वाच्छारदोऽपि (समा योषिति) शारद इति रत्नकोषः। समतीति सम ष्टम वैक्लव्ये दन्त्यादिः पचाद्यच् टाप् समा, समन्ति सह मान्ति वर्तन्ते ऋतवोऽस्यां वा समा इति तु स्वामी। समा नित्यबहुवचनान्ता इत्येके समाः। तथा च वामनः—'समासिकतावर्षाऽप्सुमनोजलौकस' इति। समां समां विजायत इति निर्देशात् समायां समायामिति वृत्तिदर्शनाच्चैकत्वमपि दृश्यते, अतएवायं कुशलो भूम्नीति न निश्चितवान् बहुवचनेन तु बहुवचनान्तं सूचयति स्म। षट् वत्सरस्य॥ मासेनेति। २१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वरिषशब्दोऽप्यत्र द्विरूपकोषात् 'वरिषशतमपि (न)धन्यमानं व्रजति न काञ्चनतामयः कदाऽपी'ति नारसिंहे, च.

मासेन स्यादहोरात्रः पैत्रो (?) वर्षेण दैवतः।
(२) दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्॥ २१

मासेन पौरुषेणेति शेषः। पितॄणामयं पैत्रः, देवतार्थे पित्र्यः स्यात्, तत्र कृष्णः पक्षोऽहः शुक्लो रात्रिः॥ (१) पौरुषेणेति शेषः तत्रोत्तरायणमहः दक्षिणायनं रात्रिः। (२) अहोरात्र इत्येव। दैवैर्हि सषाष्टैस्त्रिभिरहोरात्रिशतैर्दिव्यं वर्षं, तैर्द्वादशभिः सहस्रैर्लौकिकं चतुर्युगं, तच्च देवानामेकयुगं तत्सहस्रं ब्रह्मणो दिनं भूतानां स्थितिकालः, तावत्येव रात्रिर्भूतानां प्रलयकालः॥ चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्। तस्य तावच्छतो सन्ध्या सन्ध्यांशश्च तथाविधः॥ इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्तन्ते सहस्राणि शतानि च॥ यदेतत् परिसंख्यातमादावेव चतुर्युगम्। एतद्द्वादशसाहस्रं देवानां युगमुच्यते॥ ये द्वे दैवे युगसहस्रे तौ नृणां कल्पौ। सर्वनाम्नां विधीयमानानूद्यमानलिङ्गग्रहणे कामचारः। एकः स्थितिं कल्पयति द्वितीयः क्षयं कल्पयति॥ २१

मानुषेणेति शेषः। मानुषेण मासेन पितॄणां कव्यवालादीनामहोरात्रः। मानुषेण वर्षेण देवानामहोरात्रः। पैत्रदैवतयोस्तस्येदमित्यण्। अत्र पितॄणां कृष्णपक्षो दिनं शुक्लपक्षो रात्रिः। देवानामुत्तरायणं दिनं दक्षिणायनं रात्रिः। देवानां युगसहस्रद्वयेना ब्रह्मणोऽहोरात्रः ब्राह्म इति पूर्ववदण्। ब्रह्मो जाताविति टिलोपः। मानुषेण चतुर्युगेन देवानामेकं युगम्। लैङ्गे युगमानं यथा—"पूर्वं कृतयुगं नाम ततस्त्रेताभिधीयते। द्वापरश्च कलिश्चैव युगान्येतानि सुव्रताः (युगा एते हि विश्रुताः, ङ)॥ सहस्राणां शतान्यासंश्चतुर्दश च संख्यया। चत्वारिंशत् (चत्वारिशत, ङ) सहस्राणि तथान्यानि कृतं युगम्॥ तथा दशसहस्राणि वर्षाणां शतसंख्यया। अशीतिश्च सहस्राणि कालस्त्रेतायुगस्य च॥ सप्तैव नियुतान्याहुर्वर्षाणां मानुषाणि च। विंशतिश्च सहस्राणि वर्षाणां शतसंख्यया। षष्टिश्चैव सहस्राणि कालः कलियुगस्य तु। एवञ्चतुर्युगः कालः ऋतु(ते, ङ)-सन्ध्यांशकात् स्मृतः।" ज्योतिषे तु "वस्वश्विमैत्रा ऋतुरन्ध्रमासा वेदा रसाष्टौ भुजवह्निवेदाः। एतानि शून्यत्रयभाजितानि युगाब्दसंख्या परिकीर्तितानि। एतच्च मानुषमानेन सत्यादीनां मानम्। तदङ्केनापि यथा सत्यस्य १७२८०००, त्रेतायाः १२९६०००, द्वापरस्य ८६४०००, कलेः ४३२०००। इदानीञ्च शकाब्दाः १३५३। द्वात्रिंशदधिकपञ्चशतोत्तरचतुःसहस्रवर्षाणि कलिसन्ध्याया(ङ्क्या, ङ) भूतानि ४५३२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा च गणितचूडामणौ महिन्तापनीयराजपण्डितश्रीनिवासः कलिसन्ध्या(ङ्घा, ङ)याः खसमयकरकृतवर्षाणि भूतानि ४२६०। तच्च ब्रह्मणो दिनं नृणां द्वौ कल्पौ अत्रापि स्थितिकालो भूतानां ब्रह्मणो दिनं प्रलयकालश्च भूतानां ब्रह्मणो रात्रिः। तथा च लैङ्गे—"चतुर्युग(र्दश, ग)सहस्रो वै कल्पश्चैको द्विजोत्तमाः। निशान्ते सृजते लोकान् नश्यन्ति निशि जन्तवः॥ कोटीनां द्वे सहस्रे तु अष्टौ कोटिशतानि च। द्विषष्टिश्च तथा कोठ्यो नियुतानि च सप्ततिः॥ कल्पस्य संख्या कथिता कल्पशेषन्तु कल्पयेत्। कल्पानां वै सहस्रन्तु वर्षमेकमजस्य तु। कल्पानामष्टसाहस्रं ब्राह्मणैर्ब्रह्मणो युगमिति॥ मन्वन्तरमिति। २१

(३१७६) नवसप्तत्यधिकशतैकाधिकत्रिसहस्राधिककलिसन्ध्यावर्षे गते शकप्रवृत्तिः। प्रकृतशकश्च पञ्चपञ्चाशदधिकपञ्चदशशती १५५५। ४७३४ अस्मिन् कल्यब्दे एतत् शास्त्रं कृतं श्रीरामनाथविद्यावाचस्पतिभट्टाचार्येण, च.

इदानीं च शकाब्दाः १३५३, य. (रायमुकुटस्यैवायं समयः)।

इदानीं च एकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन शकाब्दकालेन १०८१ षष्टिवर्षाधिकद्वाचत्वारिंशच्छतानि कलिसन्ध्याया भूतानि ४२६०। तथा च गणितचूडामणौ श्रीनिवासः— कलिसन्ध्याया खसमयकरकृतवर्षाणि ४२६०, म. (श्रीनिवासस्यैवायं समयः)।

मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः।
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि॥ २२

मनूनां स्वायम्भुववैवस्वतचाक्षुषादीनां प्रजापतीनां अन्तरमवकाशोऽवधिर्वा। तैर्हि चतुर्दशभिर्ब्रह्मणो दिनम्॥ संवर्तते प्रलीयते कल्पते क्षीयतेऽस्मिन् वा जगत्॥ कल्पस्यान्तोऽवधिः कल्पान्तः। एकः कल्पोऽत्र क्षयार्थोऽन्यो ब्रह्मदिनार्थः। यच्छाश्वतः कल्पः शास्त्रविधौ न्याये संवर्ते ब्रह्मनो दिने। संहारो युगात्ययः परिवर्तश्च॥ २२

दिव्यानां युगानामेकसप्ततिर्मन्वन्तरम्। मनोरन्तरमवकाशोऽवधिर्वाऽस्मिन्निति मन्वन्तरं, सुप् सुपेति समासः। तदुक्तं लिङ्गपुराणे—"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः। कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते॥ मन्वन्तरस्य संख्या च वर्षाग्रेणेह कीर्तिता। त्रिंशत् कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः। सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु। विंशतिश्च सहस्राणि कालो यः साधिकं विना। मन्वन्तरस्य संख्यैषा लिङ्गेऽस्मिन् कथिता द्विजाः॥" मनवो ब्रह्मणः सुताश्चतुर्दशैव। तथा च विष्णुपुराणे—"स्वायम्भुवो मनुः स्वारोचिषस्तथा। औत्तमिस्तामसिश्चैव रैवतश्चाक्षुषस्तथा। षडेते मनवोऽतीताः साम्प्रतन्तु (सप्तमस्तु, ङ) रवेः सुतः। वैवस्वतोऽयं यस्यैतत् सप्तमो वर्तते युगमिति॥" एकसप्ततिरिति यद्यपि गणनया सार्धयुगेनाधिका

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा यथाहुर्नामनिधाने सर्वज्ञश्रीनारायणचरणाः—"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्। मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश। तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरि"ति तथाप्यल्पत्वात्तदिह नोक्तम्। अपरे तु सप्त मनवः—"सावर्णिर्दक्ष(क्षि, ङ)सावर्णो ब्रह्मसावर्ण इत्यपि। धर्मसावर्णश्च रौद्रसावर्णो रौच्यभौत्यवत्॥" एते चतुर्दश मनवः। एकं मन्वन्तरस्य॥ संवर्त इति। संवर्तते उपरमते जगदत्रेति संवर्तः, हलश्चेति घञ्। वृतिरत्रावसानार्थः, यथा लोकोऽयमिति वृत्त उपरत इत्यर्थः। प्रलीयतेऽत्रेति लीङ् श्लेषणेऽच् प्रलयः। कल्पन्ते विरुद्धलक्षणया क्षीयन्तेऽत्र पुंसि संज्ञायामिति घः, कृपे रो ल इति लत्वं कल्पः। एवं क्षीयतेऽत्र पूर्ववद् घः क्षयः। कल्पस्य ब्रह्मदिनस्यान्तोऽवधिः। एकः कल्पोऽत्र क्षयार्थोऽन्यस्तु ब्रह्मदिनार्थः। "कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिन" इति शाश्वतः। पञ्च प्रलयस्य॥ अस्त्रीति। २२

अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विषकल्मषम्।
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम्॥ २३

क्षयहेतुं पापमाह। पच्यते पङ्कः। पात्यस्मात् पाप्मा पापञ्च। केलयति किल्विषम्। कलयति कल्मषं कलुषञ्च। वर्ज्यते वृजिनम्। एत्येनः। न जहात्यघम्। अंहत्यंहः। दुरेति दुरितम्। दुष्क्रियते दुष्कृतम्। एनोऽंहश्च सान्तौ। मालायां किण्वम्। मलोऽनेकार्थेषु॥ २३

पञ्च्यतेऽनेन, पचि व्यक्तीकरणे पचि विस्तारे वा अकर्तरि चेति घञ् कुत्वं पङ्कम्। प्राप्नोति व्याप्नोति पाप्मा, नामन्सामन्नादिसूत्रे निपातितः। पान्त्यस्मादात्मानं पा रक्षणे, पानीविशिभ्यः पः (३. २३) पापम्। किलति सितिं कृष्णं करोति, किल सैत्यक्रीडनयोः, किलेर्वुक्चेति(१. ५१.) टि षच् वुगागमश्च किल्विषम्। कर्म शुभं स्यति तनूकरोति कल्मषं पृषोदरादिः। कलयति पॄनहिकलिभ्यः उषच्(४. ७५.) कलुषम्। त्रीण्यपि मूर्धन्यषाणि। वृज्यते वृजेः किच्चेति इनच् वृजिनम् (२. ४७.)। यन्त्यधोऽनेन इण् गतौ इण आगसीति(४. १९७.)असुन् नुट् च, एनः सान्तम्। न हन्ति धन्यमिति, अन्येभ्योपीति डः, न्यङ्क्वादित्वात् कुत्वम् अघम्। अमन्ति यान्त्यनेनाध इति अम गत्यादिष्वमेर्हुक्चेति (४ २१२.) असुन् हुगागमश्च अंह ऊष्मोपान्तसान्तम्। शीघ्रमंहोविघातमिति अनुस्वारपरो हकारो घकार इव श्रूयत इत्यक्षरभेदेऽप्येकत्वबुद्धेर्नागरानुप्रासमात्रम्। तदुक्तं—"एकत्वं बुद्धिभेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः। जायते यत्र वर्णानामनुप्रासः स उच्यते॥" अहि गतावित्यतोऽसुना अंह इति सिद्धे अचिरचिलचीत्यतोऽसुन्भ्रान्तिनिरासार्थममेर्हुक् चेति सूत्रमिति भीमः। उपाध्यायसर्वस्वे तु अंघतेरप्यसुन्, मतभेदादिति कौमुदी। दुर्गममस्मात् दुरपूर्वादिणो भावे क्तः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुरितम्। दुर्निन्दितं कृतं करणमस्य दुष्कृतमिगुपधस्येति षत्वम्। द्वादश पापस्य॥ स्यादिति। २३

(ग्रंहः) कवर्गचतुर्थवानिति धातुपूजा, तत्तु न वर्णादेशनाहङ्कुसंमतमिति साञ्जः, च.

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः।
मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः॥ २४
स्यादानन्दथुरानन्दः शर्मशा(सा)तसुखानि च।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्॥ २५
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्।
शस्तश्चाथ त्रिषु द्रव्ये पापं पुण्यं(पापपुण्य) सुखादि च॥ २६

धारणाद् धर्मः। यागाङ्गे नपुंसकम्—"तानि धर्माणि प्रथमान्यासन्" फले तु पुमान् एष धर्मः सनातन इति विशेषोऽस्य नेष्टः। लोकधर्मा नास्त्यधर्मेति पारिभाषिको धर्मन् (?) शब्दोऽप्यस्ति। पुनाति पुण्यं पुण्यकर्मणि शुभे च। अतिशयेन प्रशस्यं श्रयः, ईयसुनि प्रशस्यस्य श्रः। सुक्रियते स्म सुकृतम्। वर्षति वृषः, कः॥ प्रमोद-संमदौ हर्षे साधू। आनन्दनमानन्दथुः, ट्वितोऽथुच्। शृणाति क्लेशं शर्म। श्यति दुःखं शातं, शो तनूकरणे तन्। शोभनानि खानीन्द्रियाण्यस्मिन् सुखयति वा सुखम्॥ आगामिश्रेयोऽत्र श्वःश्रेयसम्। श्वोवसीयसं च, श्वसो वसीयःश्रेयस (५. ४. ८०.) इत्यच्। भन्दते भद्रं, भदि कल्याणे। कल्यं नीरुजत्वमणति कल्याणम्। मङ्ग्यते मङ्गलम्। शोभते शुभम्॥ भवनशीलं भावुकं, स्थाभूवृषेत्युकञ्। प्रशस्तो भवोऽस्यास्ति भविकम्। भवनार्हं भव्यं, भव्यगेयेति साधुः। कुशान् लाति कुत्सितं श्यति वा कुशलम्। क्षिणोति क्लेशान् क्षेमः। शस्यते स्म शस्तम्। प्रशस्तञ्च। निःश्रेयसं मालायाम्। सुनृतं कात्यः। द्रव्य इति विशेष्यलिङ्गतायामभिधेयलिङ्गम्। आदिशब्दात् कलुषश्रेयःशिवभद्रादयः॥ २४-२६

धरति विश्वं अर्तिस्तुसुहुसृधृक्षीति मन् (१. १३६)अस्त्रियां धर्मः। पुनाति पूञो णुट् ह्रस्वश्चेति(५. १५.)यत्, णुडागमह्रस्वात्वाणि पुण्यम्। इदमनयोरति-शयेन प्रशस्तम् ईयसुनि श्रादेशः, श्रेयः सान्तम्। सुकृतं दुष्कृतवत्। वर्षतीष्टं इगुपधत्वात् कः, वृषः। पञ्च पुण्यस्य॥ मुदिति। मोदनं मुत् दान्ता, मुद हर्षे क्विप्। प्रीतिः प्रीञः क्तिन्। प्रीतिसाहचर्यात् मुदः स्त्रीत्वम्। प्रमदसम्मदौ हर्ष इति निपातितौ। हर्षे प्रमोदामोदसम्मदानन्दा घञन्ताः। ट्वितोऽथुच् आनन्दथुः। शृणात्यशुभं सर्वधातुभ्यो मनिन् शर्म नान्तम्। साय(सिनो, गघ)त्यशुभं सातं, षै क्षये हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् (३. ८६.) इति बाहुलकात् तन्। अयश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दन्त्यादिः, तथा च देवीशतकेऽनुलोमप्रतिलोमयमकं—"सातं वर्मानन्तथा रहसि रसिहर-स्थाननर्मावतंसा (पायादक्ता रणत्रा मतनमनतमत्राणरक्ता दयापा, म) इति। श्यतेः सौत्रात्तालव्यादीत्यपर इति कौमुदी। स्यति दुःखं सातं, सो अन्तकर्मणीति तु स्वामी। षणु दाने क्तः जनषनखनामित्यात्त्वं, सातमिति सोमनन्दी। शोभनानीन्द्रियाण्यनेन सुष्ठु खनत्यशुभमिति वा सुखं, जातिकालसुखादिभ्योऽनाच्छादनादिति स्वरसूत्रेण सुपूर्वात् खने र्डः। द्वादश प्रीतेः, सप्त प्रीतेः शेषन्तु सुखस्य, प्रीतिश्च सुखजो विकार (इत्यन्य-, घ) इति तु कौमुदी। श्वश्रेयसमिति। श्वः आगामि श्रेयः (अत्र, ङ) श्वेश्रयसं श्वसो वसीयःश्रेयस(५. ४. ८०.)इत्यच् समासान्तः। आद्यौ तालव्यौ। श्यत्यशुभं शो तनूकरणे (वन् शिवं १. १५३)। भन्दते भद्रं, भदि कल्याणे, ऋज्रेन्द्रेत्यादिनादिना रक्। भन्दं भद्रं शिवं तथेति त्रिकाण्डशेषः। कल्यं नीरुजत्वमणत्यणतेः कर्मण्यण् कल्याणम्। मङ्गते मगिर्गत्यर्थः, मङ्गेर्वृषादित्वात् कलच् मङ्गलम्। शोभते शुभं इगुपधेति कः। धन्ये भवनशीलं लशपतपदेत्युकञ् भावुकम्। भवो भद्राप्तिसत्तयोरित्यजयः। भवो भद्राप्तिरत्रास्ति ठन् भविकम्। धन्ये भवति भव्यं भव्यगेयेति साधुः। भूवादेराकृतिगणत्वात् (घ) कुशेः सौत्राद्वृषादिभ्यः (१. १०८) कलच्, कुशलं मध्यतालव्यं कुशलवर्द्धित इति विदग्धमुखमण्डनं, (राम इव जनित-) कुशलवयोरूपोच्छ्राय इति वासवदत्ताश्लेषः। कुष निष्कर्ष इत्यतो मूर्धन्यमध्योऽपीत्यलङ्क(ङ्का, ग)रोऽ(सुभूतिः, च) मूलः। (कुषलं मूर्धन्यमिति जातरूपः, ज)(जातरूपसुभूती, त)। क्षिणोत्यशुभं क्षि क्षये अर्तिस्तुस्विति मन्। क्षेममस्त्रियामिति सम्बन्धः। शस्यते शस्तं, शन्सु स्तुतौ भावे क्तः। द्वादश कल्याणस्य॥

अथेति। पापपुण्यशब्दौ सुखादयश्च शस्तान्ता गुणे यथोक्तलिङ्गाः तदुपचारात् तद्वति द्रव्ये विशेष्ये वर्तमानास्त्रिलिङ्गाः। तत्र स्त्रियां कल्याणी अन्ये तु टाबन्ताः। सुष्ठु कृतः सुकृतः दुर् (दुष्ठु, ङ)कृतः दुष्कृत इति क्रियानिबन्धनं वाच्यलिङ्गत्वं न गुणनिबन्धनम्। (स, ङ)कल्मषोऽयमध्यारोप(मात्मन्यध्याहारः, म) इति त्व(तु, गङ)शिष्टप्रयोगः। ननु कथं दारिद्र्येऽपि धनित्वेऽपि वशः परिजनः सुखमिति, उच्यते अभेदोपचारेऽपि द्रव्यं प्रति विशेषणत्वेन सुखादि द्रव्यलिङ्गमिह तु स्वार्थप्रधानं द्रव्यं प्रति विशेष्यभूतं विवक्षितमिति स्वलिङ्गमेव। केचित्तु पापपुण्यसुखादि चेति समस्तं पठित्वा आदिशब्दं प्रत्येकमभिसम्बध्नन्तीति तु कौमुदी। मतल्लिका इति। २४-२६

सङ्ग-मङ्गल-पलाल-तिल-तमाल-कुण्डलमिति पुंनपुंसकयोश्चन्द्रगोमी।......काण्डे शरः शुभं क्षेमे इति दन्त्यतालव्ये पुरुषोत्तमः।.....कुशलं कुषलं पुनरिति द्विरूपे, च.

आनन्दिरपि, नन्दिरानन्दिरुद्दिष्टैति रत्नकोषः, कौशल्यानन्दिवर्धनो राम इति प्रयोगश्च।......सातं दन्त्यादि 'सिता संसत्सु सत्ताऽऽस्ते स्तुस्ते सततं सतः। ततास्तितैति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्तेतिसूतिः सातातता तु सा इति देवीशतके द्व्यक्षरयमकात्। अस्यार्थः तस्य ततास्तिता विस्तीर्णा विद्यमानता तस्ता क्षिप्रा ईतीनाम् उपद्रवाणां सूतिर्यत्र सातेन सुखेनातता ख्याता तु पुनरर्थे सा पुनरेति आरोग्यैश्वैर्ययुक्ता दीर्घायुष्टता स्यादित्यर्थः।······कुरङ्गैरिव कुशल-वादिभिर्भिक्षुभिरित्याश्चर्यमञ्जरी। विदग्धमुखमण्डने च—(अनुकूलविधायिदैवतो विजयी स्यान्नु कीदृशो नृपः। विरहिण्यपि जानकी वने निवसन्ती श्रियमाददे कुत इति। अत्रोत्तरं कुशलवर्धितः।·····'पापा ऋतुमती कन्या पापो राजाऽप्यरक्षकः (निरक्षरः, ग)। पापं व्याधकुलं हिस्रं पापो विप्रश्च सेवकः'॥ 'मगधेषु गया पुण्या नदी पुण्या पुनःपुना। च्यवनस्याश्रमं पुण्यं पुण्यं राजगृहं वनम्॥' 'सुखं कामि कुलं विद्यात् सुखो वासः सहाम्बया। सुखा युवतिरिच्छन्ती सुखा वै मघवद्गृहाः॥' ज.

यदा न द्रव्यगामि तदा नपुंसकमेव, यथा—'दारिद्र्येऽपि धनित्वेऽपि वश्यः परिजनः सुखम्। सुखं सज्जनसंवासः सुखं शान्तिरनुत्तमा॥' ननु दुष्कृतोऽयं व्यापारः सुकृतं कर्म कल्मषोऽयमात्मन्यधाहार इति त्रिषु वृत्तिः, तथा च भारविः—'सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थसाधन'मिति अतः कथं पापपुण्यादीनां ग्रहणम् उच्यते सुष्ठु कृतः सुकृतः यत्तु कल्मषोऽयं······इति नायं शिष्टप्रयोगः, म. (—अपप्रयोग इति मधुमाधवी, त; यद्ययं शिष्टप्रयोगः पापपदमर्थपरमिति सुभूतिः, च; अर्शआद्यचि सिद्धोऽयमिति कौमुदी, न.)

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ।
प्रशस्तवाचकान्यमून्यऽयः शुभावहो विधिः॥ (प्रमाणी) २७

निरस्तावयवा एवैते प्रशंसार्थाः, अतएव प्रशंसावचनैश्चेति नित्यसमासः। प्रशस्तो गौः गोमतल्लिका ब्राह्मणमचर्चिका गोप्रकाण्डं कटोद्धः कुमारीतल्लजः, तल्लजक इति तु लक्ष्यम्। संघोद्धौ गणप्रशंसयोरिति उद्धोऽसमासेऽपि॥ एत्ययः॥ २७

ननु शस्तप्रशस्तयोः को भेदो येन मतल्लिकादयः शस्तपर्यायात् पृथगुच्यन्ते। उच्यते, शस्तं मङ्गलं प्रशस्तमत्यर्थं श्रेष्ठं किञ्च शस्तवचनाः शिवादयो गुणेऽपि वर्तन्ते द्रव्येऽपि, मतल्लिकादयस्तु आविष्टलिङ्गा द्रव्ये एव वर्तन्ते खट्वादिवदन्यलिङ्गानां सामानाधिकरण्येऽपि निजलिङ्गं न जहति यथाऽश्वमतल्लिका गोप्रकाण्डं कुमारीतल्लजः। तथा च माघः "अरिर्मधोरैक्षत गोमतल्लिकामिति (२२. ४१.)। अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयोरिति मेदिन्यादौ पुंस्त्वञ्च कनि "दण्डकामध्यवार्त्तां यौ वीररक्षः-प्रकाण्डकाविति भट्टिः। अतएव मतल्लिकादीनां रूढिशब्दत्वात् प्रशंसावचनैश्चेति नित्यसमासः। संघोद्धाविति निपातनादुद्धः। पञ्च प्रशस्तस्य॥ अय इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुभकारि दैवमयः, इणगतौ पचाद्यच् अदन्तः, "शुद्धपार्ष्णिरयान्वित" इति रघुः। "सुलभैः सदा नयवताऽयवते"ति किरातश्च। एकम्॥ दैवमिति। २७

"ऐक्षिष्ट विष्णुर्दनुजप्रकाण्डः", ज.

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः।
हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्॥ २८

देवस्यात्मन इदं दैवं पूर्वकर्म। दिश्यते स्म दिष्टम्। भगस्यैश्वर्यादेरिदं भाग्यम्। भागमे(ए ?)व भागधेयं, नामरूपभागेभ्यो धेयः। भागाद् यच्च भाग्यम्। नियम्यतेऽनया नियतिः। विधीयतेऽनेन विधिः। भविष्यत् भवितव्यता च॥ हिनोति हेतुः, कार्यतेऽनेन कारणम्। बीज्यतेऽनेन वेति वा बीजम्॥ निदीयते जन्यतेऽनेन निदानम्। आदावारम्भे कारणमुपादानकारणम्। सहकारिकारणमन्यत्॥ २८

देवस्यात्मन आगतं दैवं पूर्वकर्म। दिश्यते स्म दिष्टं, दिश अतिसर्जने क्तः। भाग्यैकदेशयोर्भाग इति रुद्रकोषः। भाग एव भागधेयं, स्वार्थे भागरूपनामभ्यो धेयः। भाग्यं, भज सेवायां ऋहलोर्ण्यत् वृद्धिः चजोरित्यादिना कुत्वम्। भागाद् यच्चेति यति भाग्यमिति तु स्वामी। नियम्यतेऽनया नियतिः क्तिन्। विधीयतेऽनेनेति उपसर्गे किः विधिः। षट् प्राक्तनशुभाशुभकर्मणः॥ हेतुरिति। हिनोति व्याप्नोति कार्यं हि गतौ कमिमनिजनिगाभायाहिभ्यश्चेति तुन्(उः, १. ७५.)। हेतुः करोति लुग्ट् चेति चकारात् कारणम्। विशेषेण जायतेऽनेनोपसर्गे संज्ञायामिति डः, अन्येषामपीति दीर्घः बीजम्। त्रीणि कारणमात्रस्य॥ निदानमिति॥ निदानं बहुलमन्यत्रापीति युच्। आदि च प्रथमञ्च तत् कारणञ्चेत्यादिकारणम्। एतच्च वैशेषिकादिभिः समवायिकारणमुच्यते, अन्यैस्तू(बौद्धानामु, म)पादानकारणं, वैद्यैस्तु-(कारण—, म)कारणमिति। द्वे प्रथमकारणस्य॥ क्षेत्रज्ञ इति॥ २८

दैवं पुंनपुंसकयोरिति चन्द्रगोमी 'तेन दैवो बली दुर्जयः, 'दैवोऽपि तं वारयितुं न शक्त' इति प्रयोगः।......करणं च 'कारणं करणं तथे'ति रत्नकोषः, च. ('इन्द्रिये साधने देहे कर्मकायस्थयोरपि। वाद्यगीतप्रभेदेषु कारणं करणं विदुः', ज.)।

क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम्।
विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः॥ २९

क्षेत्रज्ञो देहमात्रं चेतयते। अतति सञ्चरत्यात्मा। पुरि शयनात् पुरा(पोर ?)-णात् वा पुरुषः॥ प्रधत्तेऽन्तः सर्वं प्रधानम्। प्रारम्भात् क्रियतेऽनया प्रकृतिः सत्त्व-रजस्तमसां साम्यावस्था अव्यक्ताख्या॥ कालकृतो देहादेर्भेदोऽवस्था, अन्यथास्थिति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यौवनादिः ॥ गुणाः प्रकृतेर्धर्माः । सत्त्वं साधुत्वं प्रकाशकं ज्ञानसुखहेतुः । रजो रागात्मकं दुःखहेतुः । ताम्यत्यनेन तम आवरकं मोहहेतुः ॥ २६

तथा च गीता—"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥" क्षेत्रे शरीरे जानाति क्षेत्रज्ञः, ज्ञानस्य शरीरात्मसंयोगासमवायिकारणकत्वादिति तु कौमुदी । अतति सञ्चरति अत सातत्यगमने सातिभ्यां मनिन्मनिणाविति मनिण् (४. १५२.) आत्मा । "अव्यक्तं मन इत्याहुः शरीरं पुरमुच्यते । अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यत" इति पुरुषः, पृषोदरादिः । पुनात्यनेन पुनातेः पुरुष इत्यन्ये । त्रीण्यात्मनः ॥ प्रधानमिति । प्रधीयतेऽत्र ल्युटि प्रधानम् । प्रारम्भे क्रियतेऽनया प्रकृतिः क्तिन् । द्वे सत्त्वरजस्तमसां साम्यावस्थायाः ॥ विशेष इति । कालकृतो वस्तुधम यौवनादिश्च विशेषोऽवस्था, आङ् व्यवस्थायामिति निर्देशात् स्थागापापचो भाव इति न क्तिन् । कालिक इति निवृत्ते अक्षद्यूतादिभ्य इति ठक् । गुणा इति । सत्त्वादयस्त्रयः प्रकृतेर्गुणाः । सत्त्वं लघुप्रकाशनं ज्ञानसुखहेतुः, रजो रागात्मकं चलं लोभजनकं दुःखहेतुः, तम आवरकं प्रमादमोहजनकं गुरु, इति सांख्यशास्त्रम् । सतो भावः सत्त्वम् । रञ्जयति भूरञ्जिभ्यां किदित्यसुन्-(४. २१६)रजः । ताम्यत्यनेन असुनि तमः । पृषोदरादित्वाददन्तपुंलिङ्गावपीमौ, "पुष्पे रेणौ गुणे चैव रजोऽयं रजसा सहेत्युत्पलिनी पुष्प इति स्त्रीपुष्पे । तम इत्यचि अदन्तोपि (सत्यं वदन्ति ते कस्मादसत्यं नीरजस्तमा इति चर (रज, ङः)कम् । त्रीणि स्वनामप्रसिद्धानि पृथक् पृथक् गुणशब्दवाच्यानि ॥ जनुरिति । २६

'रजोऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु' इत्यमरदत्तः, च.

'प्रस्तौमि तं पूरुष'मिति प्रबोधनाटकम् ।... ..'कान्त्या देवोपमाः सर्वे तपसा नीरजस्तमा' इति रामायणम, ज.

प्रधानं नपुंसकम् । 'ये प्रधानाः प्लवङ्गमा' इति लङ्काकाण्डप्रयोगाः आर्ष एव । 'न जाने स प्रधानो मे' इति चण्डयाम् । 'प्रधानेन महामात्रेण सहेति समाधानमिति पितृचरणाः । उक्तलिङ्गं त्यजत्यपीति न्यायात् पुंस्त्वमिति चण्डीटीकायां गुरुचरणाः । ... ..'अर्थाः पादरजोपमाः', त.

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३०
जाति[1]र्जातश्च सामान्यं (?) व्यक्तिस्तु पृथगात्मता ।
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ इति कालवर्गः ।

१ अयमर्धः ङ-पुस्तके न दृश्यते रायमुकुटटीकायाञ्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जननं जनुः, जनेरुसिः। उत्पत्तिसाहचर्यात् जनिः स्त्री इक्॥ जन्मी व्रीह्यादित्वात्। जायते जन्युः॥ (?) विशेषाख्या। चेतति चित्तं क्तः, असुनि चतः। ह्रियते विषयैर्हृदयम्। स्वनति स्वान्तं, क्षुब्धस्वान्तेति साधुः। ह्रियते हृत् दान्तं, प्रकृत्यन्तरमस्ति। तदाधारोऽपि हृत्पुण्डरीकम्। मन्यते मनः। मन एव मानसं स्वार्थेऽण्॥ ३०-३१ इति कालवर्गः।

जननं जनुः, जनेरुसिः। जन जनने, भावे ल्युट् जननम्। मनिन् जन्म। इषियुधीति (१. १४४.) मकि जन्मोऽदन्तोऽपीत्युणादौ। जनिघसिभ्यामिण् (४. १२६) जनिवध्योश्चेति वृद्ध्यभावः। जनिश्च स्त्री उत्पत्तिसाहचर्यात्। किमर्थं जनिना जन्तोर्वृथाजन्मन इति शिष्टप्रयोगात् पुंस्त्वञ्च। उत्पत्तिः क्तिन्। उद्भवः अप्। षट् जन्मनः॥ प्राणीत्यादि। प्राणिशरीरिणौ अत इनिः। चेतनो नन्द्यादिः। जन्मी व्रीह्यादिभ्यश्चेतीनिः, नस्तद्धित इति टिलोपः, अदन्तत्वाद्वा अत इनिठनौ। जायते जनेर्हेतुवत् तुः, जन्तुः। एवं यजिमनिशुन्धिदसिजनिभ्यो युच् (३. २०.) जन्युः। षट् प्राणिनः॥ ६॥ चित्तमिति॥ चिती संज्ञाने भावे क्तः। चेततेऽसुनि चेतः। ह्रियते विषयैर्हृदयं वृह्रोः षुग्दुकौ च(४. १००.) इति कयन् दुगागमश्च हृदयम्। यद्यपि बाह्यविषयेष्वविक्षिप्तमनाकुलं मनः स्वान्तं क्षुब्धस्वान्तेति निपातितं तथाप्यभेदो दृश्यत इति इहापि तथा। ह्रियते हरतेः क्विप्तुकौ, वर्णव्यत्ययात्तकारे दकारः, तथा च हृदि प्राण इति प्रयोगः। दान्तं प्रकृत्यन्तरमस्तीति तु स्वामी। मन एव मानसं प्रज्ञाद्यण् मन्यत इत्यसुनि मनः, अर्धर्चादीत्युपाध्यायसर्वस्वम्। सप्त मनसः॥ इति कालवर्गविवरणम्॥ ३०-३१

'कीर्तिं विना जनिरियं च न युक्तरूपे'ति, त.

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित्संवित् प्रतिपज्ज्ञप्तिचेतनाः॥ १

मनुते मनीषा, मनस एव ईषा वा, दे (दि ?) धेष्टि धिषणा, धिष शब्दे। ध्यायति धीयते वास्यां धीः। शेते शेः मोहस्तं मुष्णाति शेमुषी, शमेः क्सावेत्वाभ्यासलोपे ङीप् वा। उपलब्धिः, बाहुलकात् क्तिन्, षित्वादङि उपलम्भा स्यात्। प्रतिपत्तिः प्रतिपत्, सर्वे गत्यर्थाः ज्ञानार्थाः। ज्ञप्तिः, कथंचित्तोषणार्थे मितां ह्रस्वः। सांख्ये बुद्धिधर्मस्यैते पर्यायाः। वैशेषिकादौ चतुर्दशापि बुद्ध्यर्थाः॥ १

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बुध्यतेऽनया क्तिन्, बुद्धिः। ईष गतिहिंसादानेषु गुरोश्चेत्यकार ईषा मनस ईषा मनीषा पृषोदरादित्वाट्टिलोपः मूर्धन्यषा। धृष्णुवन्ति प्रगल्भन्तेऽनयेति धृषेर्धिष च संज्ञायामिति युचि धिषणा णकारान्ताद् मूर्धन्यषा, अन्यथा णत्वाभावात्। देधेष्टि धिषणा धिष शब्द इति तु स्वामी। ध्यायतीति ध्यायतेः संप्रसारणं क्विप् हलश्चेति दीर्घः धीः। प्रज्ञा अङ्, प्रद्धापि "प्रज्ञा प्रद्धा[१] धरा ज्ञप्तिः पण्डा संवेदनं विदेति शब्दार्णवात्। शेत इति विच् शेः मोहः संशयः, विचार्य तं मुष्णाति मूलविभुजादित्वात् के गौरादित्वात् ङीषि शेमुषी तालव्यादिमूर्धन्यान्ता। शमेः कसौ एत्वाभ्यासलोपे शेमुषीति तु कौमुदी। मन्यतेऽनया क्तिन् मतिः। प्रकर्षेण ईक्ष्यते ज्ञायते अनया गुरोश्चेत्यकारे प्रेक्षा। उपलब्धिः षित्वादङि प्राप्ते बाहुलकात् क्तिन्। चिदादिषु त्रिषु करणे सम्पदादित्वात् क्विप्, चित् तान्ता। ज्ञप मिच्च, चौरादिकात् क्तिन् तितुत्रतथेतीण्णिषेधो (३. २. ६.), ज्ञप्तिः। चेतना चित सञ्चेतने चुरादिः युच्। तत्र कौमुद्यां क्षीरस्वामिनि चायं विवेकः बुद्ध्यादयश्चतुर्दश बुद्धेरिति वैशेषिकाः सत्त्वप्रधानं महदाख्यमन्तःकरणं बुद्धिः विषयाकारोपग्रहायां बुद्धौ प्रतिबिम्बितायाश्चिच्छक्तेर्बुद्धिवृत्त्यनुकार उपलब्धिरिति सांख्यदर्शनात्। बुद्ध्यादि सप्तकं बुद्धौ, प्रेक्षादिसप्तकमुपलब्धावित्यपरे। सांख्ये बुद्धिधर्मस्य ज्ञानस्यैते पर्याया इति भट्टोऽपि। बुद्धेश्चतुर्दश॥ धीरिति। १

दन्त्यादिरप्ययं (शेमुषी) 'वारणेन्द्रावगाह्यमानघनरसे नरसेमुषीसमुदायागोचरा हरमौली' इति कविकल्पलतादर्शनादिति रमानाथः, च.

धीर्धारण(ा)वतो मेधा, संकल्पः कर्म मानसम्।
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा॥ २

मेधते संगच्छतेऽस्यां मेधा। मनसो व्यापारः संकल्पः। विकल्पोऽपि॥ पूर्वोक्तस्य चित्तस्य सन्तानद्वारेण स्थैर्यमाभोग इति बौद्धाः। पुनः पुनर्मनसि करणं मनस्कारः, अतः कृकमीति सत्वम्। समाधानमवधानं च, प्रणिधानं च। चर्चनम् संख्यानम् विचारश्च। विमर्शः वासना भावना॥ संस्कारोऽनुभूताद्यविस्मृतिरिति वक्तव्यम्॥ २

धारणाशक्तियुक्ता धीर्मेधा, मेधते संगच्छतेऽस्यां सर्वं मेधृ संगमे च गुरोश्चेत्यकारः। एकम्॥ इदमहं कुर्यामिति मनसो व्यापारः संकल्पः, भावे घञ्। एकम्॥ चित्तेति। पूर्वस्य चित्तस्य संतानद्वारेण स्थैर्यमाभोग इति भट्टः,

---

१ अयमेव पाठो मुकुटपुस्तकेषु परमानन्दे रघुनाथे च, श्रद्धेति भानुजौ, प्राज्ञेति मथुरेशे, पुनः प्रज्ञेति रामनाथे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आभोगस्तात्पर्यमिति सर्वानन्दः, व्यापार इति मधुमाधव्यादौ, अनागतचिन्तारूपचित्ताभोगो मनस्कार इति तु कौमुदी, एकस्मिन् विषये पुनः पुनश्चित्तवृत्तिराभोग इति तु पञ्जिका। मनसः कारो निश्चय इति षष्ठीसमासे अतः कृकमीत्यादिना सत्वम्। मनसिकरणं मनसिकार इत्यपि दृश्यते, तत्र बाहुलकात् सप्तम्यलुक्समासः। द्वे मनसः सुखादौ तत्परत्वस्य॥ चर्च अध्ययने चुरादिण्यन्ताद्भावे चिन्तिपूजीत्यादिनाङ् चर्चा। संख्यानं संख्या अङ्। चर असंशये चुरादिः ण्यासेति युच् विचारणा। त्रयं प्रमाणैरर्थपरीक्षाया इत्येके, विमर्शमात्रस्येत्यन्ये॥ अध्याहार इति। २

एकस्मिन् विषये पुनः पुनश्चित्तवृत्तिरिति छभूतिवादिनी पञ्जिका, च.

साङ्गस्तु अवश्यं करिष्यामीति चित्ताभोगः पूर्णता निश्चय इति यावत्। मनसिकारश्च, य. कल्पश्च 'सङ्कल्पक्षययोः कल्प, इति व्याडिः, ज.

अध्याहारस्तर्क ऊहः, विचिकित्सा तु संशयः।
सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ॥ ३

अध्याहरणमपूर्वोत्प्रेक्षणम्। तरत्यनेन संशयविपर्ययौ तर्कः तर्कणं वा, तर्क भाषार्थः॥ उभयकोटिस्पृग्ज्ञानम् विचिकित्सा एकत्र(ना)रूढेः कितः संशये सन्। शीङ्दिहोर्नानार्थयोः संशब्देनैषोऽर्थो द्योत्यते, उपसर्गस्य वा धातूपाधिकत्वात् सोऽर्थः प्रकाशते। एवं सर्वत्र। द्वौ पक्षौ परौ यत्र द्वापरः, पृषोदरादित्वादात्वम्॥ ३

अध्याहरणमध्याहारः न्यूनपदपूरणार्थमधिकपदोहकरणमिति सर्वधरः। तर्कणं तर्कः, वृतु वृधु भाषार्था इति चुरादिदण्डकात् घञ्। ऊह वितर्के भावे घञि ऊहः। "वितर्कस्तु तर्क ऊहो द्वयोरित्यूहनं न ना। शङ्कत्वाशङ्किराशङ्का श्रमस्तु स्यात् परिश्रम" इति तु शब्दार्णवः। त्रयमूहनस्य॥ उभयकोटिस्पृक् ज्ञानम् विचिकित्सा एकत्रानारूढेः, कित निवासे स्वार्थे गुपतिजेति सन् अप्रत्ययः। सं द्वयोर्नानार्थयोः शयितम् संशयः, समो नानार्थता, शीङ् एरच्। दिह उपचये, अत्रापि नानार्थसंशब्द उपपदे घञि सन्देहः। द्वौ पक्षौ स्थाणुर्वा पुरुषो वेत्येवंरूपो परावात्मीयौ प्रधानभूतौ विशेषौ(अंशौ, ग)वा अस्मिन्निति द्वापरः, सर्वनामसंख्ययोरिति संख्यायाः पूर्वनिपातः पृषोदरादित्वात् पूर्वस्यात्वम्। चत्वारि सन्देहस्य॥ अथेति। निपूर्वान्नयतेरच्, उपसर्गादसमासेऽपीति णत्वम्, यदा तु निस उपसर्गप्रतिरूपकत्वं तदा न णत्वं निर्णयः। निश्चिनोतेर्ग्रहवृद्द इत्यप् निश्चयः। स्थाणौ स्थाणुरेवायमित्यादि निर्णयस्य द्वयम्॥ मिथ्येति। ३

मिथ्यादृष्टिर्नास्तिकता, व्यापादो द्रोहचिन्तनम्।
समौ सिद्धान्तराद्धान्तौ, भ्रान्तिर्मिथ्यामतिर्भ्रमः॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मिथ्यादृष्टिः परलोकाभावबुद्धिः। नास्ति परलोक इति मतिर्यस्य, अस्ति नास्ति दिष्टं मतिरिति ठक्। व्यापादनं व्यापादः ण्यन्तादच्। राद्धः सिद्धोऽन्तो निश्चयोऽस्य राद्धान्तः। मिथ्यामतिरतस्मिंस्तदिति ज्ञानम्॥ ४

मिथ्या चासौ दृष्टिश्चेति कर्मधारयः। यथा नास्ति कृतं नास्ति स्वर्ग इत्यादि नास्तिकतेति नास्ति परलोक इति मतिर्यस्येति अस्ति नास्ति दिष्टं मतिरिति ठक्। ततो भावे तल्। द्वे परलोको नास्तीति बुद्धेः॥ व्यापादनं व्यापादः ण्यन्ताद् घञ्। द्रोहस्य चिन्तनं द्रोहचिन्तनं, बाहुलकात् ल्युट्। द्वे परद्रोहचिन्तायाः। समाविति। सिद्धोऽन्तो निश्चयोऽनेनेति सिद्धान्तः। एवं राद्धोऽन्तो निश्चयोऽनेन राद्धान्तः। द्वे सिद्धान्तस्य॥ अतस्मिंस्तदिति ज्ञानम्। भ्रान्तिर्भ्रमेः क्तिन् अनुनासिकस्येति दीर्घः। अतस्मिंस्तदिति मन्यतेः, ष्यदित्वं च मिथ्येत्यव्ययम्। तथा मतिः मिथ्यामतिः। घञि भ्रमः, नोदात्तोपदेशेत्यादिना वृद्ध्यभावः। त्रीणि भ्रान्तेः॥ संविदिति। ४

संविदागूः प्रतिज्ञानम् नियमाश्रवसंश्रवाः।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः॥ ५

पञ्चोक्तिः प्रथिताङ्गीकारश्चेत्युभयीह प्रतिज्ञा। संविज्ज्ञानं, यथा— सत्संवित्करणातीता, नियमोपि—संविदं लंघयेच्च सः। धातूनामनेकार्थत्वादुपसर्गवशाद्वा तत्तदर्थत्वम्। आगमनमागूः, भ्रमेश्च डूरिति चकाराड्डूः॥ ५

संवेदनं संवित्, सम्पदादित्वात् क्विप्। आगमनमागूः भ्रमेश्च डूरिति डूः(२. ६८.) चकारो गमेर्डोरित्यतो गमेरित्याकर्षणार्थः। यदा तु ऊ(ङ्, ६. ४. ४०. २)च गमादीनामिति क्विप् ऊ च तदा खलपूवत्। संवित्साहचर्यात् स्त्रियामागूः। प्रतिज्ञानं ल्युट्। नियमः यमः समुपनिविषु चेत्यप्। आश्रवः अप्। एवं संश्रवः। समाङ्प्रतिपूर्वः शृणोतिरभ्युपगमे। एवं प्रतिश्रवः। अङ्गीकार इति तु च्व्यन्तानुप्रयुक्तात् कृञो भावे घञ् ग्रहवृद्द इत्यादिनापि अभ्युपगमः। किः समाधिः। दशाङ्गीकारस्य॥ ५ (गुरी उद्यमने इत्यस्मात् आगूः आगुरौ , ड)

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्॥ ६
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्।
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी॥ ७
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम्॥ ८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोक्षविषया मोक्षफला वा धीः। मोक्षशास्त्रादन्यत्र शास्त्रे शिल्पे चित्रादौ धीर्विज्ञानम्॥ मोचनं मुक्तिः मोक्षः पाशेभ्य आत्मनः पृथग्भावः। अतएव कैवल्याख्या। निर्वात्यस्मिन् निर्वाणं, निर्वाणोऽवात इति साधुः, पै श्रै वै शोषणे। अतिशयेन प्रशस्यं श्रेयः निश्चितं श्रयो निश्रेयसम्, अचतुरेति साधुः। अविद्यमानं मृतमत्रामृतम्। भावेभ्योऽपवर्जनम् अपवर्गः। महानन्दोऽपुनर्भवश्च॥ विरुद्धं वेदनमविद्या। अधर्मानर्थवत् विपर्यये नञ् यदाह अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। अहमित्यस्य मननमहंमतिः, अनात्मन्यात्माभिमानात्, अहं विभक्तिप्रतिरूपको निपातः॥ रूपाद्याः पञ्च विशिण्वन्ति बध्नन्ति विषयाः, पचाद्यच्, परिनिविभ्यः सेवसितसयेति षत्वम्॥ गावः इन्द्रियाणि चरन्त्येषु गोचराः, गोचरसञ्चरेति साधुत्वम्। इन्द्रियैरर्थ्यन्ते इन्द्रियार्थाः। अर्थाश्च हृष्यन्त्यनेन हृषीकम्। विषयोऽस्यास्ति विषयि। इन्द्रियस्यात्मनो लिङ्गम् इन्द्रियमिन्द्रलिङ्गमिति साधु॥ वाक्पाणिपादपायूपस्थाख्यं वचनादानगत्युत्सर्गानन्दरूपकर्मसाधनमिन्द्रियम्॥ मनःषष्ठानि नेत्रजिह्वाघ्राणत्वक्श्रोत्राणि धीहेतवो बुद्धीन्द्रियाणीत्यर्थः॥ ६-८

मोक्षे मोक्षविषये यज्ज्ञानम् तद्धीरुच्यते। अन्यत्र ज्ञानम्। शिल्पिशास्त्रविषये तु विज्ञानमिति शीलकलिङ्गौ। अन्ये तु मोक्षविषये धीर्ज्ञानम्, अन्यत्र मोक्षप्रतिपादकशास्त्रादन्यत्राशास्त्रे शिल्पादौ चित्रादौ विज्ञानमिति वदन्ति। मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते, तन्निमित्ततोऽन्यनिमित्तं यत् तयोर्धीः सा विज्ञानमिति तु वयं व्याचक्ष्महे। अत्र मोक्षे धीरेवोच्यते इत्येकम्॥ अन्यत्र शिल्पे चित्रादौ शास्त्रे स्मृत्यादौ धीर्विज्ञानं विरूपं ज्ञानं विज्ञानम्। एकं शिल्पशास्त्रग्राहिण्या बुद्धेः। मुक्तिरिति। शरीरेन्द्रियाभ्यामात्मनो मुक्तत्वं मुक्तिः क्तिन्। एतयोरेव विरहेणात्मनः केवलत्वं कैवल्यम्। निर्वान्त्यत्र निर्वाणं, निर्वाणोऽवाते इति निपातितम्। धर्मपर्याये श्रेय उक्तम्। निश्चितं श्रेयो निःश्रेयसं, अचतुरादिना अच्। तनिमृङ्भ्यां किच्चेति (३. ८८) तन् मृतं, अविद्यमानं मृतमत्र अमृतम्। मोक्ष अवसाने चुरादिः एरच् घञ् वा। युमुचिभ्यां ष इति षे मोक्ष इति तु कौमुदी। अपवर्जनमपवर्गः, वृजी वर्जने घञ्। अष्टौ मोक्षस्य॥ अथेति। न ज्ञानमज्ञानम्। विरुद्धं वेदनमविद्या, अधर्मानर्थवद्विपर्यासे नञ्, संज्ञायां समजेत्यादिना क्यप्। अहमिति निपातोऽहङ्कारे तत्प्रधाना मतिरहंमतिः (अहंशब्दोऽव्ययं, सुप्सुपेति समासः, ङ)। त्रीण्यविद्यायाः॥ रूपमिति। अमी पृथक् पृथक् प्रसिद्धाश्चक्षुरादिग्राह्याः पञ्च विषयादिशब्दत्रयवाच्याः। तत्र (खष्प, ग)शिल्पशस्पबाष्परूपपर्पतल्पा इति (३. २८.) रौते रुपं निपातितम्। शब्द इति शप आक्रोशे शाशपिभ्यां ददनाविति (४. ९७.) दन्शब्दः। गन्ध

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्दनेऽच् गन्धः। रस आस्वादने चुरादिः एरच् रसः। अकर्तरि चेति घञि स्पर्शः। विषिण्वन्ति विबध्नन्तीन्द्रियाणि विषयाः, षिञ् बन्धनेऽच्, परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जामिति षत्वम्॥ गाव इन्द्रियाणि चरन्त्येषु गोचराः, गोचरसञ्चरेत्यादिना निपातितम्। इन्द्रियैरर्थ्यन्तेऽभिलष्यन्ते इन्द्रियार्थाः, अर्थ याच्ञायां स्पर्शवद् घञ्। हृषीकमिति। हृष्यन्त्यनेन हृषु आलीक्ये मूर्धन्यषः, अलि(नि)हृषिभ्यां किदिति (४. १७.) करणे ईकन् हृषीकम्। विषयो ग्राह्यत्वेनास्यास्ति विषयि इनिः। इन्द्रस्यात्मनो लिङ्गं तेन वा दृष्टं सृष्टं वा, इन्द्रियमिन्द्रलिङ्गेति घच् निपात्यते। त्रयमिन्द्रियस्य॥ कर्मेति। पाय्वादि कर्मेन्द्रियमुच्यते, कर्मसाधकमिन्द्रियं कर्मेन्द्रियम्। पायुर्गुदं, आदिना उपस्थादिग्रहः। तथा च कामन्दकीये—"पायूपस्थं पाणिपादं वाक् कर्मे(चेती, घ)न्द्रियसंग्रहः। उत्सर्गानन्दनादानगत्यालापश्च तत्क्रिया" इति। एकं गुदादीन्द्रियस्य॥ मनोनेत्रादीनि धीन्द्रियाणि, धीर्ज्ञानं तन्निमित्तमिन्द्रियम्। तथा च—"मनः कर्णौ तथा नेत्रे रसना च त्वचा सह। नासिका च षडेतानि धीन्द्रियाणि प्रचक्षत" इति॥ एकं बुद्धीन्द्रियस्य॥ तुवरेति। ६-८

कर्मसाधकमिन्द्रियं कर्मेन्द्रियमिति भगदत्तः (भगीरथः?), द.

तु(कु)वरस्तु कषायोऽस्त्री मधुरो लवणः कटुः।
तिक्तोऽम्लु(म्ब्ल)श्च रसाः पुंसि तद्वत्सु षडमी त्रिषु॥ ९

तु इति सौत्रादावरणार्थादौणादिको वरक्। कषति कण्ठं कषायः। मधु माधुर्यमस्यास्ति मधुरः, ऊषशुषीति रः। लुनाति जाड्यं लवणः, नन्द्यादित्वाल्ल्युः णत्वञ्च। कटत्यावृणोति कटुः। तेजति स तिक्तः। अम्वत्यम्लुः(म्ब्लः), अमेर्लः इत्येके अम्लमाहुः। तुवराद्याः षट् रस्यन्ते रसाः। गुणमात्रे रसः पुंसि। गुणवद्वृत्तित्वे तेऽभिधेयलिङ्गाः॥ ९

तु इति सौत्रो धातुर्धारणार्थः, तत औणादिकः छित्वरछत्वर इत्यादिना ष्वरच् ह्रस्वादिर्दीर्घादिश्च। तथा च "नरेऽश्मश्रुणि शृङ्गाभ्यां रहिते गवि तूवरः। काले प्राप्ते कषाये च रसे पुंव्यञ्जनेऽच्युत" इत्युत्पलिनी। "नाऽपि कषायस्तुवर" इति वोपालितात्, अत्र दीर्घे त्वार्याभङ्गः स्यात्, "पुंसि कषायस्तुवरमि"ति तु क्लीबकाण्डे रत्नकोषाच्च। ह्रस्वादिरेवात्र पाठो बहुपुस्तकदर्शनात्। कुत्सितो वरः कुवरो ह्रस्वादिः कवर्गादिश्चेति कुवरस्तु कषायोऽस्त्रीत्येके पठन्तीति सर्वानन्दादयः। कषति कण्ठमिति कषायो मूर्धन्यषः। द्वे कषायरसस्य॥ मधुर इति। मधु माधुर्यं तद्योगात् ऊषशुषिमुष्कमधो र इति रः, मधुरः। लुनाति जाड्यमिति लञ् छेदने ल्युः लवणः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लवणाल्लुगिति निपातनाण्णत्वम्। कटत्यावृणोति तीक्ष्णत्वेन मुखमिति कटुः, कटेर्वर्षावरणयोः, वटिकटिभ्याञ्चेत्युः। तिज निशाने बाहुलकात् अञ्जिघृषिभ्यां क्तः तिक्तः। रम्बतीति अबि रबि लबि शब्दे मू(शू, ग)शक्यबिभ्यः क्लः (४. १०८.), मबलसंयोगवान् अम्ब्लः। रस्यन्त इति रसाः। गुणमात्र वर्तमानाः पुंसि मधुरादयः। पञ्च प्रत्येकं मधुरादिरसशब्दवाच्याः। तद्वत्सु कषायादिरसवत्सु द्रव्येषु वर्तमानाः अमी रसा रसशब्दवाच्याः अर्था इति। अथ लिङ्गे चार्थस्य वृत्त्यसम्भवात् षड् रसवाचिनः शब्दास्त्रिषु लिङ्गेषु वर्तन्त इत्यर्थो लभ्यते, यदि तु षट्शब्दाः तदादेस्तुवरस्य त्रैलिङ्ग्यं न स्यात् तुवरो विभीतकः तुवरं जलं तुवरा हरीतकीति। कटुशब्दस्य स्त्रियां कटूः कट्वी वा॥ विमर्देति। ६

'लवणसलिलावासे' इति भट्टिभाषासमावेशः, च.

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।
आमोदः सोऽतिनिर्हारी, वाच्यलिङ्गत्वमा गुणात्॥ १०

सुरभिमाल्यगन्धादिपरिमर्दनोत्पन्नो हृद्यो गन्धः परिमलः। स गन्धोऽतिदूरव्यापी मनोहारी वा समन्तात् मोदन्तेऽनेनामोदः॥ वाच्यलिङ्गत्वमा गुणात्। अधिकारोऽर्थः गुणाः शुक्लादय इत्येतस्मात् प्रागभिधेयलिङ्गाः॥ १०

सुरतादिविमर्दोत्थे माल्यादिगन्धे द्रव्याणाञ्च परिमलादुद्भूते मनोहरे परिमलो वर्तते मल मल्ल धारणे घञ् संज्ञापूर्वकत्वात् वृद्ध्यभावः, जनग्रहणं किं मल्लिकादेर्मनोहरे मा भूत्। एकम्॥ स परिमलोऽतिनिर्हारी अतिदूरगामी अतिमनोहारी वा आमोदः आसमन्तान्मोदन्ते अनेनेति मुद हर्षे घञ्। एकम्॥ वाच्येति। आ गुणात् गुणे शुक्लादयः पुंसीति यावत् अतःपरं वाच्यलिङ्गतेत्यधिकारोऽयम्॥ समाकर्षीति। १०

स परिमल इति सुभूतिरायौ, स गन्ध इति स्वामी।······गुणाः शुक्लादिस्तत्पर्यन्त इत्येके, युक्तं चेदं तत्र विशेष्यवाच्यत्वात्, च.

समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः।
इष्टगन्धः सुगन्धिः स्यादामोदी मुख(शुभ)वासनः।
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत्॥ ११

अत्र यो यं प्रति प्रसिद्धस्तदनुवादे नान्यविधिः। निर्हरत्यवश्यं निर्हारी। सुष्ठु रमते सुरभिः। शोभनो गन्धोऽस्य सुगन्धिः, गन्धस्येदुत्पूतीति इत्। मुखं वासयत्यनुलिम्पति मुखवासनः, मुखवासयोग्य इत्येके, मुखवासस्यागुरुवासन इति भागुरिः यतः आमोदो नित्योऽस्यास्ति। अन्ये द्वौ द्वौ भिन्नावाहुः। पूयी विसरणे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गन्धे च, पूतिर्विस्रः, पूतेरिव गन्धोऽस्य। विस्यते विस्रं, विस उत्सर्गे। आमोऽपक्को मलस्तस्येव गन्धोऽस्यामगन्धिः, उपमानाच्चेतीत्॥ ११

समाकर्ष्यत्यवश्यं आवश्यके णिनिः। एवं निर्हारी। द्वे दूरगामिगन्धस्य॥ सुरभिर्वसन्त उक्तः। घ्राणं घ्राणेन्द्रियं तर्पयति घ्राणतर्पणो नन्द्यादिः। इष्टो गन्धोऽस्य इष्टगन्धः। एवं सुगन्धिः गन्धस्येदुत्पूतीत्यादिना इत् समासान्तः तदेकान्तग्रहणं कर्तव्यमित्यनौपाधिकस्यैवेति। आघायि वान् गन्धवहः सुगन्ध इति भट्टौ न समासान्त इत्। चत्वारि सुगन्धे॥ इष्टगन्धादिद्वयं व्युत्पत्यनुसारेण सुरभिगन्धयुक्तद्रव्यस्येति कौमुद्यादयः॥ आमोदयुक्तः कर्पूरादिरामोदी अत इनिः। मुखं वासयति मुखवासनो नन्द्यादिः। शुभवासन इति क्वचित् पाठस्तत्र शुभं मनोहरं वासनं वासो यस्येति बहुव्रीहिरिति सर्वधरः। द्वे मुखवासनवटिकादेः। पूतीति। पूतिः विस्रः पूतेरिव गन्धोऽस्य पूतिगन्धिः, सुगन्धिवदिकारः। दुष्टो गन्धोऽस्य दुर्गन्धः, गन्धस्येदुत्पूतीत्यादौ दुरोऽभावान्नेत्त्वम्। अतएव काव्यादर्शे(काव्यालङ्कारे ?)वामनः दुर्गन्धिमदादिषु पदेषु इत्समासान्तो दुर्लभः उत्पूत्यादिषु दुःशब्दस्यापाठादिति (५. २. ६६)। केचित्तु मत्वर्थीयमिनिं कृत्वा दुर्गन्धीति नान्तमाहुः, तदसत्, कर्मधारयमत्वर्थीयाभ्यां (ययोः, म) बहुव्रीहिरेवेष्टो लाघवादिति कात्यायनोक्तः। केचित्तु लाघवमनादृत्येच्छन्त्येव मत्यर्थीयं बिसकिशलयच्छेदपाथेयवन्त इति वतुप्रयोगश्च। यद्दुर्गन्धि मदाविलं मलशतैर्यत् पूतिनाडीमयमिति शृङ्गारप्रकाशे (विमाकरवर्मा, म)। द्वे दुर्गन्धस्य॥ विस्रमिति। विस प्रेरणे दन्त्यान्तः बाहुलकात् स्फायितश्चीत्यादिना रक्, विस उत्सर्ग इति तु भट्टः। आमगन्धीत्यामोऽपक्को मलस्तस्येव गन्धोऽस्येति उपमानात् चेतीत् समासान्तः। विस्रादिद्वयमपक्कमांसादिगन्धे॥ शब्दार्णवे तु "कस्तूरिकायामामोदः कर्पूरे मुखवासनः। बकुले स्यात्परिमलश्चम्पके सुरभिस्तथा॥ गन्धादिषड्भिरप्येते गुणिवृत्तौ त्रिलिङ्गका" इति। सुरभ्यादिभ्यः कृदिकारादक्तिनः सर्वतोऽक्तिन्नर्थादित्येके इति पक्षे ङीष् सुरभी सुगन्धी इति तु कौमुदी॥ शुक्लेति। ११

ततः छगन्धेन विलीनचेतन इति कण्ठाभरणे, ज.

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः।
अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः॥ १२

शोकति मनोऽस्मिन् शुक गतौ। शोभते शुभ्रः। शुच्यति शुचिः। श्विता वर्णे, श्वेतते श्वेतः। विशीयते विशदः। श्यायते श्येतः। पण्डते याति मनोऽस्मिन् पाण्डरः उणादौ। अवदीयते शोध्यते अवदातः। सिनोति मनः सितः, षिञ्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बन्धने। गोरते मनोऽस्मिन् गोरः, गुरी उद्यमे, गोर एव गौरः। अवलक्ष्यतेऽवलक्षः। धूयते मलोऽस्य धवलः, धावेर्ह्रस्वश्चेति श्रीभोजः। अर्ज्यतेऽर्जुनः॥ १२

शोकति मनोऽस्मिन् शुक गतौ शुक्लः ऋज्रेन्द्रादौ निपातितः। शोभते शुभ्रः शुभ शुन्भ शोभार्थे स्फायितञ्चीत्यादिना रक्। शुचिरग्नावुक्तः। श्विता वर्णे अकर्तरि चेत्यादिना घञि श्वेतः शस्तालव्यः, श्वेतो धावतीति श्लेषात्। विशीयते विशदः शद्लृ शातनेऽच्, 'विशदाविशदामत्तसारसे सारसे जले' इति दण्डियमकात्। श्यायते श्यैङ् गतौ हृश्याभ्यामितन् (३. ९३.) श्येतः। पण्डते याति मनोऽस्मिन् पाण्डरः, पडि गतौ, पण्डेर्दीर्घश्चेति रः (अरः ?)। अवदायते शोध्यते अवदातः दैप शोधने क्तः। सिनोति मनः, षिञ् बन्धने अञ्जिघृषिभ्यः क्तः सितो दन्त्यादिः, क्षितौ विकसितम् सितमिति कीचकयमकात्। गोरति मनोऽस्मिन् गुरी उद्यमे ऋज्रेन्द्राग्रेति गौरो निपातितः। गुङ् गतावित्यस्य निपात इति सर्वधरः। अवलक्ष्यत इति वलक्षः पूर्ववद्घञ्, रूढित्वान्नित्यो वष्टि भागुरीत्यकारलोप इति स्वाम्यादयः। वलतेः क्विप् वलमक्षन्त्यस्मिन् पुर्ववद् घञि वलक्ष इति कषसंयोगवान्। [1] अथ स वलक्षो भानां पतिरिव कर्तारिवलक्षोभानाभिति वृन्दावनादिति कौमुद्यादयः। धावति मनोऽत्र धावु गतिशुद्ध्योः, वृषादित्वात् कलच् धवलः, बहुलवचनात् ह्रस्वत्वम्। धावो ह्रस्वश्चेति कलच्ह्रस्वाविति भोजराजः। अर्ज्यते जनानुराग इति अर्ज सर्ज अर्जने, अर्जेर्लंक् चेत्युनन् अर्जुनः। अत्र यद्यपि शब्दार्णवे भेदः—"श्वेतस्तु समपीतोऽसौ रक्तेतरजबारुचिः। वलक्षस्तु सितश्यावः कदलीकुसुमोपमः॥ अर्जुनस्तु सितः कृष्णलेशवान् कुमुदच्छविरिति" तथाप्यस्य भेदस्यानादरणादिह पर्यायता। त्रयोदशकं शुक्लवर्णस्य॥ हरिण इति। १२

(विषद) मूर्धन्यपाठ मैथिलानां निर्मूल इति केचित्। विषविषदपीयूषभेषज इति मूर्धन्ये पुरुषोत्तमः, एवं वासवदत्तायां मूर्धन्योऽपीति रक्षित इति नरसिंहादयः।......'पाण्डुरः पाण्डरस्तथा' इति द्विरूपः, श्वेते निरुकारः पाण्डौ सोकार इत्यन्ये, च.

हरिणः पाण्डुरः पाण्डुः ईषत्पाण्डुस्तु धूसरः।
कृष्णो नीलासितश्यामकालश्यामलमेचकाः॥ १३

हरति हरिणः। पाण्डुः पाण्डुत्वमस्यास्ति पाण्डुरः, नगपाण्डुपांशुभ्यो रः॥ ईषदव्यक्तः पाण्डुः। धु(धू ?)नोति चेतो धूसरः॥ वर्णान् कर्षति कृष्णः। नील वर्णे। सितविरुद्धोऽसितः। श्यायते श्यामः। श्यामं श्यामत्वं लाति श्यामलः।

---

(१) क्षोभानामित्यस्याप्यणत्वं क्षुभ्नादित्वात्, एवमेव रूपश्चटीकाकृद्विष्णुमिश्र-वृन्दावनयमकटीकाकृद्विद्याविनोदौ, त.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालयति मनः कालः। मेचयति मिश्रीभवति, मेचकः शिखिकण्ठाभ इति दुर्गः ॥ १३

हरति मनो हरिणः, श्यास्त्याहृञ्वि(रि, ङ)भ्य इनच् (२. ४६.)। पाण्डुगुणयोगात् नगपाण्डुपांशुभ्यो र इति रः। अस्यानार्षत्वात् पाण्डुरोऽसाधुरिति भाषा(ग, घ)वृत्तिकृतो दुर्ज्ञानं जयादित्यं प्रति वाग्यमात्रं च जनितम्। भाष्यविरुद्धं हि चेदं नत्वयुक्तं वृद्धान्तरोक्तानामन्येषामपि ग्राह्यत्वात् भाष्यानुक्तानां भट्टिकोक्तानामन्यथाऽप्रामाण्यापत्तेः। अयञ्च शब्दार्णवकारादिभिरतिपरमशिष्टैरनुशिष्टः। यथा—"पाण्डुरस्तु पीतरक्तभागी प्रत्यूषचन्द्रवत्। पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः। पाण्डरः पाण्डुरे कैश्चित् कैश्चित् पाण्डौ प्रवेशित" इति। पाण्डुरस्त्वल्पभेदाविवक्षायां शुक्लेऽपि प्रयुञ्जत इति शुक्लपर्याये निबद्ध इति तु विशेषः। त्रयं पाण्डुवर्णस्य ॥ सितपीतसमायोगः पाण्डुवर्णः प्रकीर्तितः। ईषच्छब्दोऽव्यक्तपरः। धूनोति चेतो धूसरः, धू विधूनने, कृधूमदिभ्यः सरन् (३. ७३.), बाहुलकादषत्वम्—"महिषधूसरितः सरितस्तटः (परिगतो विषदाविषदापितः, म)" इति जानकीहरणम्। धूसरस्तु सितः पीतलेशवान् बकुलच्छविरिति शब्दार्णवः। एकम् ॥ कृष्ण इति। कर्षति मनः कृष्णः, कृष विलेखने कृषेर्वर्णे इति नक्। नील वर्णे इगुपधत्वात् कः नीलः। सितविरुद्धोऽसितः। श्यायते मनोऽस्मात् श्यामः, श्यैङ् गतौ इषियुधीति मक्। काल उक्तो यमे। श्यामः अस्यास्ति श्यामलः, सिध्मादित्वाल्लच्। मचति मिश्रीभवति वर्णान्तरेण मेचकः, मच मुचि कल्कने वुन् गमिपचिमचां नाम्नीत्येत्वम् (५. ३७)। मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभ इति तु शब्दार्णवे भेदः। सप्त कृष्णवर्णस्य ॥ पीत इति। १३

(धूसर) मूर्धन्यष इति शाब्दिकनरसिंहः, द.

पीतो गौरो हरिद्राभः पा(प)लाशो हरितो हरित्।
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ॥ १४

पीयते वर्णात् पीतः। पलाशस्यं पर्णस्यायं पालाशः पीतरक्तकृष्णः, शाश्वतः पलाश इत्याह—"राक्षसे किंशुके पर्णे पलाशाख्यं हरित्यपि"। हरति हरितः ॥ रोहति रोहितः, रलयोरेकत्वम् ॥ शोणति शोणः शोण वर्णे, कोकनदच्छविः पद्माभः ॥ पीतरक्तस्तु पिञ्जरः ॥ १४

पीयते वर्णात् पातेर्बाहुलकादञ्जिघृषिभ्य क्तः, घुमास्थेत्यादिना ईत्वम्। गौर उक्तः। हरिद्राया इवाभा दीप्तिरस्य हरिद्राभः। त्रयं पीतवर्णस्य ॥ पलाशं पत्रं तत्तुल्यवर्णतया पलाशः—"पत्रं पलाशं ना ना शटीहरितकिंशुक" इति तालव्यान्ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रुद्ररभसौ। अतो ह्रस्वादिः पुंलिङ्गः। पालाश इति दीर्घपाठे तु शेष इत्यस्य विधित्वाङ्गीकारादणित्याहुः। त्रीणि हरिद्वर्णस्य॥ लोहित इति। रुह जन्मनि रुहेश्च लो वेति इतन् लोहितः। रञ्ज रागे क्तः रक्तः। त्रयं रक्तवर्णस्य॥ भागरिस्तु लोहितरक्तयोरल्पं भेदमाह— "बन्धुजीवजबासन्ध्याच्छवौ वर्णौ मनीषिभिः। शोणलोहित-रक्तानां प्रयोगः परिकीर्तित" इतीह तु भेदो नादृतः॥ कोकनदच्छवी रक्तोत्पलाभः शोणः शोण वर्णे शोणति पचाद्यच्। एकम्॥ अव्यक्तेति। १४

'हरिद् वा ना हरिः स्मृता' इति कोषात्, च.

अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः।
श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते॥ १५

रागोऽत्र लौहित्यम्। इयर्त्यरुणः॥ पाटलवर्णः, पाटेरलज् वा॥ श्यायते श्यावो धूसरारुणः। कपिर्मर्कटवर्णोऽस्त्यस्य लोमादित्वाच्छः॥ धूनोति धूमं राति वा धूम्रः। धूमवर्णं लाति धूमलः॥ १५

अव्यक्तरागः किञ्चिल्लोहितोऽरुणः यथा मदमत्तस्य चक्षूरागः, अरुणः कृष्णलोहित इत्यमरमाला। एकम्॥ श्वेतरक्तमिश्रः पाटलाकुसुमाभः पाटलः, अट पट गतौ, णयन्ताद् वृषादिभ्यः कलच् पटेरलज् बाहुलकादिति तु भट्टः। एकम् (द्वे, घ)॥ श्यायत इति श्यावः, श्यैङ्गतौ बाहुलकात् कृशागृ तृ(र्द ?)भ्यो वः (१. १५५)। कपिर्वर्णस्याख्या लोमादित्वाच्छः, कपिशस्तालव्यान्तः, तथा च "कपिशितं पिशितं मदनाग्निनेति" माघः। द्वे कृष्णपीतमिश्रवर्णस्य॥ धूमं रातीति धूम्रः, रा दाने पृषोदरादित्वादकारलोपः। धूममेव लातीति धूमलः। कृष्णमिश्रो लोहितः कृष्णलोहित इति शाकपार्थिवादिः। त्रयं कृष्णलोहितमिश्रवर्णस्य॥ कडार इति। १५

धूमाभो (ज ; धमलो, च) धूमलो धूम्र इति रत्नकोषः, च.

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ।
चित्रं किर्मीरकल्माषशव(ब)लैताश्च कर्बु(र्बु)रे॥
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति॥ ❀ १६ इति धीवर्गः॥

❀ रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।
रोहितिका लोहितिका रागात्कोपादिनापि वा॥
शोणी शोणाथ पिशङ्गी पिङ्गला हरिणीत्वियम्।
हरितैनी तथैवैता श्येता श्येनी सिता च सा॥
नीलैव वस्त्रे तन्नाम्नी नीली प्राणिनि चौषधौ॥ क.

(क्वचित्पाठ इति मुकुटादयः)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कडति कडारः। कपिवर्णं लाति कपिलः। पिञ्जति पिङ्गः। पिंशति पिशङ्गः। कन्दते कद्रुः। पिङ्गं लाति पिङ्गलः। बभ्रुरनेकार्थे। पिशङ्गो रोचनापाण्डुरिति कात्यः॥ चीयते चित्रम्। कीर्यते किर्मीरः। कलयति वर्णान् कल्माषः। शवति याति वर्णान् शबलः। एति वर्णान् एतः। क्रियते वर्णैः कर्बुरः कर्बुरेति वा॥ गुणमात्रे वर्तमाना गुणाः पुंसि पटस्य शुक्लः, गुणवद्वृत्तितायां त्वभिधेयलिङ्गाः शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्। वर्णादनुदात्तात्तोपधात्तो न (४ १. ३९.) इति श्येनी श्येता, लोहिनी लोहिता॥ १६ इति धीवर्गः॥

गडतीति गड सेचने गडेः कड् चेत्यारन् (३. १३५) कडादेशश्च कडारः। कपिलः कबृ वर्णे कबेः पश्चेति (१. ५६.) इलच्पश्चान्तादेशः, कपिवर्णं लातीति कपिल इति तु स्वामी। पिञ्जति पिजि वर्णे पिङ्गः। पिंशति पिश अवयवे विडादिभ्यः किदित्यङ्गच् पिशङ्गः, तालव्यमध्यः, तथा च माघे "परिपाकपिशङ्गलतारजसा। रोधश्चकास्ति कपिशं गलतेति"। कमु कान्तौ जत्रा (?) दयश्चेत्यनेन (४. १०२) रुः, टिलोपाभावश्च निपात्यते, दकारश्चान्तादेशः कद्रुः। पिञ्जति पिजि वर्णे वृषादित्वात् कलच् न्यङ्क्वादीनाञ्चेति कुत्वं पिङ्गलः। पिङ्गं लातीति तु स्वामी। शब्दार्णवे तु भेदः—"सितपीतहरिद्रक्तः कडारस्तृणवह्नि(मणिरश्मि, ङ)वत्। अयन्तद्रिक्तपीताङ्गः (तांशः, ङ) कपिलो गोविभूषणः। हरितांशेन हीनोऽसौ पिशङ्गः पद्मधूलिवत्। पिशङ्गत्वसितावेशात् पिङ्गो दीपशिखादिषु॥ पिङ्गलस्तु परच्छायः पिङ्गे शुक्लाङ्गखण्डवदिति॥" षट् पिङ्गलवर्णस्य॥ चीयत इति चित्रं, अमिचिमिदिशासि (गमि, ग) भ्यः त्र (४. १६३) इति त्रः। गुणे शुक्लादयः पुंसीति वक्ष्यते। अतो(नामानुशासने, घ; नानार्थ-ग) पुंस्काण्डे निबन्धनात् (निर्वचनात्, ङ) चित्रमिति पाठो लिपिदोषजः। तस्माच्चित्रकीर्मीरेति समस्तं पाठ्यमित्येके। क्लीबनिर्देशस्तद्वति गुणिलिङ्गत्वेन कामचारादित्यन्ये। प्रक्रान्तं समासं विहाय चित्रमिति पृथक्रूपभेदप्रदर्शनं गुणे शुक्लादयः पुंसीत्यस्य बाधनार्थम् इति तु वयम्। तथा च शब्दार्णवे क्लीबत्वं दृश्यते। मेदिनि(नी, ङ)करोऽपि स्पष्टमेव "तिलकालेख्ययोः क्लीवं कर्बूराद्भुतयोरपी"ति। एकञ्चेत् तत् कथं चित्रं चित्रञ्च देवता कुत इति धर्मकीर्तिर्वार्तिकञ्च। नामानुशासने तु कथं पुंस्त्वमिति न विद्मः। कीर्यते कीर्मीरः, गम्भीरादय इति किरतेरीरन् मुडागमश्च। कलयति वर्णमिति कल्माषः, कर्बूरे कृष्ण इति मूर्धन्यान्ते रभसः। शपत्याक्रोशति वर्णानिति शपेर्वश्चेति कलः (१. १०७) वत्वञ्च शवलस्तालव्यादिः, "शकुनिपताकाशवलं घनवृन्दं चक्षुषा पताऽऽकाशबलमिति वृन्दावनात्। एति वर्णान् एतेर्वर्णे तन् एतः। कर्बुर ऊक्तो राक्षसे। षट् नानावर्णस्य॥ गुण इति। गुणे वर्णमात्रे वर्तमानाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुक्लादयः कर्बुरान्ताः पुंसि यथा पटस्य शुक्लो गुणः। तद्वति द्रव्ये वर्तमाना अभेदोपचारात् गुणिलिङ्गा वाच्यलिङ्गाः। तत्र स्त्रियां शुचिः शुची, वर्णादित्यादिना ङीप्तकारनकारौ वा श्येता श्येनी हरिता हरिणी लोहिता लोहिनी रोहिता रोहिणी एता एनी, ङीष् गौरी, अर्जुनी हरिणी धूसरी पलाशी कडारी किर्मीरी कल्माषी शवली, खरुसंयोगोपधात् प्रतिषेधो वक्तव्य इति पाण्डुः कद्रुः, नीलात् प्राण्योषध्योः नीली वडवा नीली ओषधिः, वा संज्ञायां नीली नीला, अन्यत्र नीला शाटी, कुवलयदलनीला कोकिला बालचूते इत्यपपाठ इति वामनः, जानपदेत्यादिना वर्णे ङीष्, शोणात् प्राचामिति पक्षे ङीष् शोणी शोणाऽपि, पिशङ्गादुपसंख्यानं पिशङ्गी। 'भ्रमरोत्कट (र, म) कल्माषाः कुसुमानां समृद्धय' इति दर्शनात् कल्माषेति टाबन्तमपि। शवलेति टाबन्तमसाध्विति वाण(मन)भट्टः। अर्शआद्यचि तु टापि साध्वेव। रोहिणी रोहितेत्यादिपाठः क्वचिदृश्यते, तद्व्याख्या तु लिखितस्त्रीलिङ्गप्रयोगादेव कृतप्रायेति न क्रियते॥ १६॥ इति धीवर्गविवरणम्॥

केचित्तु द्वाभ्यां द्वाभ्यां पर्यायः। अत्र नीलपीतः कपिल इति स्वभूतिः। 'पिशङ्गो रोचनापाण्डुः कद्रूः कनकपिङ्गल' इति नाममाला, च.

'उपस्रोतः सुष्ठु स्थितमहिषगोवर्गशवलाः स्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुव' इति टाबन्तोऽसाधुरिति भट्टवामनः, किन्तु अर्शआद्यचि साधुः, म.

'कल्माषश्वित्रकिर्मीरौ धूसरः स्निग्धपाण्डर' इति पुंस्काण्डे वोपालितः। क्लीबनिर्देशस्तु तद्वति गुणिलिङ्गत्वे कामचारादिति स्वभूतिः। गुणे शुक्लादयः पुंसीत्यस्यापवादः क्लीबनिर्देश इति तु साञ्जः। नपुंसकपाठस्तु लेखकप्रमादज इति कश्चित् (मधुमाधवी, त), ज. अतो गुणे कर्मीर इति वेति केचित्, थ-(ड, ह पुस्तकयोरपि कर्मीर इति पाठान्तरम् अन्यत्र तु न दृश्यते)। सारमञ्जर्यां तु चित्रमिति नपुंसकपाठोऽयुक्तः, गुणे शुक्लादयः पुंसीत्युक्तत्वात् 'शवलश्चित्र उच्यते' इति प्रयोगाच्च। विचित्रोऽपि, त.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः॥ १

रूपभेदानुक्त्वा शब्दभेदानाह ब्राह्मी त्विति। ब्रह्मण इयं ब्राह्मी ब्राह्मी जाताविति साधुः। अतएव शब्दब्रह्मणोऽधिष्ठात्र्याः पर्याया एते। व्याहारादयस्त्वधिष्ठेयाः। बिभर्तीति भारती। भाष्यते भाषा। गृणाति गीः। उच्यते वाक् क्विब् वचीति क्विप् दीर्घोऽसंप्रसारणञ्च। वाण्यते शब्द्यते वाणी। सरः प्रसरणमस्त्यस्याः सरस्वती। उच्यते वचः, असुन्॥ १

ब्रह्मण इयं ब्राह्मी ब्राह्मी जाताविति टिलोपे टिड्ढाणञादिना ङीप्। भरतेनावतारितत्वाद्भारती, शेषेऽण्। भाष्यते भाषा गुरोश्चेत्यप्रत्ययः। गृणन्ति तां गॄ शब्दे सम्पदादित्वात् क्विप्, र्वोरुपधाया दीर्घः, गी रेफान्ता। भागुरिमते गिरापि। "ब्रवणी (ब्रवाणी, ङ, ब्राह्मणी, ड.) वचनं वाचा जल्पितं गदितं गिरे"ति शब्दार्णवः। ब्रवणीति ब्रह्मणो ब्रव(ब्रुवा, ङ)णादिति निरुक्तादेव वच्यभावः। उच्यते वाक् चान्ता क्विब्वचीत्यादिना क्विप् दीर्घोऽसम्प्रसारणञ्च। वाणी अन रण वणेति दण्डकः घञि गौरादिङीष्। सरोऽस्या आश्रयत्वेनास्ति मतुपि सरस्वती। इयं हि ब्रह्मलोके ब्रह्मसरः समाश्रित्य शापान्नदी भूत्वा लोकमवतीर्णा। अत्र शक्तिशक्तिमतोरभेदाद्वचनमपि सरस्वतीशब्दवाच्यम्। भावे घञि व्याहारः। वचेः कर्मणि क्तिनि उक्तिः। लपितं भावे क्तः। एवं भाषितमपि। वचेर्ल्युट् वचनम्, असुनि वचः सान्तम्। त्रयोदश वचनस्य॥ अपभ्रंश इति॥ १

(वाणो) वर्ग्यो बः, च, त. वाणिश्च। मूर्धन्यान्ता 'सारवाणि सारसमिथुनानि सेवकवृन्दं चे'ति नलचन्द्रश्लेषात्, य.

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता॥ २

संस्कृतादपभ्रश्यते इत्यपभ्रंशः। अपभ्रष्टः शब्दोऽपशब्दः गावीगोनीगोपोतलिकादिः॥ शास्त्रे व्याकरणतर्कशास्त्रादौ यो वाचकः स शब्दः, लोके समुद्रघोषादिरपि॥ वक्तव्यं वाक्यं चजोः कुघिण्यतोः। वचोऽशब्दसंज्ञायामिति-(७. ३. ६७.) अन्यत्र च वाच्यम्। तिङन्तसमूहो यथा—पचति भवति पाको भवतीत्यर्थः। सुबन्तचयो यथा—प्रकृतिसिद्धमिदं हि महात्मनां, भवत्यध्याहारस्त्वत्र हि वाचकमात्रम्। कारकैरन्विता संबद्धार्था वा क्रिया वाक्यम्—देवदत्त गामभ्याज शुक्लां दण्डेन। सर्वत्राकाङ्क्षायोग्यतावशादन्वितत्वं लक्षणम्। यज्जैमिनिः—"अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्"। भट्टोऽपि—"साकाङ्क्षावयवं भेदे परानाकाङ्क्ष-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दकम्। कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते ।।" एकं शब्दात्मनोऽन्यदर्थात्मकस्य वाक्यस्य लक्ष्मेत्येके (लक्ष्यते, क)।। २

शब्दानुशासने शिष्टादितरो गावी-गोणी-गोपोतलिकादिरपभ्रंशोऽपशब्द उच्यते। अपभ्रंशस्तालव्यान्तः संस्कृतादपभ्रश्यत इति भ्रशु भ्रन्शु अधःपतने, कर्मणि घञ्। दन्त्योपीत्येके (सर्वानन्दादयः, य) तदसत्, स्रन्सु भ्रन्सु अधःपतने इत्यस्य घञि रूपं न दृश्यते इति भाष्यादावुक्तत्वात्। शब्दानुशासनेऽसंस्कृतशब्दोऽपशब्दः निपातस्यानेकार्थत्वादत्रापशब्दोऽसंस्कृतार्थः। अपशब्दोऽव्ययं कुत्सायाम्। तथा च कुत्सितश्चारोपोऽपचार इति परिन्योर्नीणोरिति सूत्रे न्यासः। द्वे आभीराद्युक्तिरूपासंस्कृतवचनस्य ।। (शास्त्रे व्याकरणादौ वाचको यः स शब्द इति स्वामी। शास्त्रे यः शब्दः स वाचक इत्यन्ये। अयमेव साधुरपि, ग)। प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गवादिरूपः संस्कृतः शास्त्रे व्याकरणे तर्कादौ च शब्द उच्यते, लोके तु संस्कृतोऽसंस्कृतश्च शब्द उच्यते। द्वे वाचकस्य ।। तिङ्सुबन्तेति ।। (तिङ एकार्थपरपदसमूहो वाक्यमित्युच्यते, विवक्षितार्थप्रदिपादनात् वचेर्ण्यत् वचोऽशब्दसंज्ञायामिति निषेधस्य पर्युदासादिह चजोरिति कुत्वं समूहश्चैकार्थकत्वात् अर्थो महाविशेष्यं महत्त्वं त्वनुपसर्जनता, ऐक्यं त्वेकवृत्तिविषयता, इदञ्च लक्षणं सूत्रभाष्ययोर्मतं तच्च वाक्यं त्रिधा तिङन्तचयः सुबन्तचयः उभयचयश्चेति, आद्यो यथा पचति भवति एककर्तृका वर्तमाना पचिक्रिया भवतीत्यर्थः, क्रियाप्रधानमाख्यातमिति सिद्धान्तात् क्रियायाश्चासत्त्वभूतत्वेऽपि कर्तृतया च सम्बन्धस्य भूवादिसूत्रे भाष्यकैयटादौ स्थापितत्वात्, द्वितीयो यथा प्रकृतिसिद्धमिदं हि महात्मनां, तृतीयो यथा घटमानय, भ्रेमुर्ववल्गुरित्यादि तु नैकं वाक्यं भ्रमणवल्गनादीनां प्रत्येकं प्राधान्यात्। किन्त्वाक्षिप्तकारकगर्भाणि नानावाक्यान्येवेति दिक्। इदानीं वार्त्तिकमते लक्षणान्तरमाह, क्रिया वेति क्रियापदमित्यर्थः। उक्तं हि कात्यायनेन यत्रान्यत् क्रियापदं नास्ति तत्रास्तिर्भवतिपरोऽप्रयुज्यमानोऽप्यस्तीति। अतएवाभिहिते प्रथमेति सङ्गच्छते। एतन्मते द्विविधमेव वाक्यं केवलसुबन्तचयानभ्युपगमात्। एतन्मतखण्डनन्त्वाकरे स्पष्टं, ग्रन्थगौरवभयान्न लिख्यते, ग) तिङ्सुबन्तयोश्चयः समुदायो वाक्यम्। द्वन्द्वात् परो यः श्रूयते लभतेऽसौ प्रत्येकमभिसम्बद्धमित्यन्त उभयोरपि सम्बध्यते, वाक्यं वक्तव्यम् वचेर्ण्यति चजोरिति कुत्वं ओदनं पचति। तिङ्ग्रहणं क्रियोपलक्षणं, तेन कटं क्रियोपलक्षणं तेन कटं कृतवानित्याद्यपि वाक्यम्। यद्वा तिङन्तचयः सुबन्तचयश्च वाक्यं यथा पचति भवति पाचको भवतीत्यर्थः। सुबन्तचयो यथा प्रकृतिसिद्धमिदं हि महात्मनामिति। भवत्यध्याहारस्तत्र वाचकमात्रम् एतच्च मतान्तरमावेदितम्। अत्रोपलक्षणप्रयासं दृष्ट्वा स्वमतमाह क्रिया वेति। यथा देवदत्तो ग्रामं गच्छति गत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति वा। पश्य त्वं मृगो धावतीत्यत्र पश्य त्वमित्येकं वाक्यं, मृगो धावतीत्यपरं क्रिययोः सम्बन्धाभावादिति पूर्वटीकाकाराः। वयन्तु कारकान्विता कारकैः संबद्धार्थेति व्याचक्ष्महे, तेनाकांक्षायोग्यतासत्तिमतां समूहो वाक्यमिति लक्षणमेवेदं कृतम्। तेन देवदत्तो गामभ्याज शुक्लां दण्डेन इतीदृशमेव वाक्यं प्रकृतिसिद्धमित्यादौ यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिभवतिकरोतीनामन्यतमाध्याहारः कर्तव्य इति भाष्योक्तेः क्रियासम्बन्धितास्यैवेति पचतिभवतीत्यत्रापि साध्यस्वभावोऽपि धात्वर्थः प्रार्थनादिक्रियां प्रति सिद्धत्वेनाश्रीयत इति ज्ञापितत्वात् सिद्धत्वे लक्षणव्याप्तिः। एकं पदसमूहस्य॥ श्रूतिरिति। २

काव्ये त्वाभीरादिगिरः इति छभूतिः,—तथा च दण्डी 'आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृतः।' च.

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्म(त्रयीधर्म)स्तु तद्विधिः।
स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी॥ ३

श्रूयते श्रुतिः। विदन्त्यनेन धर्मं वेदः। आम्नायते पारम्पर्येणाम्नायः। त्रयोऽवयवास्त्रयी। आथर्वणस्त्रय्युद्धारः। त्रय्यनुवादात् श्रुत्यादिविधिरिति लिङ्गसङ्कर-दोषो नोद्भावनीयः। निगमोऽनेकार्थे॥ वैदिको विधिश्चोदनालक्षणोऽर्थो धर्मः यत् गौतमः श्रुतिस्मृतिविहितो धर्मः। स्मृत्युक्तोऽपि वैदिक एव वेदमूलत्वात् स्मृतेः। तद्विधिरिष्टाख्यस्त्रयीधर्मोऽन्यः पूर्ताख्य इत्येके॥ ऋच्यते स्तूयतेऽनया ऋक्। स्यति पापं साम। इज्यतेऽनेन यजुः॥ ३

श्रूयते धर्मोऽनया श्रुतिः श्रुयजिस्तुभ्यः करण इति क्तिन्। विदन्त्यनेन धर्मं घञि वेदः। आङ्पूर्वो म्नायतिरुपदेशार्थः, आम्नायेते उपदिश्येते धर्माधर्मावनेन घञि आतो युक् चिण्कृतोः (७. ३. ३३) इति युक्। आमनति उपदिशति तौ श्याद्व्यधेति कर्तरि अण् वा आम्नायः। त्रीणि प्रत्येकं समुदायेन च वेदस्य॥ त्रयी वक्ष्यमाणा तया विधिर्विधीयमानो यज्ञादिस्त्रयीधर्मः। उक्तञ्च वि(नि, ङ)-धानमृग्यजुःसाम्नां त्रयीधर्मं विदुर्बुधा इति (नाममाला, ट)। समासे गुणीभूतस्यापि त्रयीशब्दस्य वक्तुर्विवक्षावशात् तच्छब्देन परामर्शः यथा अथ शब्दानुशासनं केषां लौकिकानां वैदिकानाञ्चेति "भोगिभोगासनासीनं ददृशुस्तं दिवौकसः। तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रह" मिति रघुः। एकम्॥ ऋच्यते देवा अनया ऋक् चान्ता, ऋच स्तुतौ, क्विप्। सो अवसाने स्यति पापं सातिभ्यां मनिन्मनिणौ इति मनिन् साम। इज्यतेऽनेन यजुः। अर्तिपृवपियजितनिधनितपिभ्यो नित् (२. ११८.) इत्युसिः यजुः Funding by IKS-MoE पृथगेकैकम्॥ इतिरतिक्रान्त (ऋत, ङ)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाची, एते वेदास्त्रयस्त्रयीशब्देनोच्यन्ते ऋग्यजुःसामलक्षणास्त्रयोऽवयवा अस्याः, त्रिशब्दात् संख्याया अवयवे तयट् तस्य द्वित्रिभ्यां तयस्यायज्वेति अयच् टिड्ढाणञित्यादिना ङीप्। वेदत्रयस्य समुदितस्यैकम्॥ शिक्षेति। ३

शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ।
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः॥ ४

अङ्ग्यते ज्ञायतेऽनेनाङ्गम् उपकारकम्। "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः। छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते"॥ स्वार्थे कारः, वर्णात्कार इत्यत्र निर्णीतत्वात्। प्रणूयते प्रणवः॥ इति ह आसीद् यत्रेति इतिहासः इत्येवमर्थे हः किलार्थे। पुरावृत्तं पूर्वचरितम्॥ उदात्तानुदात्तस्वरिताः ऊर्ध्वमादीयत इत्युदात्तः। एकश्रुतिस्तु स्वराविभागः॥ ४

श्रुतेर्वेदस्य शिक्षेत्याद्यङ्गम् अङ्ग्यते ज्ञायते अनेनेति कृत्वा आदिना कल्पादिग्रहः। तदुक्तं—"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां श्रुतिः। छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते"॥ अकारादिवर्णानां स्थानवारणप्रयत्नबोधिका अकुहविसर्जनीयाः कण्ठ्या इत्यादिका शिक्षा, शिक्षति शिक्ष विद्योपादाने, गुरोश्चेत्यकारः। यागक्रियाणामुपदेशः कल्पः। साधुशब्दान्वाख्यानं व्याकरणम्। वर्णागमो वर्णविपर्ययश्चेत्यादिना निश्चयेनोक्तं निरुक्तम्। ग्रहणादिगणनशास्त्रं ज्योतिःश्रुतिः। छन्दसां पद्यानां शास्त्रं छन्दोविचितिः। एकं वेदाङ्गस्य॥ पापेभ्योऽवति रक्षति भूतानि अवतेष्टिलोपश्चेति (१. १४..)मन्टिलोपौ, टिलोपसामर्थ्यात् प्रत्ययस्यैवान्यथा हि डिदित्येवोच्यते, ज्वरत्वरादिना ऊट् गुणः। ततो बाहुलकात् वर्णात्कारः ओंकारः। प्रकृष्टो नवः प्रणवः नवः स्तुतिः प्रणूयते वा प्रणवः, नु स्तुतौ अप् उपसर्गादिति णत्वम्। द्वे ओंकारस्य॥ इतिहास इति। इतिहशब्दः पारम्पर्योपदेशेऽव्ययम्, इतिह आस्तेऽत्र हलश्चेति घञ् इतिहासः। इति एवमर्थे ह किलार्थे एवं किलास्त इति पचाद्यचि इतिहास इति तु भट्टः। पुरावृत्तोपनिबन्धनप्रायत्वात् पुरावृत्तं पूर्वचरितमिति स्वामी। द्वे पूर्ववृत्तप्रतिपादकस्य व्यासादिप्रणीतग्रन्थस्य॥ उदात्ताद्यास्त्रयः स्वराः आदिनाऽनुदात्तस्वरितयोर्ग्रहणम्। तदुक्तं—"उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः। चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृत" इति। स्वरन्ति शब्दायन्ते स्वृ शब्दोपतापयोः बाहुलकादप्, स्वराः। उच्चैरादीयत उच्चार्यते उदात्तः। एकम्॥ आन्वीक्षिकीति। ४

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः।
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम्॥ ५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणमन्वीक्षा, सा प्रयोजनं यस्याः सा आन्वीक्षिकी तर्कविद्या ।। दम्यतेऽनेन दमनं वा दण्डः, स नीयते दम्यं प्रति प्राप्यते यया सा दण्डनीतिरर्थशास्त्रम् । वार्ता वैश्यवर्गे वक्ष्यते ।। आचष्टे आख्यायिका, वृत्तार्थकथनाद्धर्षचरितादिः ।। पुराऽपि नवं पुराणम् । "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुवंशचरितं पुराणं पञ्चलक्षणम् ।।" ५

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya
770

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(Continued from first flap)

gong, Durgapur and many other places and with his critical acumen he collated them all before deciding upon the genuineness of the text.

Amara is essentially a dictionary of synonyms consisting of three books called Kāṇḍas. At the end of the third book three appendices on homonyms, indeclinables and genders are added. The entire book is in Anustup verses. Anundoram planned to bring out the book in parts. The first part dealing with first fifty verses of Svargādi Varga was published in 1887. The next year he published the second part ending with the fifth verse of Sabdādi Varga. But the cruel hand of death snatched him away and his dream remained unfufilled. It would have been a great boon to the students of Sanskrit and scholars alike if Anundoram could have time to publish the whole work.

Even this partial publication brought for Anundoram high praises from eminent Sanskrit scholars and leading newspapers of the country of that time. No less a scholar than Dr. D. R. Bhanderkar, while giving his opinion on K. G. Oka's edition of Amara in 1913, remarked—"The importance of Kṣīraswamī's commentary will be patent to any one, who reads Anundoram Borooah's preface to his partially published edition Nāmalingānuśāsana." Prof. F. Max Muller wrote to Borooah, "It does you very great honour." The Indian Spectator of 1887 reviewing the first part of Borooah's edition of Amara wrote, "We cannot too much admire the immense industry which Mr. Borooah has brought to bear on this 'magnum opus' of the immortal Amara."

What attaches special value to Anundoram's edition of Amara is his learned preface. The credit of discovering Kṣīraswamī's talents is due to Anundoram. Besides Kṣīraswamī, two other commentators came to prominence. They are Vandyaghatīya Sarvānanda of 12th century A.D. and Rāyamukuṭa of 15th century A.D. Borooah reproduces complete extracts from Rāyamukuṭa's commentary along with Kṣīraswamī's. The book is also enriched with relevant citations from other commentators including Sarvānanda. He has endeavoured his level best to remove orthographical errors in the text of Amara and the commentaries.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ANUNDORAM BOROOAH'S GREAT SANSKRIT CLASSICS IN REPRINT

Highly acclaimed by great Sanskrit scholars including Max Muller

MAHAVIRACHARITA—

(Royal, cloth-bound, pp. 278) Rs. 25·00

SARASWATI-KANTHABHARANA—

(Royal, rexine-bound, pp. 410) Rs. 30·00

NANARTHA-SAMGRAHA—

(Royal, cloth-bound, pp. 560) Rs. 35·00

The publication of some of Anundoram Borooah's outstanding works is something which has its value as a national endeavour in the whole of India.

—*Dr S. K. Chatterji, National Professor, and President, Sahitya Akademi*

The Publication Board of Assam is rendering a valuable national service by reprinting the great Sanskrit scholar's works. The volumes richly deserve an influential circulation amongst scholars and lovers of Sanskrit all over the world.

—*Amrita Bazar Patrika*

Borooah's 58-page introduction titled 'Bhavabhuti and His Place in Sanskrit Literature' is a masterpiece of readable research, better than anything Wilson, Keith and Konow have written. It deserves to be reprinted separately as an example of what Sanskrit learning combined with a vigorous and alert modern intelligence is capable of in the field of literary criticism.

—*Hindusthan Standard*

TRIBAL FOLK-TALES OF ASSAM—(HILLS)

Compiled by S. N. Barkataki.

One hundred twenty-eight folk-tales belonging to different tribes of the hills of Assam, written in a brilliant style, which makes the stories irresistible reading. Twenty-one magnificent pictures. Royal, cloth-bound, Rs. 15·00.

THE LAND WHERE THE BAMBOO FLOWERS

By J. D. Baveja

This is the first book of its kind about the strife-torn district of Assam—Mizo Hills. The author, besides describing the origin and history of the Mizo tribe, has dealt at length with the cultural outlook of the people. Thirty-two magnificent pictures. Royal, cloth-bound, Rs. 10·00

PUBLICATION BOARD, ASSAM
GAUHATI-3 (ASSAM)

Funding by IKS-MoE